# शास्त्रसंदेशमाला

## (शतकसंदोहः)

६



# શાસ્ત્રસંદેશમાલા - ૬

## શતકસંદોહઃ

### ભાગ-૬


।। સંકલન ।।

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.પંન્યાસશ્રી બોધિરત્ન વિજયજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.



।। પ્રકાશક ।।

શાસ્ત્રસંદેશમાલા

૩, મણિભદ્ર એપાર્ટમેન્ટ, સુભાષચોક,

ગોપીપુરા, સુરત-૧.

❁ શાસ્ત્રસંદેશમાલા - ૬
❁ શતકસંદોહઃ
❁ પ્રથમ આવૃત્તિ
❁ વિજયા દશમી વિ.સં.૨૦૬૧
❁ કિંમત રૂ.૪૦/- (પડતર કિંમત)

**॥ પ્રમાર્જના - શુદ્ધિ ॥**

**પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.**

**પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા.**

**પૂ.સા.શ્રી ચંદનબાળાશ્રીજી**

**પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ.**

**પંડિતવર્ય શ્રી રતીભાઇ ચીમનલાલ દોશી**

❁ **ટાઇપ સેટીંગઃ** પાયલ પ્રિન્ટર્સ - રાધનપુર
શ્રીજી ગ્રાફીક્સ, પાલડી, અમદાવાદ.

❁ **મુદ્રક :** શિવકૃપા ઓફસેટ પ્રીન્ટર્સ, દૂધેશ્વર, અમદાવાદ-૪

---

વિશેષ નોંધ : શાસ્ત્રસંદેશમાલાના ૧ થી ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યમાંથી કરવામાં આવેલ છે. તેનો નોંધ લેવા વિનંતી.

આભાર...!

અનુમોદનીય...!

અનુકરણીય...!

શાસ્ત્રસંદેશમાલા ના

એક થી દસ ભાગના પ્રકાશનનો સંપૂર્ણ લાભ

# શ્રી સુરત તપગચ્છ રત્નત્રયી આરાધક સંઘ



**C/o વિજયરામચન્દ્રસૂરીશ્વરજી**
**આરાધના ભવન,**
આરાધના ભવન રોડ,
સુભાષચોક,
ગોપીપુરા, સુરત-૨



**તરફથી શ્રી સંઘના જ્ઞાનદ્રવ્યની નિધિમાંથી લેવામાં આવેલ છે. તેની અમો ભૂરી...ભૂરી... અનુમોદના કરીએ છીએ...!**

**શ્રી સંઘ તથા ટ્રસ્ટીગણના અમો આભારી છીએ ..!**

- શાસ્ત્રસંદેશમાલા

# સાચા યોગી...!

**आत्मप्रवृत्तावतिजागरूकः, परप्रवृत्तौ बधिरान्धमूकः ।**
**सदा चिदानन्दपदोपयोगी, लोकोत्तरं साम्यमुपैति योगी ॥ १ ॥**

આત્માને શિવપદનો સ્વામી બનાવવો હોય તો લોકોત્તર સામ્ય (એટલે કોઈપણ સારા નરસા કર્મજન્ય પ્રસંગમાં રાગ-દ્વેષની હાજરીમાં પણ રાગ અને દ્વેષથી રહિત રહેવું તે.)ને પામ્યા વિના ચાલે તેવું નથી અને એવા સામ્યને પામવા માટે પુણ્યોદયથી મળેલા મન-વચન-કાયાના યોગના સ્વામી બની સાચા યોગી બનવું જોઈએ. એવા સાચા યોગી બનવા માટે પ્રથમ તો સદાય ચિદાનન્દપદ એટલે મોક્ષના જ ઉપયોગવાળા બનવું જોઈએ. આ ઉપયોગને સદા માટે જીવંત રાખવા માટે સમ્યગ્દર્શન, સમ્યગ્જ્ઞાન અને સમ્યક્ચારિત્ર સ્વરૂપ જે આત્માનું હિત કરનારી પ્રવૃત્તિમાં અતિજાગરૂક એટલે અતિશય અપ્રમાદી બનવું જોઈએ. એવા અપ્રમાદી બની રહેવા માટે આત્મહિતકર ઉપર જણાવેલી જે પ્રવૃત્તિઃ તેનાથી વિરૂદ્ધ જતી પ્રવૃત્તિ સાંભળવા માટે બહેરા બનવું જોઈએ, જોવા માટે અંધ બનવું જોઈએ અને બોલવા માટે મુંગા બનવું જોઈએ. આવી યોગી દશા તમો પામો એ જ એકની એક સદા માટેની શુભાભિલાષા.

-પૂ.આ.શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા

# પ્રકાશકીય ......... !

પૂર્વના પૂર્વાચાર્ય - પુણ્યાત્માઓએ પદ્યમાં પ્રરૂપેલા ૪૦૦ થી વધારે પ્રકરણોના ૭૦,૦૦૦ હજાર શ્લોક પ્રમાણ સાહિત્ય આજે એક નવા સ્વરૂપે આવી રહ્યું છે.

ઉપલબ્ધ ગ્રંથોનું ઉપકારક-ઉપયોગી બનનાર આ એક-અપૂર્વ-અનોખું-અનેરું-અદ્ભૂત પ્રકાશનમાં અમો નિમિત્ત બનેલ છીએ તેનો અમોને હર્ષ છે.

છેલ્લા ત્રણ વર્ષથી પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્ય રત્ન પૂ.પંન્યાસશ્રી તપોરત્નવિજયજી મ.સા.ના સંપૂર્ણ માર્ગદર્શન મુજબ પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સાહેબે આ સંકલના તૈયાર કરી આપેલ છે.

શાસ્ત્રસંદેશમાલાઃદ્વારા પ્રકાશિત થયેલ આ ૨૦ પુસ્તકોમાં પૂ.આ.શ્રી હરિભદ્રસૂરીશ્વરજી મ.સા. તથા પૂ.ઉપા.શ્રી યશોવિજયજી મ.સા. દ્વારા રચાયેલ પદ્ય સાહિત્યના સાત પુસ્તકો છે બાકીના તેર પુસ્તકોમાં અલગ-અલગ કર્તાઓની કૃત્તિઓનો વિષયવાર સમાવેશ કરવામાં આવેલ છે.

શાસ્ત્રસંદેશમાલાના આ પ્રકાશનમાં શુદ્ધિનો વિશેષ ખ્યાલ રાખવામાં આવેલ છે. દરેક પુસ્તકમાં આગળ જણાવેલ પૂજ્યશ્રીઓએ તે પુસ્તકનું પ્રમાર્જન કરી આપેલ છે. તેમાં પૂ.પં.શ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા., પૂ.આ.શ્રી યોગતિલકસૂરીશ્વરજી

મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા. (સંસ્કૃત ગ્રન્થો) તથા પૂ.સા.શ્રી દક્ષાશ્રીજી મ.ના. શિષ્યા પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ. આદિએ વિશેષ કાળજી રાખી શુદ્ધિ કરી આપેલ છે.

જૈન પંડિતોમાં જેમનું આગવું સ્થાન-નામ છે એવા પંડિતવર્યશ્રી રતીભાઈ ચીમનલાલ દોશીએ શાસ્ત્રસંદેશમાલાના આ ૨૦ ભાગનું સમગ્ર મેટર ચેક કરી આપેલ છે. દરરોજ પાંચ-છ કલાક અધ્યયનનું કાર્ય ચાલુ રાખી, અથાગ મહેનત કરી સમયનો જે ભોગ તેઓશ્રીએ આપેલ છે તે પ્રશંસનીય છે.

શ્રી સુરત તપગચ્છ રત્નત્રયી આરાધક સંઘે તથા બીજા અલગ અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યની નિધિમાંથી ઉદારતાપૂર્વક લાભ લઈ આ કાર્યને વેગવંતુ બનાવેલ છે તે માટે અમો તેઓશ્રીના આભારી છીએ.

ટાઈપ સેટીંગ માટે પાયલ પ્રિન્ટર્સ - રાધનપુરના માલિક શ્રી ઈકબાલભાઈ તથા શ્રીજી ગ્રાફીક્સ - અમદાવાદના શ્રી નિકુંજભાઈ પટેલે ઘણી જ ધીરજ અને ખંતથી શ્રી રીઝવાન શેખના સહકારથી આ કાર્યને પૂર્ણતાએ પહોંચાડ્યું છે.

પ્રીન્ટીંગ, ટાઈટલ પ્રીન્ટીંગ તથા બાઈન્ડીંગનું કામ શિવકૃપા ઓફસેટ પ્રીન્ટર્સ-અમદાવાદના ભાવિનભાઈએ વિશેષ કાળજીપૂર્વક કરી આપેલ છે.

- **શાસ્ત્રસંદેશમાલા**

# ॥ अनुक्रमणिका ॥


| | | | |
|---|---|---|---|
| १. | जिनशतकम्-१ | ११६ | १-११ |
| २. | जिनशतकम्-२ | १०० | ११-२८ |
| ३. | ऋषभशतकम् | १०५ | २८-४६ |
| ४. | सर्वज्ञशतकम् | १२३ | ४६-५६ |
| ५. | कुमारविहारशतकम् | ११६ | ५६-७५ |
| ६. | वैराग्यशतकम् | १०४ | ७५-८४ |
| ७. | इंद्रियपराजयशतकम् | ९९ | ८४-९२ |
| ८. | ध्यानशतकम् | १०५ | ९३-१०१ |
| ९. | भावनाशतकम् | १०० | १०२-११३ |
| १०. | उपदेशशतकम् | १०९ | ११३-१३० |
| ११. | देशनाशतकम् | १०० | १३१-१३९ |
| १२. | साम्यशतकम् | १०६ | १३९-१४८ |
| १३. | समाधिशतकम् | १०५ | १४९-१५७ |
| १४. | समताशतक | १०५ | १५८-१६६ |
| १५. | समाधिशतक | १०४ | १६७-१७५ |
| १६. | प्रश्नशतकम् | १६१ | १७६-१९५ |
| १७. | दृष्टान्तशतकम्-१ | १०० | १९६-२०४ |

| | | |
|---|---|---|
| १८. दृष्टान्तशतकम्-२ | १०० | २०५-२१३ |
| १९. आभाणशतकम् | १०८ | २१४-२२३ |
| २०. पद्मानन्दशतकम् | १०३ | २२३-२३८ |
| २१. अन्योक्तिशतकम् | १०५+४ | २३९-२५१ |
| २२. व्याख्यानविधिशतकम् | १०४ | २५२-२६० |
| २३. संग्रहशतकम् | १०१ | २६१-२६९ |
| २४. षष्ठिशतकम् | १६१+४ | २७०-२८४ |
| २५. गणधरसार्धशतकम् | १५० | २८४-२९६ |
| २६. परिशिष्ठ-१ | | १-८ |


संपूर्ण श्लोक संख्या - २७९८

संपूर्ण पृष्ठ संख्या - ८ +२९४ + ८


| | | |
|---|---|---|
| (२६. योगशतकम् (भाग-३) | १०० | २५७-२६५ |
| २७. प्रतिमाशतकम् (भाग-४) | १०४ | २६९-२८६) |

स्वामिसमन्तभद्राचार्यविरचितम्

# ।। जिनशतकम् ।।

श्रीमज्जिनपदाभ्याशं प्रतिपद्यागसां जये ।
कामस्थानप्रदानेशं स्तुतिविद्यां प्रसाधये ॥ १ ॥

स्नातस्वमलगम्भीरं जिनामितगुणार्णवम् ।
पूतश्रीमज्जगत्सारं जना ! यात क्षणाच्छिवम् ॥ २ ॥

धिया ये श्रितयेतार्त्या यानुपायान्वरानतः ।
ये पापा यातपारा ये श्रियायातानतन्वत ॥ ३ ॥

आसते सततं ये च सति पुर्वक्षयालये ।
ते पुण्यदा रतायातं सर्वदा माभिरक्षत ॥ ४ ॥

नतपीलासनाशोक सुमनोवर्षभासितः ।
भामण्डलासनाशोकसुमनोवर्षभासितः ॥ ५ ॥

दिव्यैर्ध्वनिसितच्छत्रचामरैर्दुन्दुभिस्वनैः ।
दिव्यैर्विनिर्मितस्तोत्रश्रमदर्दुरिभिर्जनैः ॥ ६ ॥

यतः श्रितोपि कान्ताभिर्दृष्टा गुरुतया स्ववान् ।
वीतचेतोविकाराभिः स्रष्टा चारुधियां भवान् ॥ ७ ॥

विश्वमेको रुचामाको व्यापो येनार्य्य वर्त्तते ।
शश्वल्लोकोपि चालोको द्वीपो ज्ञानार्णवस्य ते ॥ ८ ॥

श्रितः श्रेयोप्युदासीने यत्त्वय्येवाश्नुते परः ।
क्षतं भूयो मदाहाने तत्त्वमेवार्चितेश्वरः ॥ ९ ॥

भासते विभुतास्तोना ना स्तोता भुवि ते सभाः ।
याः श्रिताः स्तुत गीत्या नु नुत्या गीतस्तुताः श्रिया ॥ १० ॥

स्वयं शामयितुं नाशं विदित्वा सन्नतस्तु ते ।
चिराय भवते पीड्यमहोरुगुरवेऽशुचे ॥ ११ ॥

स्वयं शमयितुं नाशं विदित्वा सन्नतः स्तुते ।
चिराय भवतेपीड्य महोरुगुरवे शुचे ॥ १२ ॥

ततोतिता तु तेतीतस्तोतृतोतीतितोतृतः ।
ततोऽतातिततोतोते ततता ते ततोततः ॥ १३ ॥

येयायायाययेयाय नानानूनाननानन ।
ममाममाममामामितातततीतिततीतितः ॥ १४ ॥

गायतो महिमायते गा यतो महिमाय ते ।
पद्मया स हि तायते पद्मयासहितायते ॥ १५ ॥

सदक्षराजराजित प्रभो दयस्व वर्द्धनः ।
सतां तमो हरन् जयन् महो दयापराजितः ॥ १६ ॥

सदक्षराजराजित प्रभोदय स्ववर्द्धनः ।
स तान्तमोह रञ्जयन् महोदयापराजितः ॥ १७ ॥

नचेनो न च रागादिचेष्टा वा यस्य पापगा ।
नो वामैः श्रीयतेपारा नयश्रीर्भुवि यस्य च ॥ १८ ॥

पूतस्वनवमाचारं तन्वायातं भयाद्रुचा ।
स्वया वामेश पाया मा नतमेकार्च्च्य शंभव ॥ १९ ॥

धाम स्वयममेयात्मा मतयादभ्रया श्रिया ।
स्वया जिन विधेया मे यदनन्तमविभ्रम ॥ २० ॥

अतमः स्वनतारक्षी तमोहा वन्दनेश्वरः ।
महाश्रीमानजो नेता स्वव मामभिनन्दन ॥ २१ ॥

नन्द्यनन्तर्द्ध्यनन्तेन नन्तेनस्तेभिनन्दन ।
नन्दनर्द्धिरनम्रो न नम्रो नष्टोभिनन्द्य न ॥ २२ ॥

नन्दनश्रीर्जिन त्वा न नत्वा नर्द्ध्या स्वनन्दि न ।
नन्दिनस्ते विनन्ता न नन्तानन्तोभिनन्दन ॥ २३ ॥

नन्दनं त्वाप्यनष्टो न नष्टो नत्वाभिनन्दन ।
नन्दनस्वर नत्वेन नत्वेनः स्यन्न नन्दनः ॥ २४ ॥

देहिनो जयिनः श्रेयः सदातः सुमते हितः ।
देहि नोजयिनः श्रेयः स दातः सुमतेहितः ॥ २५ ॥

वरगौरतनुं देवं वन्दे नु त्वाक्षयार्ज्जव ।
वर्जयार्त्तिं त्वामार्याव वर्यामानोरुगौरव ॥ २६ ॥

अपापापदमेयश्रीपादपद्म प्रभोऽर्दय ।
पापमप्रतिमाभो मे पद्मप्रभ मतिप्रद ॥ २७ ॥

वन्दे चारुरुचां देव भो वियाततया विभो ।
त्वामजेय यजे मत्वा तमितान्तं ततामित ॥ २८ ॥

स्तुवाने कोपने चैव समानो यन्न पावकः ।
भवान्नैकोपि नेतेव त्वमाश्रेयः सुपार्श्वकः ॥ २९ ॥

चन्द्रप्रभो दयोजेयो विचित्रेऽभात् कुमण्डले ।
रुन्द्रशोभोक्षयोमेयो रुचिरे भानुमण्डले ॥ ३० ॥

प्रकाशयन् खमुद्भूतस्त्वमुद्धांककलालयः ।
विकासयन् समुद्भूतः कुमुदं कमलाप्रियः ॥ ३१ ॥

धाम त्विषां तिरोधानविकलो विमलोक्षयः ।
त्वमदोषाकरोस्तोनः सकलो विपुलोदयः ॥ ३२ ॥

यत्तु खेदकरं ध्वान्तं सहस्रगुरपारयन् ।
भेत्तुं तदन्तरत्यन्तं सहसे गुरु पारयन् ॥ ३३ ॥

खलोलूकस्य गोव्रातस्तमस्ताप्यति भास्वतः ।
कालोविकलगोघातः समयोप्यस्य भास्वतः ॥ ३४ ॥

लोकत्रयमहामेयकमलाकरभास्वते ।
एकप्रियसहायाय नम एकस्वभाव ते ॥ ३५ ॥

चारुश्रीशुभदौ नौमि रुचा वृद्धौ प्रपावनौ ।
श्रीवृद्धौतौ शिवौ पादौ शुद्धौ तव शशिप्रभ ॥ ३६ ॥

शसंनाय कनिष्ठायाश्चेष्टाया यत्र देहिनः ।
नयेनाशंसितं श्रेयः सद्यः सन्नज राजितः ॥ ३७ ॥

शं स नायक निष्ठायाश्चेष्टायायत्र देहि नः ।
न येनाशं सितं श्रेयः सद्यः सन्नजराजितः ॥ ३८ ॥

शोकक्षयकृदव्याधे पुष्पदन्त स्ववत्पते ।
लोकत्रयमिदं बोधे गोपदं तव वर्त्तते ॥ ३९ ॥

लोकस्य धीर ते बाढं रुचयेपि जुषे मतम् ।
नो कस्मै धीमते लीढं रोचतेपि द्विषेमृतम् ॥ ४० ॥

एतच्चित्रं क्षितेरेव घातकोपि प्रपादकः ।
भूतनेत्र पतेस्यैव शीतलोपि च पावकः ॥ ४१ ॥

काममेत्य जगत्सारं जनाः स्नात महोनिधिम् ।
विमलात्यन्तगम्भीरं जिनामृतमहोदधिम् ॥ ४२ ॥

हरतीज्याहिता तान्तिं रक्षार्थायस्य नेदिता ।
तीर्थादे श्रेयसे नेताऽज्यायः श्रेयस्ययस्य हि ॥ ४३ ॥

अविवेको न वा जातु विभूषापन्मनोरुजा ।
वेषा मायाज वैनो वा कोपयागश्च जन्म न ॥ ४४ ॥

आलोक्य चारु लावण्यं पदाल्लातुमिवोर्जितम् ।
त्रिलोकी चाखिला पुण्यं मुदा दातुं ध्रुवोदितम् ॥ ४५ ॥

अपराग समाश्रेयन्ननाम यमितोभियम् ।
विदार्य सहितावार्य समुत्सन्नज वाजितः ॥ ४६ ॥

अपराग स मा श्रेयन्ननामयमितोभियम् ।
विदार्यसहितावार्य समुत्सन्नजवाजितः ॥ ४७ ॥

अभिषिक्तः सुरैर्लोकैस्त्रिभिर्भक्तः परैर्न कैः ।
वासुपूज्य मयीशेशस्त्वं सुपूज्यः क ईदृशः ॥ ४८ ॥

चार्वस्यैव क्रमेजस्य तुङ्गः सायो नमन्नभात् ।
सर्वतो वक्त्रमेकास्यमङ्गं छायोनमप्यभात् ॥ ४९ ॥

क्रमतामक्रमं क्षेमं धीमतामर्च्यमश्रमम् ।
श्रीमद्विमलमर्चेमं वामकामं नम क्षमम् ॥ ५० ॥

ततोमृतिमतामीमं तमितामतिमुत्तमः ।
मतोमातातिता तोत्तुं तमितामतिमुत्तमः ॥ ५१ ॥

नेतानतनुतेनेनोनितान्तं नाततो नुतात् ।
नेता न तनुते नेनो नितान्तं ना ततो नुतात् ॥ ५२ ॥

नयमानक्षमामान न मामार्यार्त्तिनाशन ।
नशनादस्य नो येन नये नोरोरिमाय न ॥ ५३ ॥

वर्णभार्यातिनन्द्याव वन्द्यानन्त सदारव ।
वरदातिनतार्य्याव वर्य्यातान्तसमार्णव ॥ ५४ ॥

नुन्नानृतोन्नतानन्त नूतानीतिनुतानन: ।
नतोनूनोनितान्तं ते नेतातान्ते निनौति ना ॥ ५५ ॥

त्वमवाध दमेनर्द्ध मत धर्मप्र गोधन ।
वाधस्वाशमनागो मे धर्म शर्मतमप्रद ॥ ५६ ॥

नतपाल महाराज गीत्यानुत ममाक्षर ।
रक्ष मामतनुत्यागी जराहा मलपातन ॥ ५७ ॥

मानसादर्शसंक्रान्तं सेवे ते रूपमद्भुतम् ।
जिनस्योदयि सत्त्वान्तं स्तुवे चारूढमच्युतम् ॥ ५८ ॥

यतः कोपि गुणानुक्त्या नावाब्धीनपि पारयेत् ।
न तथापि क्षणाद्भक्त्या तवात्मानं तु पावयेत् ॥ ५९ ॥

रुचं बिभर्ति ना धीरं नाथातिस्पष्टवेदनः ।
वचस्ते भजनात्सारं यथायः स्पर्शवेदिनः ॥ ६० ॥

प्राप्य सर्वार्थसिद्धिं गां कल्याणेतः स्ववानतः ।
अप्यपूर्वार्थसिद्ध्येगां कल्याकृत भवान् युतः ॥ ६१ ॥

भवत्येव धरा मान्या सूद्यातीति न विस्मये ।
देवदेव पुरा धन्या प्रोद्याम्यति भुवि श्रिये ॥ ६२ ॥

एतच्चित्रं पुरो धीर स्नपितो मन्दरे शरैः ।
जातमात्रः स्थिरोदार क्वापि त्वममरेश्वरैः ॥ ६३ ॥

तिरीटघटनिष्ठ्यूतं हारीन्द्रौघविनिर्मितम् ।
पदे स्नातः स्म गोक्षीरं तदेडित भगोश्चिरम् ॥ ६४ ॥

कुत एतो नु सन् वर्णो मेरोस्तेपि च संगतेः ।
उत क्रीतोथ संकीर्णो गुरोरपि तु संमतेः ॥ ६५ ॥

हृदि येन धृतोसीनः स दिव्यो न कुतो जनः ।
त्वयारूढो यतो मेरुः श्रिया रूढो मतो गुरुः ॥ ६६ ॥

चक्रपाणेर्दिशामूढा भवतो गुणमन्दरम् ।
के क्रमेणेदृशा रूढाः स्तुवन्तो गुरुमक्षरम् ॥ ६७ ॥

त्रिलोकीमन्वशास्सङ्गं हित्वा गामपि दीक्षितः ।
त्वं लोभमप्यशान्त्यङ्गं जित्वा श्रीमद्विदीशितः ॥ ६८ ॥

केवलाङ्गसमाश्लेषबलाढ्य महिमाधरम् ।
तव चाङ्गं क्षमाभूषलीलाधाम शमाधरम् ॥ ६९ ॥

त्रयो लोकाः स्थिताः स्वैरं योजनेधिष्ठिते त्वया ।
भूयोन्तिकाः श्रितास्तेरं राजन्तेधिपते श्रिया ॥ ७० ॥

परान् पातुस्तवाधीशो बुधदेव भियोषिताः ।
दूराद्धातुमिवानीशो निधयोवज्ञयोज्झिताः ॥ ७१ ॥

समस्तपतिभावस्ते समस्तपति तद्द्विषः ।
संगतोहीन भावेन संगतो हि न भास्वतः ॥ ७२ ॥

नयसत्त्वर्त्तवः सर्वे गव्यन्ये चाप्यसंगताः ।
श्रियस्ते त्वयुवन् सर्वे दिव्यर्द्ध्या चावसंभृताः ॥ ७३ ॥

तावदास्स्व त्वमारूढो भूरिभूतिपरम्परः ।
केवलं स्वयमारूढो हरिर्भाति निरम्बरः ॥ ७४ ॥

नागसे त इनाजेय कामोद्यन्महिमार्द्दिने ।
जगत्त्रितयनाथाय नमो जन्मप्रमाथिने ॥ ७५ ॥

रोगपातविनाशाय तमोनुन्महिमायिने ।
योगख्यातजनार्चाय श्रमोच्छिन्मन्दिमासिने ॥ ७६ ॥

रोगपातविनाशाय तमोनुन्महिमायिने ।
योगख्यातजनार्चायः श्रमोच्छिन्मन्दिमासिने ॥ ७७ ॥

प्रयत्येमान् स्तवान् वश्मि प्रास्तश्रान्ताकृशार्त्तये ।
नयप्रमाणवाग्रश्मिध्वस्तध्वान्ताय शान्तये ॥ ७८ ॥

स्वसमान समानन्द्या भासमान स मानघ ।
ध्वंसमानसमानस्तत्रासमानसमानतम् ॥ ७९ ॥

सिद्धस्त्वमिह संस्थानं लोकाग्रमगमः सताम् ।
प्रोद्धर्त्तुमिव सन्तानं शोकाब्धौ मग्नमङ्क्ष्यताम् ॥ ८० ॥

कुन्थवे सुमृजाय ते नम्रयूनरुजायते ।
ना महीष्वनिजायते सिद्धये दिवि जायते ॥ ८१ ॥

यो लोके त्वा नतः सोतिहीनोप्यतिगुरुर्यतः ।
बालोपि त्वा श्रितं नौति को नो नीतिपुरुः कुतः ॥ ८२ ॥

नतयात विदामीश शमी दावितयातन ।
रजसामन्त सन् देव वन्देसन्तमसाजर ॥ ८३ ॥

पारावाररवारापारा क्षमाक्ष क्षमाक्षरा ।
वामानाममनामावारक्ष मर्द्धर्द्धमक्षर ॥ ८४ ॥

वीरावारर वारावी वररोरुरुरोरव ।
वीरावाररवारावी वारिवारिरि वारि वा ॥ ८५ ॥

रक्ष माक्षर वामेश शमी चारुरुचानुतः ।
भो विभोनशनाजोरुनम्रेन विजरामय ॥ ८६ ॥

यमराज विनम्रेन रुजोनाशन भो विभो ।
तनु चारुरुचामीश शमेवारक्ष माक्षर ॥ ८७ ॥

नय मा स्वर्य वामेश शमेवार्य स्वमाय न ।
दमराजर्त्तवादेन नदेवार्त्तजरामद ॥ ८८ ॥

वीरं मा रक्ष रक्षार परश्रीरदर स्थिरं ।
धीरधीरजरः शूर वरसारर्द्धिरक्षर ॥ ८९ ॥

आस यो नतजातीर्य्यां सदा मत्वा स्तुते कृती ।
यो महामतगोतेजा नत्वा मल्लिमितः स्तुत ॥ ९० ॥

ग्लानं चैनश्च नः स्येन हानहीन घनं जिन ।
अनन्तानशन ज्ञानस्थानस्थानतनन्दन ॥ ९१ ॥

पावनाजितगोतेजो वर नानाव्रताक्षते ।
नानाश्चर्य सुवीतागो जिनार्य मुनिसुव्रत ॥ ९२ ॥

नमेमान नमामेनमानमाननमानमा ।
मनामोनु नुमोनामनमनोमम नो मन ॥ ९३ ॥

न मे माननमामेन मानमाननमानमा ।
मनामो नु नु मोनामनमनोम मनोमन ॥ ९४ ॥

नर्दयाभर्त्तवागोद्य द्य गोवार्त्तभयार्दन ।
तमिता नयजोतानुनुताजेय नतामित ॥ ९५ ॥

हतभीः स्वय मेध्याशु शं ते दातः श्रिया तनु ।
नुतया श्रित दान्तेश शुद्ध्यामेय स्वभीत ह ॥ ९६ ॥

मानोनानामनूनानां मुनीनां मानिनामिनम् ।
मनूनामनुनौमीमं नेमिनामानमानमन् ॥ ९७ ॥

तनुतात्सद्यशोमेय शमेवार्य्यवरो गुरु ।
रुगुरो वर्य्य वामेश यमेशोद्यत्सतानुत ॥ ९८ ॥

जयतस्तव पार्श्वस्य श्रीमद्भर्तुः पदद्वयम् ।
क्षयं दुस्तरपापस्य क्षमं कर्तुं ददज्जयम् ॥ ९९ ॥

तमोत्तु ममतातीत ममोत्तममताामृत ।
ततामितमते तातमतातीतमृतेमित ॥ १०० ॥

स्वचित्तपटयालिख्य जिनं चारु भजत्ययम् ।
शुचिरूपतया मुख्यमिनं पुरुनिजश्रियम् ॥ १०१ ॥

धीमत्सुवन्द्यमान्याय कामोद्वामितवित्तृषे ।
श्रीमते वर्धमानाय नमो नमितविद्विषे ॥ १०२ ॥

वामदेव क्षमाजेय धामोद्यमितविज्जुषे ।
श्रीमते वर्धमानाय नमोन मितविद्विषे ॥ १०३ ॥

समस्तवस्तुमानाय तमोघ्नेऽमितवित्त्विषे ।
श्रीमते वर्धमानाय नमोन मितविद्विषे ॥ १०४ ॥

प्रज्ञायां तन्वृतं गत्वा स्वालोकं गोर्विदास्यते ।
यज्ज्ञानान्तर्गतं भूत्वा त्रैलोक्यं गोष्पदायते ॥ १०५ ॥

को विदो भवतोपीड्यः सुरानतनुतान्तरम् ।
शं सते साध्वसंसारं स्वमुद्यच्छन्नपीडितम् ॥ १०६ ॥

कोविदो भवतोपीड्यः सुरानत नुतान्तरम् ।
शंसते साध्वसं सारं स्वमुद्यच्छन्नपीडितम् ॥ १०७ ॥

अभीत्यावर्द्ध मानेनः श्रेयो रुगरु संजयन् ।
अभीत्या वर्धमानेन श्रेयोरुगुरु संजयन् ॥ १०८ ॥

नानानन्तनुतान्त तान्तितनिनुन्नुन्नान्त नुन्नानृत
नूतीनेन नितान्ततानितनुते नेतोन्नतानां ततः ।
नुन्नातीतितनून्नतिं नितनुतान्नीतिं निनूतातनु-
न्तान्तानीतितितान्नुतानन नतान्नो नूतनैनोत्तु नो ॥ १०९ ॥

वन्दारुप्रबलाजवंजवभंयप्रध्वंसिगोप्राभव
वर्द्धिष्णो विलसद्गुणार्णव जगन्निर्वाणहेतो शिव ।
वन्दीभूतसमस्तदेव वरद प्राज्ञैकदक्षस्तव
वन्दे त्वावनतो वरं भवभिदं वर्यैकवन्द्याभव ॥ ११० ॥

नष्टाज्ञान मलोन शासनगुरो नम्रं जनं पानिन
नष्टग्लान सुमान पावन रिपूनप्यालुनन् भासन ।
नत्येकेन रुजोन सज्जनपते नन्दन्ननन्तावन
नन्तॄन् हानविहीनधामनयनो नः स्तात्पुनन् सज्जिन ॥ १११ ॥

रम्यापारगुणारजस्सुरवरैरर्च्याक्षर श्रीधर
रत्यूनारतिदूर भासुर सुगीरर्य्योत्तरर्द्धीश्वर ।
रक्तान् क्रूरकठोरदुर्द्धररुजोरक्षन् शरण्याजर
रक्षाधीर सुधीर विद्वर गुरो रक्तं चिरं मा स्थिर ॥ ११२ ॥

प्रज्ञा सा स्मरतीति या तव शिरस्तद्यन्नतं ते पदे
जन्मादः सफलं परं भवभिदी यन्नाश्रिते ते पदे ।
माङ्गल्यं च स यो रतस्तव मते गीःसैव या त्वा स्तुते
ते ज्ञा ये प्रणता जनाःक्रमयुगे देवाधिदेवस्य ते ॥ ११३ ॥

सुश्रद्धा मम ते मते स्मृतिरपि त्वय्यर्च्चनं चापि ते
हस्तावञ्जलये कथाश्रुतिरतः कर्णोऽक्षि संप्रेक्षते ।

सुस्तुत्यां व्यसनं शिरो नतिपरं सेवेदृशी येन ते
तेजस्वी सुजनोहमेव सुकृती तेनैव तेजःपते ॥ ११४ ॥

जन्मारण्यशिखी स्तवः स्मृतिरपि क्लेशाम्बुधेर्नौः पदे
भक्तानां परमौ निधी प्रतिकृतिः सर्वार्थसिद्धिः परा ।
वन्दीभूतवतोपि नोन्नतिहतिर्नन्तुश्च येषां मुदा
दातारो जयिनो भवन्तु वरदा देवेश्वरास्ते सदा ॥ ११५ ॥

गत्वैकस्तुतमेव वासमधुना तं येच्युतं स्वीशते
यन्नत्येति सुशर्म पूर्णमधिकां शान्तिं वृजित्वाध्वना
यद्भक्त्या शमिताकृशाघमरुजं तिष्ठेज्जनः स्वालये
ये सद्रोगकदायतीव यजते ते मे जिनाः सुश्रिये ॥ ११६ ॥

श्रीजम्बूगुरुविरचितम्

## ॥ जिनशतकम् ॥

श्रीमद्भिः स्वैर्महोभिर्भुवनमविभुवत्तापयत्येष शश्व-
त्सत्स्वप्यस्मादृशेषु प्रभुषु किमिति सन्मन्युनेवोपरक्ताः ।
सूर्यं वीर्यादहार्यादभिभवितुमिवाभीशवो यस्य दीप्राः
प्रोत्सर्पन्त्यङ्घ्रियुग्मप्रभवनखभुवः स श्रिये स्ताज्जिनो वः ॥ १ ॥

संसारापारनीरेश्वरगुरुनिरयाशर्मपङ्कौघमग्ना-
नुद्धर्तुं सत्त्वसार्थानिव नखजमृजाजीर्णरज्जूर्यदीयाः ।
पादाः प्रासीसरन्तः प्रकटितकरुणाः प्रार्थितार्थान्समर्था
भर्तुं तीर्थाधिपोऽसौ पृथुदवथुपथप्रस्थितिं वो रुणद्धु ॥ २ ॥

प्रोद्यद्दीप्रप्रभाढ्यक्रमनखमुकुरक्रोडसंक्रान्तबिम्बं
वक्त्रं वृत्तस्य शत्रुः स्वकमधिकरुचिं बिभ्रदभ्रान्तचेताः ।
पश्यञ्शीतांशुकान्तं प्रणतिकरणतो न व्यरंसीत्प्रमोदा-
द्यस्यासौ श्रीजिनेन्द्रो द्रुतमतनुतमस्तानवं वस्तनोतु ॥ ३ ॥

मार्तण्डश्चण्डभावं दधदहनि हिनस्त्यस्तदोषोऽपि पादै-
र्बध्नात्यह्नाय रात्रौ पुनरलिपटलैरारटन्तीं रटद्भिः ।
मामम्भोजन्मधाम्नि स्थिततनुलतिकामेवमालोच्य लक्ष्मी-
रुद्विग्नेवापविघ्नं क्रमकजमगमद्यस्य सोऽव्याज्जिनो वः ॥ ४ ॥

निर्विघ्नान्विघ्ननिघ्नानतिघनघृणया श्लाघ्यघोषानघोषा-
न्घोराघौघैरनुद्धापघनसुघट्टिताञ्शीघ्रमुद्धाङ्घ्रिपाणीन् ।
अर्घोपघ्नाननर्घान्घटयति लघिमालिङ्गितान्वोऽलघिष्ठा-
ञ्श्लाघ्यं यस्याङ्घ्रियुग्मं विघटयतु घनं सोऽघसंघातमर्हन् ॥ ५ ॥

रक्तस्त्यक्तस्मरोऽपि प्रतिभयभयकृन्निर्भयत्वप्रदोऽपि
प्रायश्चित्तग्रहीता सततनिरतिचारोऽपि यत्पादपद्मः ।
वैकुण्ठाभ्यर्चितोऽपि प्रकटमपचितः पण्डितैः खण्डितांहा-
स्तन्यादन्याय्यवृत्तिव्यपगमगुरुतां वः स निर्ग्रन्थनाथः ॥ ६ ॥

स्वान्तारण्यं शरण्याश्रयणमिति यदध्यास्त विध्वस्तशङ्क-
स्तद्धर्मध्यानधूमध्वजजवजनितात्यन्तसंतापतप्तम् ।
संत्यज्यासह्यदाहादिव चरणसरोऽशिश्रियत्सत्सरोजं
यस्यातिप्रौढरागद्विरद उरुरजः सोऽस्यतात्तीर्थपो वः ॥ ७ ॥

जङ्घोद्यत्स्कन्धबुध्नोद्गतलसदरुणाभाङ्गुलीपल्लवाढ्या-
न्प्रेङ्खन्तीभिर्नखार्चिर्निचयरुचिरसन्मञ्जरीभिर्युतान्वः ।
प्रेक्ष्य प्राप्तेप्सितार्थैर्भुवि बलवदवाक्कल्पवृक्षाः किमेवं
विद्वद्भिः शङ्क्यतेऽङ्घ्रीनतुलफलयुजो यस्य सोऽर्हन्मुदेऽस्तु ॥ ८ ॥

क्षोणीं क्षान्त्या क्षिपन्तः क्षणिकरतिकरस्त्रीकटाक्षाक्षताक्षा
मोक्षक्षेत्राभिकाङ्क्षाः क्षपितशुभशताक्षेमविक्षेपदक्षाः ।
अक्षोभाः क्षीणरूक्षाक्षरपटुवचनाभिक्षवो मङ्क्ष्वलक्ष्मीं
साक्षाद्वीक्ष्य क्षिपन्ति क्षपयतु स जिनः क्षय्यपक्षं यदङ्घ्री ॥ ९ ॥

तन्वाना वैमतेयश्रियमहितवृषोत्कर्षमोषिप्रतापाः
कामं कौमोदकीनाशरणशरणदा नीरजोदाररागाः ।
सद्यः प्रद्युम्नयुक्ताः सदसिकृतमुदो यत्क्रमाश्चक्रिणो वा
भ्राजन्ते भ्राजिताशाः सुखमखिलमसौ श्रीजिनो वो विधेयात् ॥ १० ॥

यत्पादौ पादपौ वा शुचिरुचिनिचिताम्भोजपुञ्जालवालौ
स्वःसन्मूर्धाधिरूढोद्भटमुकुटकुटैर्निर्यदंशूदभारैः ।
संसिक्तौ शोणरत्नप्रतिमनखरुचः सत्प्रवालावलीव-
द्धत्तः शुद्धिं विधेयादधिकमधिपतिः श्रीजिनानामसौ वः ॥ ११ ॥

द्यां द्युत्योद्योत्य मुद्यद्द्युसदधिपमता विद्युदुद्द्योतजेत्र्या-
विद्यानद्याद्यसद्योनय उपदधते सद्यमोद्यानमोदम् ।
दुर्भेद्यावद्यमुद्यद्द्युमणिमिव समाच्छाद्य नन्द्याभिवन्द्याः
सद्यो यत्पादकन्दा द्यतु स जिनपतिर्वोऽतिनिन्द्यामविद्याम् ॥ १२ ॥

निर्वाणापूर्वदेशप्रगमकृतधियां शुद्धबुद्ध्यध्वगानां
मार्गाचिख्यासयैषा त्रिभुवनविभुना प्रेषिता किं नु लोकैः ।
आलोक्यारेकितैवं चरणनखभवा वो विभाविर्भवन्ती
यस्य श्रेयांसि स श्रीजिनपतिरपतिः पाप्मभाजां विदध्यात् ॥ १३ ॥

शोभामम्भोरुहाणामपहरति करोत्युद्भवं कौशिकस्या-
नुष्णैः पुष्णाति पादैः कुमुदमसुमतां नोपतापाय दृष्टेः ।
प्राज्याजेयप्रतापं सततमिनतया युक्तमप्यन्यरूपं
युग्मं यत्पादयोः स्तात्स भवदविभवाभावकृत्तीर्थनाथः ॥ १४ ॥

दूरे दूरेपसो वो वसतिमसुभृतां साधयन्तौ धयन्तौ
वारी वारीतिमङ्घ्री नतससुरमहादेवराजौ वराजौ ।
यस्यायस्यासिहेतू जयमुपनयतो मोहितानां हितानां
दध्यादध्यामतेजाः स भुवि जिनवरोऽनन्तमोदं तमोदम् ॥ १५ ॥

कृत्वाधः पादयोर्मां निरतिशयशमश्रीसमालिङ्गिताङ्गः
स्वस्थस्तिष्ठत्यनिष्ठः कथमयमधुनेतीव संचिन्त्य सृष्टा ।
ऊर्ध्वं बाणाशनिर्वा मृदुहृदयभिदे भाति रागेण गाढं
यस्य प्रेङ्खन्नखालीद्युतिरतनुरतिं रातु स श्रीजिनो वः ॥ १६ ॥

चार्वाचारोक्तिचुञ्चुप्रवचनचतुराचार्यचक्रस्य चञ्च-
न्नोच्चेताचण्डरोचीरुचिरुचिररुचिर्यस्य वाचां प्रपञ्चैः ।
उच्चैश्चञ्चूर्यमाणश्चरणगुणचयश्चारुचित्तार्चितार्च-
श्चेतःशौचं चिनोतूचितमचलमसौ चारुचेष्टो जिनो वः ॥ १७ ॥

पद्भ्यां भूभृद्गुरुभ्यां भ्रमति भृशमभीर्भ्रंशयन्हेलयायं
कोऽस्मन्मूर्धोद्धृतां गामिति फणिसमितेः सक्रुधः क्रोधवह्नेः ।
ज्वाला निर्यान्त्यधस्तात्किमिति सुजनता शङ्कते लोकयन्ती
भव्यानव्याद्भयेभ्यो निखिलमखरुचो यस्य योगीश्वरोऽसौ ॥ १८ ॥

प्रख्यातादच्युतश्रीवरवसतितया शेषकान्त्योपगूढा-
त्सन्मीनात्क्षीरनीरेश्वरत इव यदङ्घ्र्योर्युगान्निर्गता भा ।
वेलेव प्लावयन्ती नखमणिकिरणोन्मिश्रिता श्रीमदब्ज-
श्रेणीं विश्वंभरावद्भवदनभिमतं तीर्थपोऽसौ भिनत्तु ॥ १९ ॥

मा पप्तत्तप्त्यभावात्कलिकलिलभराक्रान्तमत्यन्तमेत-
त्पातालापारपङ्के त्रिभुवनभवनं द्रागितीवावधार्य ।
त्वष्ट्रावष्टम्भनार्थं प्रचुरभरसहौ निर्मिमाते यदङ्घ्री
वज्रस्तम्भाविवासौ निखिलसुखखनीर्वो विधत्तां यतीन्द्रः ॥ २० ॥

दुर्गे स्वर्गापवर्गाध्वनि सदरितया स्यन्दनः सस्यदाग-
स्तिग्मांशूत्तप्तजन्तून्प्रति वरविटपी छायया संयुतत्वात् ।
सद्भूत्याहूतिमन्त्रः सति धननिधने व्यक्तवर्णत्वतो वः
सिद्ध्यध्वन्यध्वनीनाववतु स मुनिपः पादपद्मो यदीयः ॥ २१ ॥

यत्पादैः पारिजातक्षितिरुहमहिमा हानिमानीयतेऽहि-
भ्रातृव्यायाप्ययोषाः प्रमदभरनमन्मस्तकस्त्रस्तदाम्नः ।
द्राग्भूयो भूषयद्भिः शुचिरुचिनखरुङ्मञ्जरीकर्णपूरैः
पापाकूपारवारिप्रतरणपटुतां तीर्थकृद्वः स दध्यात् ॥ २२ ॥

सर्वोर्वीभृत्प्रबर्हप्रणतिपरशिरःश्रेणिचूडामणिद्यु-
त्संदोहालीढमूढप्रदिम-नखमयूखोल्लसत्केसरालि ।
वल्ग्वङ्गुल्यग्रपत्रं सकमलममलं पादयुग्मं यदीयं
भात्यादित्योस्त्रमिश्रं नलिनमिव स वोऽवद्यमर्हन्हिनस्तु ॥ २३ ॥

प्राज्यप्रौढप्रमादप्रतिभटनिधनप्राप्तदीप्रप्रतापा-
न्प्रोच्चैः प्रीतिं प्रयान्ति प्रतिकलममलान्प्राणिनः प्रेक्षमाणाः ।
प्रत्ताप्रान्तप्रसादान्प्रणमदसुमतां यत्क्रमान्सत्प्रणम्या-
न्प्राणिप्राणप्रियाणि प्रवितरतु जिनः स प्रशान्तप्रयासम् ॥ २४ ॥

उज्जृम्भाम्भोजगर्भश्रितमिति परमेष्ठीयते निष्ठितार्थं
त्रैलोक्यत्रासहन्त्र्या नरकरिपुतयानन्तमूर्तीयते वः ।
सद्भूतिभ्राजितत्वाद् वृषभगतितया चाद्रिजेशायते यत्
पादाम्भोजं स सद्यो भवतु भवभयाभोगभित्केवलीशः ॥ २५ ॥

**इति जिनपादवर्णनं**

कोषाढ्येऽपि द्रढिम्ना विरहितमहिमन्युत्कटे कण्टकैर्मे
सक्ते व्यक्तं जडौघैः सुचिरमनुचितं सद्रजस्यत्र वस्तुम् ।
पद्मं पद्मा स्वसद्मेत्युदितविपदिव प्रोज्झ्य यत्रानुलिल्ये
छेका दानच्छलेन त्रिजगदधिपतेर्वः पुनीतात्स हस्तः ॥ २६ ॥

प्रध्वस्ताशर्मधर्मप्रणयनविधये व्यापृतः प्राणिपूगा-
न्कालव्यालावलुप्तौ प्रतिसमवसृतौ भ्रान्तिमन्तस्तनोति ।

यः संहर्तुं विषार्तिं किमयमिह चलत्येवमाखण्डलस्य
ख्यातं सौख्यं स दत्तां जिनवृषभनरेन्द्रस्य पाणिर्द्रुतं वः ॥ २७ ॥

भाभिर्योऽम्भोजशोभामभिभवति भृशं बिभ्रदुद्भूतभव्यं
भूषाभावं सभाया भवभवभयभिद्धूरिभीभारभाजाम् ।
भर्तुर्भद्रस्य पाणिस्त्रिभुवनभवनोद्भासनोद्भूतभूते-
र्भूयाद्भूत्यै स भूतेर्ऋभुविभुविभवाधीशभूभर्तृभाजः ॥ २८ ॥

कल्पान्तेऽनल्पभासः प्रलयमसुमतां यूयमुच्चैर्विघातं
कृत्वायुर्गोत्रनाम्नामपि कुरुत किल द्वादशैकत्वमेत्य ।
नित्यं पञ्चापि कुर्मो वयमिति हसितार्का इवोद्भ्रान्ति भासा
प्रज्ञसौ यन्नखाः स्तात्स शिवशतकरोऽर्हत्करः प्रोल्लसन्वः ॥ २९ ॥

गीर्वाणैर्निर्मितोर्वीरुहबहलदलश्यामलाभीशुजालै-
र्जीमूतैः प्रावृषेण्यैरिव नभसि सदस्यातते यः समन्तात् ।
विद्युत्पुञ्जायमानः स्फुरदरुणरुचा दृश्यते त्रैदशैर्व-
स्त्राणाय स्तात्स हस्तस्तनुरहितजितः साधु बोधोद्यतोऽद्य ॥ ३० ॥

चञ्चच्चक्रोऽप्यकृष्णो विबरयुततलोऽप्यस्तरन्ध्रानुषङ्गः
सत्कार्योऽप्यस्तकृत्यो विलसितकमलोऽप्यङ्ग दोषाकरो नो ।
*यः सार्वज्ञः सुपर्वा शय इति महिमापीक्ष्यते नो विरोधी*
वध्यात्स ध्यानवृद्धेर्निधनकरमरं वस्तु वः स्तूयमानः ॥ ३१ ॥

द्वारं व्यस्तार्गलं वः परमपदपुरो दर्शयाम्येत यूयं
श्रोतृञ्जन्तूनिवैवं गदितुमतिगुरुभ्राम्यतीतस्ततो यः ।
पर्षद्युत्कर्षवत्यां प्रवचनकरणानेहसि श्रीजिनस्य
*स्ताद्धस्तो वः प्रशस्तः प्रणिपतनकृतावादृतानां स वृद्ध्यै* ॥ ३२ ॥

वज्रिन्वज्रं समस्ति प्रकटतरमिदं मेऽपि मा गर्वितोऽभू-
र्यक्ष ! क्षिप्रं जहीहिं त्वमपि निधिमदं शङ्खपद्मौ यतः स्तः ।

अम्लानौ मय्यपीमाविति परिहसतीवोच्छलद्भिर्मयूखै-
र्व्याख्यायां यन्नखेभ्योऽखिलसुखकृदसावस्तु वो जैनहस्तः ॥ ३३ ॥

जेताजावूर्जितौजा विजयिजविगजभ्राजि सद्वाजिराज्यां
तेजोभाजां जजौर्जाविजितजनजितां स्वौजसा दुर्जनानाम् ।
योऽन्यब्जोऽजातजाड्यो जगति जिनशयो जम्भजित्पूजितौजा
अज्यायो जन्मबीजं जयतु सरजसौर्जित्यजित्सोऽञ्जसा वः ॥ ३४ ॥

भित्त्वा दोषानुषङ्गं जनवनजवनं बोधयामीद्धधाम्ना
मोत्कर्षं सूर्य कार्षीरिति मम पुरतो दर्पतो हन्त यत्तत् ।
साक्षाद्दोषं श्रितोऽपि श्रमणगणगुरोर्बोधयेऽहं महिम्ने-
तीव प्रेङ्खन्सदोऽन्तः प्रणिगदति करो यः स वो वामहास्तु ॥ ३५ ॥

स्निग्धं मूर्ध्नोऽलिनीलद्युतिकचनिचयं प्रोद्धरन्धैर्यराशे-
र्निर्मूलं लोकभर्तुश्चरणकृतमतेर्भाति यः पाणिपद्मः ।
अन्तर्वर्त्यर्तिकृत्किं शिति कलिलमिदं कर्षतीहैष एवं
देवैरारेक्यमाणो भवदशिवशताशर्म स स्राक् शृणातु ॥ ३६ ॥

दक्षं दीक्षां जिघृक्षोर्मदनशरनुदो देहतो दीप्रदीप्तीः
सत्स्वर्णालंकृतीर्यः सरससुमनसः कल्पवृक्षादिवोच्चैः ।
पाणिः प्रोत्तारयन्वः सरसिरुहरुचिः सन्नखांशुप्रसूनो
मालाकारायतेऽसौ स्यतु कुमतिमलं प्राणमत्कन्धराणाम् ॥ ३७ ॥

यः कालः शोणिमानं दधदपि निधने कल्मषस्योल्बणस्य
द्रष्टॄणां दृष्टमात्रःसरुगपि नितरां नीरुगात्माससक्तैः ।
लक्ष्मीदानेन तृष्णाच्छिदपि तनुमतामग्रहस्तोऽजडोऽसौ
मुष्याद्दोषानशेषान्कलुषितवपुषां वो विरुद्धात्मकोऽपि ॥ ३८ ॥

मय्यप्यस्मिन्स्मयारौ प्रभवति भुवने भूभृतः किं कराणां
पातैरुत्तापयन्ति क्षितिमितकि भवद्भूममावादिवालम् ।

रक्तः शक्त्या स्फुरन्वो निगडित इव यो भूषणालानकाले
व्याधेरव्यात्स पाणिः सदुपलवलयामुक्तितो मुक्तिभाजः ॥ ३९ ॥

मा भूदन्तःपुरस्त्रीकठिनकुचभिदाकारिणी रागभाक्त्वा-
त्सक्तैतस्मिन्नखाली स्मरविकृतिहृतः सर्वदास्येतकीव ।
मुद्राभिर्मुद्रितोऽलङ्करणविधिकृता वज्रिणार्हत्करो यः
सोऽहांस्यह्नाय हन्तुं प्रविहितविनतेर्भक्तिभाजो जनस्य ॥ ४० ॥

स्रष्टाजस्रं श्रियो यः शिवपुरपथिकासद्महानोचितायाः
कोषाधीशैर्निशान्ते नमुचिरिपुगिरासद्मह्न नो चितायाः ।
आनीयानीय नित्यं परमगुरुकरः पर्वशालीक्षयाय-
प्राप्तेर्हेतुः प्रधानो भवतु स भवतां पर्वशालीक्षयाय ॥ ४१ ॥

युक्ता यस्मिन्नृजिम्ना मसृणितपरुषोऽग्रेऽर्धचन्द्रायमाणा-
नङ्गुल्यः संदधानाः सघृणिनखमणीम्द्राघिमोद्धस्वरूपाः ।
पुष्पेषोर्निर्जितस्येषव इव विषमाः संगृहीता विभान्ति
क्षेपीयः पातकान्तं प्रजनयतु स वः पाणिरर्हद्ध्वजस्थः ॥ ४२ ॥

ब्रध्नेनापीद्धधाम्ना परिहृतमिदमालोक्य पातालमूलं
सव्यालत्वात्करालं तिमिरभरभृतं भीरुणेवेति यस्य ।
वीक्ष्यन्तेऽधो विविक्षन्त्य इव ननु भुवो भ्राजनार्थं नखाभाः
स्रस्तस्य ध्यानकाले दलयतु दुरितं वः स जैनेन्द्रपाणिः ॥ ४३ ॥

यो नानीतो जडिम्ना नयति न कुमुदं नन्दथुं दीप्यमानो
न ज्योतिर्ज्यानियुक्तोऽहनि मलिनतमं लक्ष्म धत्ते न मध्ये ।
सोल्लासं नो नदीनं जनयति लभते धाम दोषोदयान्नो
सोऽपूर्वो यन्नखेन्दुश्चरमतनुशयो योग्यतां वो युनक्तु ॥ ४४ ॥

अर्थव्यक्तिं विविक्तां विदधति बहवो यां करा न्हारिदश्वा
विश्वस्मिंस्तीव्ररूपाः प्रशममितवतैकाकिना सा मयापि ।

प्रोच्चैर्निष्पाद्यतेऽमुं स्मयमिव वहता धार्यते वैजयन्ती
येनासौ युष्मदाधेर्वधकरणपटुर्बुद्धसक्तः करोऽस्तु ॥ ४५ ॥

श्रद्धालोर्यो विधत्ते विविधबुधधृतीरेधयन्बोधवृद्ध्या
धैर्यं धामर्द्धिमिद्धां धनमपनिधनं शुद्धबुद्धिं धरित्रीम् ।
व्याधिध्वंसं पुरन्ध्रीर्जितविबुधवधूर्धर्मवृद्धेः समृद्धिं
धर्मोक्तौ वः स धत्तां धियमधिकधृतिं प्रोद्धृतो बौद्धहस्तः ॥ ४६ ॥

ज्येष्ठासक्तं सचित्रं गुरुमहिमपुनर्वस्वपोढात्मकं नो
नित्यं सत्कृत्तिकं यज्जनितवृषतुलं व्यक्तमीनं सकुम्भम् ।
व्योमेवाभाति किं तु प्रविरहितमलं शून्यवृत्त्यात्युदात्तं
छिन्द्यात्कृच्छ्राणि तद्वः सुमृदु करतलं निर्वृतेरीश्वरस्य ॥ ४७ ॥

दारिद्र्याद्रेर्महेन्द्रप्रहरणसमतां यो विभेदे बिभर्ति
प्राकाश्ये विश्ववेश्मोदरविवरगतस्यार्थजातस्य दीपः ।
हस्तालम्बोऽवलम्बो गुरुतरनरकागाधकूपप्रपाते
पातात्पातात्स हस्तस्तमसि तततमे वो विनेतुस्त्रिलोक्याः ॥ ४८ ॥

यः प्रोद्यद्विद्रुमद्युत्कररुहमणिमन्मस्तकाङ्गुल्यहीन्द्रः
सत्सत्त्वोऽपारिजातः पुनरसुरतनुः साधुमुक्ताफलश्रीः ।
चक्रे हस्तः समुद्रो दशशतनयनेनोन्मुदा मूर्ध्नि मेरोः
कृच्छ्रेच्छ्रायं छिनत्तु प्रतिहतसुषमं वः स जेतुः स्मरस्य ॥ ४९ ॥

सत्स्कन्धाबद्धमूलावृजितभुजलतालग्नमम्लानरूपं
बिभ्रद्बन्धूककान्तिं करतलमचलं पल्लवभ्रान्तिभाग्भिः ।
मौग्ध्यात्सारङ्गशावैर्वनगहनभुवि ध्यानवृत्तेर्विधातुः
सिद्धेर्लेलिह्यते यत्तदवतु पतनादापदन्तः सदा वः ॥ ५० ॥

इति जिनहस्तवर्णनं

मल्लक्ष्म्या क्षिप्तदीप्ति प्रलपदलिरवैर्वारिणीन्दीवरं वो
मङ्क्तुं शक्त्या वियुक्तं सदलमपि जये वाञ्छतीत्युच्छलच्छ्रि ।
हर्षोत्कर्षात्प्रफुल्लं किमिदमिति जनैः कल्प्यतेऽनल्पधीभि-
र्यच्चक्षुर्वीक्ष्यमाणं क्षणमहितहर्ति तत्तनोत्वाप्तवक्त्रम् ॥ ५१ ॥

भास्वान्भास्वानपि स्वैर्घृणिभिरनणुभिर्यत्तमोऽनुत्तमं नो
नेता नेतुं तनुत्वं तदतनिम मनो मोहयन्मानवानाम् ।
मुष्णद्धिष्ण्यं गुणानामगुणमपि मुखं खण्डितामूर्तिकीर्ते-
स्तथ्यं पथ्यं प्रथीयः प्रदिशतु दशनाभीशुभिः शोभितं वः ॥ ५२ ॥

यस्य स्यादन्तरात्मा कलितमलिनिमा चञ्चलश्च स्वभावा-
त्तुल्यर्द्धिं स्पर्धयान्यं क्रमत इति सहीतीव धात्रा व्यधायि ।
मर्यादार्थं यदन्तर्निहितनयनयोः सेतुबन्धायमानो
नासावंशो जिनास्यं दिशतु शमशनैः शाश्वतं तद्भवद्भ्यः ॥ ५३ ॥

सोत्कण्ठाः कण्ठपीठोल्लुठितजरठरुक्तारहाराभिरामा
बिभ्रत्योऽदभ्रमूर्तिस्तनभरमबलाः स्वर्भुवो याः समायुः ।
ध्यानध्वंसं विधातुं विकृतिमकृत यत्प्रत्युत प्रेक्ष्यमाणं
तास्वेवास्यं जिनस्य प्रणुदतु तदघं वः स्वरूपश्रियैव ॥ ५४ ॥

स्पष्टं जुष्टं ललाटं विकटतरमतिस्निग्धलम्बालकान्तैः
कान्तं शान्तं दृशां शं दिशदनुकुरुते दृश्यमानाङ्कपङ्कम् ।
यस्योद्यत्पार्वणैणाङ्कनशकलमलं तद्भवद्भाग्यपुष्टिं
द्वेष्टुर्दुष्टाष्टकर्मद्विष उपचिनुतादास्यमस्यत्तमांसि ॥ ५५ ॥

दर्पं कन्दर्पशत्रोष्टसिति भगवता भ्रंशयित्वा यदास्तं
क्रोधाद् द्वेधा विधायोद्धृतविततगुणं कार्मुकं तत्किमेतत् ।
आस्ते न्यस्तं लसद्भ्रूयुगलमिति नृभिर्भाव्यते यत्र वक्त्रं
तद्द्रष्टुर्विष्टपान्तर्गतनिखिलपदार्थाननर्थं हताद्वः ॥ ५६ ॥

यत्कान्त्या त्याजितश्रीः क्षितिपतिरिव सत्कोषपत्रोरुदण्डै-
राढ्योऽपि क्षीणदाढ्र्यो वसति वनभुवि व्रीडयेवाब्जखण्डः ।
तन्मौनीन्द्रं विनिद्रं स्फुरदधरदलं कण्ठनालोपलीनं
दृग्भृङ्गासङ्गि गुर्वी ग्लपयतु विपदं सन्मुखं युष्मदीयाम् ॥ ५७ ॥

शान्तं श्वेतांशुशोचिःशुचिदशनमशं स्यदृशां दृश्यमानं
विश्वक्लेशोपशान्तिं दिशदतिविशदश्लोकराशि प्रकाशम् ।
निःशेषश्रीनिशान्तं शरणमशरणे नाशिताशेषशङ्कं
दिश्याद्वः शोभिताशं शिवमुपशमिनामीशितुः शश्वदास्यम् ॥ ५८ ॥

दुष्टारिष्टानि दृष्टेऽप्यकृतविकृतिकान्येव निर्नामकानि
क्षीयन्ते दक्षमक्ष्णां प्रविकसनकृति प्राणियूथस्य यत्र ।
नैशानीवांशुमालिन्यलिकुलमलिनान्यन्धकाराणि बन्धो-
रूर्ध्वाधोमध्यलोकश्रितजनसमितेरास्यमस्यत्वघं तत् ॥ ५९ ॥

व्यालम्बालोलनीलालकजलदयुजो राजमानाद्भिमानी-
शुभ्रैर्दन्तैः सदन्तैर्वरविवरभृतः प्रस्फुरद्गण्डशैलात् ।
यस्माद् गौः शुद्धवर्णा प्रभवति सुमनोमानसं नन्दयन्ती
तज्जैनेन्द्रं हिमाद्रेरिव दिविजनदी वो नुदत्वास्यमेनः ॥ ६० ॥

दुर्बोधो दुर्विधैर्यः प्रवररदमणीन्धारयन्मध्यसंस्था-
नस्तश्रेष्ठौष्ठमुद्रो व्यसनशतशमप्रत्यलावाप्तिरुच्चैः ।
सुप्रापः प्रायशोऽस्मिञ्जिनवदननिधिर्बुद्धतत्त्वैः सुतत्त्वैः-
स्तत्त्वार्थं सत्वरं वस्त्वरयतु स गुरुर्बोद्धुमध्यामरूपम् ॥ ६१ ॥

किं बिम्बं पद्मबन्धोर्न हि दहनमहस्तन्मनाग्नेदमिन्दो-
स्तर्हि स्यात्सत्कलङ्कं तदपि न विकलं लाञ्छनेनैतदेवम् ।
दृष्ट्वा द्रेष्टुर्बलस्य प्रमुदितहृदयास्तर्कयन्तेऽतिमुग्धा
वध्वो मूर्ध्न्यद्रिभर्तुर्यदजितलपनं वस्तदेनस्तृणेद्ु ॥ ६२ ॥

मान्ये मान्येन कारि स्वदृगशुभतरात्रेतिकृष्णातिकृष्णा
चक्रे चक्रे दिशां यत्सिततरयशसि भ्रूलताग्लतारा ।
रक्षारक्षालिनीवेत्यवहितविधिना यत्र पापात्रपापा-
दव्यादव्यापदास्यं तदमरणगुरोर्वः सदन्तं सदन्तम् ॥ ६३ ॥

वक्षस्याधोक्षजे श्रीः परिवसति सदेतिप्रसिद्धिं वृथार्था-
मत्यर्थं भावयन्तोऽभिलषितविभवावासितः कल्पयन्ति ।
साक्षाल्लक्ष्मीरिहास्तेऽनवरतमिति यद्दर्शने याचकौघा-
स्तद्वक्त्रं वैतरागं गुरुगदगहनध्वंसनाद्वो धिनोतु ॥ ६४ ॥

श्रीमत्पौरन्दरं दृग्नलिनघनवनं वानमप्यन्यदीप्ति
प्रत्यक्षत्वेक्षणेन श्रवणपरिकरः स्वातिरक्तो बुधप्रीः ।
स्वाभिर्यो दीधितीभिः कुरुत इतितरामाचरन्नप्यचण्ड-
श्चण्डांशोः कर्म धर्माधिपलपनविधुर्वो विरुद्धं स वध्यात् ॥ ६५ ॥

सद्बाणं सालकान्तं शिशिरघनतरच्छायमन्तर्द्विजानां
राज्यापूर्णं सदन्तच्छदलसदसिकं काननं वाननं वः ।
संतप्तिं सप्तसप्तेरवविषमगतेरागसोऽतीव गुर्वी-
मुन्मूल्यान्मन्मथानुन्मथितमुनिगणप्रष्ठकण्ठस्थलस्थम् ॥ ६६ ॥

यद्यप्यन्तर्न धत्ते स्थितिमयममदो नस्तथाप्येष सेव्यो
भव्यत्वात्सर्वदोर्व्यां बहिरपि निरतैः पूर्वपृक्तेरितीव ।
लग्नो रागो गरीयस्यधरवरमणौ यत्र चित्रातिचण्ड-
त्रासात्संसारतो द्राङ् मृतिजननुदस्त्रायतां वस्तदास्यम् ॥ ६७ ॥

दैवान्मालिन्ययोगेऽप्यतिचपलतया योऽवदातानुयातः
पार्श्वस्थारक्तवर्णो भवति स लभते भूरिशोभां सुवृत्तः ।
स्थैर्यं लब्ध्वा समाधौ ब्रुवदिव युगलं तारयोर्लोचनान्त-
र्यत्रैवं राजते तन्मुखमुपशमयत्वार्हतं गर्हितं वः ॥ ६८ ॥

बाहुश्रुत्यं दधद्भिर्बहुधवलगुणः संगतो गीयते य-
त्स्यादर्थानर्थदर्शीत्यवितथमिव तत्कर्तुमालक्ष्यतेऽक्ष्णोः ।
कर्णाभ्यर्णोपसर्पि द्वितयमुपवहद् द्राघिमाणं यदीयं
योगीशस्याननं तच्छकलयतु कलां काश्मलीं हेलया वः ॥ ६९ ॥

राजीव त्वं निजर्द्ध्या जयसि बहुरजः सत्कथं कथ्यतां मा-
मृक्षेश क्षीयमाणस्त्वमपि किल मया स्पर्धसे सार्धमेवम् ।
सद्गन्धश्वासलुब्धभ्रमदलिपटलप्रोच्छलद्द्राणतो यद्
वक्तीव व्यक्तमक्तान्स्नपयतु रजसा वस्तदर्हन्मुखाब्जम् ॥ ७० ॥

यत्सौम्यत्वात्स्वकीयां क्षरदमृतरसां सौम्यतां न्यूनवृत्तिं
व्यालोक्यालोकिताशः कृशतनुरविशत्स्वश्रियोऽन्तर्द्धिमिच्छुः ।
स व्रीडत्वादिवेन्दुर्मृडविकटजटाजूटरौद्राटवी वो
यच्छत्वच्छिन्नवाञ्छं सुषममितमृतेराननं तन्मनोहृत् ॥ ७१ ॥

लावण्यार्णःप्रपूर्णं चलदृगनीमिषं राजहंसोपजीव्यं
भ्राम्यद्भ्रूयुग्मभङ्गं त्रिदशमुनिगणासेवनीयं प्रसन्नम् ।
सच्छङ्खं मानसाह्वं सर इव तरसा मानसस्यातनोति
प्रह्लत्तिं वीक्षितं यत्तदरिविहतये वः शमीशास्यमस्तु ॥ ७२ ॥

सेवां कर्तुं किमेतौ मिहिरहिमरुची पार्श्वयोरेतदात्त-
स्वश्रीलिप्साकुलाङ्गाविति मनसि सतां शेमुषी प्रादुरस्ति ।
निर्वर्ण्याकीर्णदीप्तिप्रतिहततमसी कुण्डले गण्डलग्ने
यत्सत्कर्णापिनद्धे नयतु शिवपदं तन्मुनीन्द्राननं वः ॥ ७३ ॥

अम्लानं मौलिमालोल्ललितकपिलरुग्धूलिलुब्धालिजालं
व्यालोलारालकालालकममलकलालाञ्छनं यद्विलोक्य ।
लेखाली लालितालं प्रबलबलकुलोन्मूलिना शैलराजे
प्रह्लन्ना लीलया वो दलयतु कलिलं लोलदृक्तज्जिनास्यम् ॥ ७४ ॥

यद्वन्नासत्ययुक्तः सुरवरदयिताख्यातिमांस्त्वं पवित्रो
गोभृद्गोत्रस्य हन्ता बलभिदहमपि त्वत्समानं तथैव ।
तस्माद्दर्पावलेपं जहिहि हरिमितीवाहसत्सस्मितैर्यत्
तद्वो द्वन्द्वानि विद्वद्वरगुरुवदनं सुप्रसन्नं पिनष्टु ॥ ७५ ॥

**इति जिनमुखवर्णनं**

ब्राह्मी ब्रह्माधिभर्तुः कृतरतिरसकृद्वैबुधानां विशुद्ध्या
गुर्वी भास्वत्सुवर्णावनरुचिखचिता चारुचामीकराद्रेः ।
चूडा वा रोचमाना दिवि दिवसपतेर्भानुसीमानमुच्चै-
रुल्लङ्घ्यालङ्घनीया बृहदवमवने वन्यवल्लीयतां वः ॥ ७६ ॥

इन्द्रैर्विद्राणनिद्रं श्रितविधि विबुधैः सार्थकं ऋक्षनाथैः
सिद्धैः साध्यार्थसिध्द्यौ धुतदितिदितिजैः साधुभिः साधितार्थम् ।
गन्धर्वैर्गीतगर्भं कृतकरमुकुलैः श्रूयमाणानणीयो
जैनी गौर्गौरवं वोऽतनुभुवनकुटीकोटरान्तःकरोतु ॥ ७७ ॥

या मन्दारैरशोकैः प्रविकचसुमनःशोभितैर्भिक्षुवृक्षै-
स्तुङ्गैर्नीरागमानैः सततमुपचिता भारती वैतरागी ।
स्वच्छायाच्छिन्नतापा विहितशुभफलालंकृतारामलेखा-
तुल्या कल्याणमाल्यैर्बहुभिरिह तनूर्भूषयत्वाशु सा वः ॥ ७८ ॥

यूथैर्या संयतानां सुदृढनियमनान्मोक्षमाकाङ्क्षमाणै-
र्गुप्तैः संसृत्यटव्याश्रयणगमनतःसंश्रितत्वादितीह ।
कारागारानुकाराप्यघनतरतमा निर्भया भ्रष्टबन्धा
साधीयोधीधनर्द्धेरतिसमधिकतां सा क्रियात्सिद्धगीर्वः ॥ ७९ ॥

संसारोदन्वदम्भस्यमितिमृतिमहोर्मिण्यगण्योद्भवौर्व-
द्युद्धीमे लोभकुम्भीनसविषमतले मज्जतो जन्तुराशीन् ।

प्रत्यप्रान्तप्रथिम्नि स्मरमकरवति ब्राह्म्यजिह्मस्वरूपा
निर्व्याजं नाव्यते या यतिपतिगदिता सा हताद्वो द्विषन्तम् ॥ ८० ॥

नाभीष्टं विष्टपान्तः प्रति चरमचरं प्राणिनं प्राणितव्या-
दन्यद्वस्त्वित्यवेत्य स्वमिव तदपि भो रक्षता क्षुद्रभावाः ।
भद्रं भोक्तुं विमुक्त्यां यदि मतिरिति याकर्ण्यते कर्णरन्ध्रैः
सा श्रीयोगीन्द्रगीर्वः प्रबलयतु बलं कालमल्लं विजेतुम् ॥ ८१ ॥

द्रव्यादेशेन नित्यं यदितरदपि तत्पर्ययादेशतोऽस्मि-
न्वस्त्वेवं यैकमेव प्रकटयति नयद्वन्द्वतो द्विप्रकारम् ।
कुग्राहोग्रग्रहास्यप्रपतिततनुभृत्स्तोममुन्मोचयन्ती
चेतोभूप्रच्युतिं वः सुमतियति पुरोगस्य सा वाग्विधेयात् ॥ ८२ ॥

निर्दोषा सन्निशीथाप्यवितथरचना सत्यहीनापि नित्यं
सद्गुप्तिर्मोक्षदापि श्रुतयममहिमाप्युन्नतासत्कृतान्ता ।
द्विष्टार्था सार्थकापि स्खलितपरमताप्युन्नतासत्तमाया-
मारोप्यात्सा पदव्यां प्रशमिपरिवृढब्राह्म्यलं वोऽविलम्बम् ॥ ८३ ॥

सत्या सत्यानताङ्गे तनुमति भविका सर्वदा सर्वदाग-
स्तानेऽस्तानेकशर्मण्यपि विनिपतिते स्तूयमानायमाना ।
नाशं नाशङ्कितार्था भवतु कविशतैः पूरिताशारिताशा
गौर्वा गौर्वामपङ्के मुनिपलपन्नभूर्वः सदावासदावा ॥ ८४ ॥

वाचो वोऽर्चामचिन्त्याचलचरणरुचेश्चूचुरन्मा चिराया-
त्युच्चैस्ताश्चोरयन्त्यो रुचिमतिशुचयो नीचवाक्तारकाणाम् ।
याश्चण्डाश्चण्डवर्चोरुच इव निचितं चित्तभूध्वान्तचित्या
सच्चेतोम्भोजचक्रं प्रचुररुचिचितं कुर्वते चित्रचाराः ॥ ८५ ॥

श्रोतृन्वृन्दारकादीन्प्रणिहितकरणानादराद्देशनायां
संसद्यासाद्य सद्यः परिणमति वचोऽर्हन्मुखान्निर्गतं सत् ।

तेषां भाषाविशेषैर्विषमिव विषदाद्भूविभागान्विभिन्नान्
खैः स्वैर्वर्णैः सुवर्णं यदनुगुणयतात्स्वश्रुतौ तन्मनो वः ॥ ८६ ॥

या वारिक्षीरयोर्वा प्रकृतिपुरुषयोः श्लिष्टयोस्त्रोटयन्ती
सम्बन्धं निर्विबन्धं ललितपदगती रामरामेव रम्या ।
सा वः शुक्लाभदेहा दहतु महदपि क्षुद्रपक्षद्रुमाणां
वृन्दं वृन्दारकादीश्वरसभसुरसीभूषणा वाग्जिनस्य ॥ ८७ ॥

गृध्नुत्वात्तत्त्वगन्धाधिगमविषयतः संपतद्भिः समुद्भिः
सद्भिः सद्भिर्द्विरेफैरिव मधुररवैश्चारुपक्षैः सुदक्षैः ।
यत्प्राप्य प्राप्यते शं स्वरिनकरिमदाम्भोवदासं वचो व-
स्तत्क्लेशाश्लेषशोषोपशमकृतिविधिं प्रत्यलंभूष्णु भूयात् ॥ ८८ ॥

नानावर्णैर्विचित्रा रुचिरगुणशतैः कल्पितानल्पशोभा
शुद्धाधिक्यान्महार्घा हृदि मुदमधिकं संदधाना ग्रहीतुः ।
शाटं वः सत्पटीवोत्कटकटुकफलाकार्यशीतस्य गौर्द्राक्
संपर्कात्कुर्वती श्रीसुखमतितनुतात्सा जितोत्सेकमूर्तेः ॥ ८९ ॥

प्रोत्खातासंख्यदुःखाखिलजनसुखकृत्खण्डिताखण्डखेदं
खड्गाभा मूर्खमुख्यप्रखलमुखरताशाखिशाखा विलेखे ।
ख्याता वाग्लेखसंख्याप्रमुखशतमखाभ्यर्चिता खण्डशो वः
सख्यं प्रेङ्खन्मनोभूविशिखमुखभिदः खण्डयत्वस्खलन्ती ॥ ९० ॥

वर्णैः पूर्णाप्यवर्णा कुजनपरिचिताप्याप्तलोकैर्विनूता
साराप्युच्चैरसारा रतिसुखकृदपि प्रास्तकन्दर्पदर्पा ।
या सन्निष्ठाप्यनिष्ठा प्रविदितजगतो भारतीनां रतीनां
सा युष्माकं निमित्तं त्वरितमुपदधात्वित्यनेकप्रकारा ॥ ९१ ॥

भद्रा द्रोणी समुद्रे द्रविणवरनिधिर्द्राग्धनायेऽपिधानः
स्वापस्त्वानूपपातापदि परिपततां कूवरी दुर्गमार्गे ।

युद्धे साध्वायुधश्रीः शशिसमयशसां योनिरार्यार्यगीर्या
सा युष्माकं महाधिप्रधनविधुरताध्वस्तयेऽस्तु प्रशस्ता ॥ ९२ ॥

भूमानं बिभ्रतोऽपि प्रकटयति झटित्योजसा स्वेन हानिं
स्नेहस्योच्चैः पतङ्गप्रभृतितनुमतोऽवन्त्यनित्यत्वशून्या ।
यान्यादृक्षेव साक्षात्कृतनयनपथातीतवस्तुस्वरूपा
दैपी वर्तिः कुवृत्तीरपहरतुतरामर्हतां वागसौ वः ॥ ९३ ॥

ज्योतिर्मैत्रं न यत्र प्रविचरति रुचिर्नैन्दवी न प्रकाश्यं
यद्भासां चित्रभानोरनणुमणिरुचां गोचरे यच्च नैव ।
वस्तु प्रत्यक्षयन्ती तदपि मुदमितैः प्राप्तरूपैर्नुता या
सार्हद्भारत्यरत्या वियुततनुलतान्वः क्रियादक्रमेण ॥ ९४ ॥

सालङ्कारां करोति श्रुतिमति विशदन्यायरत्नोद्धटश्रि
श्रीमद्भिर्धार्यमाणं गतमतिविभवैर्दुर्लभं भास्वराङ्गम् ।
सद्वृत्तोदात्तरूपं व्युपरतविकृतेर्यत्तुलां कुण्डलस्य
क्षिप्रं बिभ्रत्क्रियाद्वो वचनमुपचितिं चिन्तितानां तदर्च्यम् ॥ ९५ ॥

नाश्रेयांसि श्रितानां न भयतरलता श्रूयते श्राद्धदेवा-
दश्रीणां नाश्रयोऽश्रु स्नुतिरपि न न वा विस्रसा न श्रमो वः ।
नाविश्रम्भश्रुतिर्न श्रवणकटुवचो यत्र तत्स्थानमीयुः
श्रुत्वा यां श्रीजिनस्याश्रियमभिभवताद् गौरसौ स्राक्श्रुतीष्टा ॥ ९६ ॥

मिथ्यादृक्पाथसान्तर्भृतगुरुविपदावर्तगर्तं गरीयः-
सर्पत्कन्दर्पसर्पं प्रचरितकुनयानेकनक्रादिचक्रम् ।
यत्प्राप्य प्रोत्तरन्ति प्रततमपि भवाम्भोनिधिं साधुबन्धं
पातात्पोतायमानं तदवमपतनाज्जैनचन्द्रं वचो वः ॥ ९७ ॥

सोन्मुद्भिर्जन्मवद्भिः शिखिभिरिव समाकर्णिता निर्णयन्ती
क्लेशग्रीष्मोष्मशोषं स्वमहिमभवनात्संहरन्ती रजांसि ।

विस्फूर्जन्नीतिधारानिकरपतनतः प्रावृषा या समाना
मानारेर्माननामाप्यपनुदतु भवत्स्वाशु सा सूनृता वाक् ॥ ९८ ॥

लक्ष्मीर्वा दुग्धसिन्धोर्धरणिधरवराज्जह्नुकन्येव मान्या
श्यामेशाच्चन्द्रिकेवाभिनवजलधरादम्भसः श्रीरिवोच्चैः ।
ध्वान्ताबन्धोरहःश्रीरिव समुदभवद्भारती रत्यधीन्द्रं
द्रोग्धुर्या सा निधेयादधरितविबुधाधीशराज्ये पदे वः ॥ ९९ ॥

नाक्षेमं क्षुद्रपक्षात्क्षणमपि लभते संभ्रमेणेह बिभ्र-
त्कण्ठे निर्लोठ्य शाठ्यं कुदृशमसदृशोद्भासितां भ्रंशयन्तीम् ।
यां रक्षां वा विवेकी बहुविधविपदां भेदिकां दैन्यशून्यान्
युष्मान्मान्याग्रगस्याननवनजशया वागसौ द्राग्विधेयात् ॥ १०० ॥

इति जिनवाग्वर्णनं

पं. हेमविजयगणिविरचितम्

# ॥ ऋषभशतकम् ॥

## ऋषभलाञ्छनवर्णनो नाम प्रथमः स्तवः

स्वस्ति श्रीमति यत्र मित्रमहसि प्राप्ते दृशोरध्वनि,
स्निग्धाब्जैररिकैरवैश्च युगपल्लेभे प्रमोदोद्गमः ।
तं विश्वत्रयचित्तचातकचयप्रह्लादने तोयदं
श्रीमन्नाभिनराधिराजतनयं कुर्मो मनोवर्त्मनि ॥ १ ॥

पात्रं पुष्टिपटुः पथः पथयिता प्राधान्यहेतुः प्रभु-
र्विश्वेऽस्मिन्नयमेव देवतिलको जज्ञे ममाऽहर्निशम् ।
यं भेजेऽङ्कमिषाद् वृषः शुभगतिर्मत्वेति सल्लक्षणं
ध्यायामस्तमशेषदोषविमुखं नित्यं जिनाधीश्वरम् ॥ २ ॥

पावित्र्येण कटिश्रिया विभुतया वर्यार्जवेणो(णा)ऽपि य-
ज्जिग्येऽहं विभुनाऽमुनाऽतिबलिना मत्वेति चिह्नच्छलात् ।
यं गौगौरव(गौगौरवृ)वानन्यगतिकः शिश्राय विश्वाधिपं
दध्मः पद्ममिवाऽलिनः प्रणयिनस्तं तीर्थनाथं हृदि ॥ ३ ॥

अस्मिन् गर्भमुपेयुषि प्रथमतो दृष्टोऽहमस्याऽम्बया
लक्ष्मीमेष मयैव विश्वविदितां धत्ते व(च) धन्योद्धुरः ।
अङ्केऽप्येष बिभर्त्ति शस्तकमले मामेव देवोत्तमः
सेवा मेऽस्य घटेत यं वृष इति ध्यात्वाऽऽश्रितस्तं स्तुवे ॥ ४ ॥

कुर्वत्या चरणं लसच्चरणया हृद्गोचरे धीमतां
निन्ये पुष्टिमहं महस्विरसया गाढं गवास्यप्रभोः ।
तेनाऽमुष्य निषेवणादहमदो भावी कृतज्ञाग्रणी-
र्ध्यात्वेत्थं भजति स्म लाञ्छनमिषाद् यं गौः स्तुमस्तं जिनम् ॥ ५ ॥

शश्वत्संश्रितसर्वमङ्गलमभूद् गात्रं च शक्ति शुभा
मन्युध्वंसविधायिनीय नितमां भालं दलाब्जाद्भुतम् ।
ऐश्वर्यं गुरु यस्य विश्वविदितं तस्यैव पादाब्जयोः
स्थाने मत्स्थितिरित्यकाममभजद् यं गौः स वः श्रेयसे ॥ ६ ॥

अस्मादस्मयचित्तवृत्तिसुभगात् सज्ञानया यद्गवा
यच्छन्त्या रसमुज्ज्वलं प्रजनितः प्रौढप्रभावानहम् ।
किं तत् सूत्रितसर्वसम्मदमहं मुञ्चामि मातामहं
यस्याऽङ्कं न जहौ वृषः सुखसखं मत्वेति सोऽस्तु श्रिये ॥ ७ ॥

ग्रामान्तर्वि(र्नि)वसन्तमत्र मनुजास्तन्वन्ति सांवाहिनं
त्र(त्रा)सं यच्छति सिंहिकातनुरुहो नान्ते वनान्तेऽपि मे ।
त्रासाद् मद्गतिरेष एव भगवान् भर्ताऽयमाद्यश्च मे
मत्वेत्यङ्कमिषाद् यमीशमभजद् गौगौरवायाऽस्तु सः ॥ ८ ॥

ध्वस्ता मत्पतयः समेऽपि तरसाऽमुष्य प्रतापव्रजैः
सर्वे मत्पतयो नमन्त्यमुमयं मत्स्वामिनां वाऽग्रणीः ।
विश्वेऽस्मिन् मम विश्वसंस्तुतमतेस्तद्दास्यमस्योचितं
गौर्यत्पादयुगं श्रितोऽङ्कमिषतो मत्वेति वः पातु सः ॥ ९ ॥

स्वः शास्तीव धनं घनं तनुभृतामेनं घनच्छायया
संछन्नः पटुपल्लवैः परिवृतो दास्यत्यसावादितः ।
एवं ज्ञापयितुं किमम्बुजभुवाऽमुष्यैकचिह्नच्छला-
दङ्केऽकारि वृषः श्रियं स तनुतां देवः सतां ज्ञानभूः ॥ १० ॥

स्त्री-स्तम्बेरम-कानन-द्रुम-नदी-भोज्याधिपा अप्सरः-
शुभ्रानेकप-नन्द[न]र्तुमहिरुड्-गङ्गा-सुधा-शक्रताम् ।
प्रापुर्यस्य पुरः स्थितास्त्रिजगतीनाथस्य तत् सोऽङ्कगो-
ऽमुष्यैवाऽर्हति गां न्यधाद् विधिरतो यत्पादयोः स श्रिये ॥ ११ ॥

हन्यादूर्जितमार्यवृत्तविमुखं नेतैतदङ्कः स्मरं
वैराग्याम्बुजपुञ्जभञ्जनकरी(रो) घात्योऽस्त्यथी(थो) मेऽपि सः ।
मत्वैवं भगवान् वृषं वरगतिर्योऽङ्के दधावात्मन-
स्तं संसारविकारवारिजविधुं वन्दामहे श्रीजिनम् ॥ १२ ॥

आबाल्यादपि गोरसैः प्रियरसैः सन्तुष्टचित्तस्य मे ।
स्थातुं ह्रीमुचि नोचितं च्युतधियां वृन्दे पशूनां ध्रुवम्
चक्रे यत्पदयोरुपास्तिमृषभो मत्वैवमङ्कच्छलात्
तं छायासुभगं महीरुहमिवाऽध्वन्यः श्रये श्रीजिनम् ॥ १३ ॥

प्रोच्चैश्चित्तचमत्करी म[म] गतिः सम्पत्तिहेतुर्नृणां
बाल्यादप्यमुना बलेन सहजस्याऽप्याददे स्वामिना ।
स्थानं निर्गतिकस्य मेऽयमुचितो विश्वत्रयीनायक-
स्तस्थौ यत्क्रमयोर्वृषोऽङ्कमिषतो ध्यात्वेति वः सोऽवतात् ॥ १४ ॥

गौरस्यैव ममोपभोगसुभगा पुष्णात्यसावेव मां
भूयोभिश्चरणैः स्थिती रसवरे हृद्गोचरस्यैव मे ।
ध्यात्वैवं गतपङ्कमङ्कमभजन्नित्यं यदीयं वृषः
पाथोराशिरिवैष यातु भवभीमुक्तः श्रियं मौक्तिकीम् ॥ १५ ॥

यो(या) जाड्याम्बुजभञ्जने द्विपवधूर्गौरस्य विश्वेशितुः
सैवैनं जननीव शावमनिशं पुष्णाति पुण्याकृतिः ।
तेनाऽत्रैव वृषोऽयमु[च्च]सुगतिश्चिह्नच्छलादच्छलं
यत्पादौ सृजतेति वारिजभुवा ध्यातं स्तुमस्तं जिनम् ॥ १६ ॥

विष्णोर्नीरधिनन्दनी कुमुदिनी नित्यं तुषारत्विषः
पौलोमी च बिडौजसः कमलिनी भूच्छायविध्वंसिनः ।
युक्तोमाऽपि तथा प्रिया वृषधरस्यैवेति तद्वल्लभं
यं चक्रे वृषलाञ्छनं जलजभूर्नाथः स वोऽस्तु श्रिये ॥ १७ ॥

लोकेऽहं शिशुनाऽमुना प्रकटितो यूनाऽप्यहं पालितो
वृद्धिं वार्धकधारिणाऽतिशयतः संप्रापितः सर्वदा ।
तेन स्यामनृणोऽहमस्य चरणोपास्त्येति जानन् वृषो
यत्पादाम्बुजयुग्ममङ्कमिषतो भेजे भजे तं जिनम् ॥ १८ ॥

गोपालस्य गवां द्रुतं दशशती यत्तुण्डकुण्डोद्भवं
रम्यं गोरसमत्ति दृग्जमहसांमित्रं पिबत्यन्वहम् ।
तेनैतत्पदयोर्मम स्थितवतो भावी स्वकैः सङ्गमो
मत्वा गौरिति यत्क्रमेऽङ्कमिषतस्तस्थौ तमीशं स्तुमः ॥ १९ ॥

[गत्वा] येन जिना गतिप्रतिभटा हंसर्षभानेकपा-
स्तन्मध्यात् प्रथमोऽगमत् सुरगृहं वन्यावनीं चाऽन्तिमः ।
कोपः स्यान्महतां प्रणत्यवधिको मत्वेति मध्योऽश्रयद्
यत्पादौ ध्वजदम्भतः स जिनपः पुष्णातु वः सम्पदम् ॥ २० ॥

श्लाघाहेतुमुषापतेर्ध्वजमुमाभर्तुश्च लात्वा बला-
देणं चाक्ष(क्षि)णि लाञ्छने च वृषभं बिभ्रद् भृशं हारिणि ।
स्वस्वाङ्के स्पृहया कलानिधिमहाव्रत्याश्रितो यो बभौ
तद्वाग् देवगवा[क्ष]चारुचरणा दिश्यात् सतां गोरसम् ॥ २१ ॥

यः स्वामी वृषवानपि प्रतिदिनं नोच्चैः सुरासक्तिमान्
नो मातङ्गसखो बभूव भुवने नाऽपि द्वि[जि]ह्वाश्रयः ।
इत्याकारसतत्त्वजोऽजनि महान् भेदः सतां निन्दितो
यस्मिन् सत्यपि चित्रहेतुमहिमा सार्वः स वः श्रेयसे ॥ २२ ॥

आसंसारमिदं स्वयं विदधतः पाथोजयोनेर्जग-
ज्जातः सच्चरणोऽयमेव भगवान् श्रीनाभिराजाङ्गजः ।
तन्मां पोषयितैष एव मतिमान् मत्वेति यत्पादयो-
श्चक्रे चिह्नमिषाद् वृषः सुखमनाः सेवां स दिश्याच्छ्रियम्॥ २३ ॥

मीनेनेव पयोधिजातनुरुहो दम्भोलिनेवाऽद्रिभिद्
दैत्यारातिरिव द्विजिह्वरिपुणा केकावतेवाऽग्निभूः ।
यः शोभां बिभराम्बराम्बभूव (बिभराम्बभूव) भगवाञ् शश्वद् वृषेणाऽद्भुतां
देयाच्छर्म सतां स देवतिलकस्तोयं तडित्वानिव ॥ २४ ॥

शश्वद् यस्य मुखे वृषस्थितिरभूत् पार्श्वं वृषोपासितं
श्रेयःश्रीशरणं च चारुचरणद्वन्द्वं वृषेणाऽद्भुतम् ।
इत्थं यस्त्रिजगतीपतिर्वृषमयो रेजे गुणानां निधिः
म्नं(तं) चेतस्यनघं वहेम विजयश्रीहृद्यमाद्यं जिनम् ॥ २५ ॥

श्रीऋषभशतकसरसी-विविधालङ्कारकमलपरिकलिता ।
श्रीलाभविजयपण्डितमतिशरदा निर्मला जयति ॥ २६ ॥

**कन्याद्वयविवाहवर्णनो नाम द्वितीयः स्तवः**

स्वस्तिश्रीव्रजराजिनिर्जरवधूवृन्दैरमन्दादरै-
रुद्गीते गतिरान्तरा भवतु मे श्रीनाभिराजात्मजे ।
सङ्गं स्वर्गि(र्ग)तरङ्गिणीयमुनयोर्नाथो यथा पाथसां
यः पाणिग्रहणं विरचयन् रेजे द्वयोः कन्ययोः ॥ २७ ॥

एकस्मिन् ह्युभयोस्तु वस्तुनि मनोरोधे विरोधे स्थितिः
स्यादेवाऽञ्जनजालशालि वहतोः श्यामत्वमन्तर्मिथः ।
मा भूदेकमृगीदृगीक्षणसुखान्मन्नेत्रयोस्तत्कलि-
र्द्वे ऊढे युगपज्जिनेन युवती येनेति वः पातु सः ॥ २८ ॥

विश्वं विश्वसृजः सुखेन सृजतो विश्वत्रयं यो नृणां
रत्नं चाऽत्र सुमङ्गला बलिगृहस्त्रीणां सुनन्दा पुनः ।
स्वःस्त्रीणां तदधीशदत्तमिव यस्तत् पर्यणैषीत् तयो-
र्द्वन्द्वं सन्निभमात्मनः स भगवान् भूयाद् विभूत्यै सताम् ॥ २९ ॥

आवाभ्यां मुमुचे रि(चि)रन्तनतरक्रोधाविरो(?) मिथः
स्वामिंस्त्वामधिगम्य सिद्धिसदनं शान्तं रिपुभ्यामपि ।
तन्नौ स्वीकुरु यो रमां गिरमपि स्त्रीयुग्मदम्भात् प्रभुः(भु)-
स्ते द्वे ज... इवोदुवाह भगवान् श्रेयः श्रिये सोऽस्तु वः ॥ ३० ॥

याम्योदक्ककुभोर्गतिं कृतवता ये अर्जिते ऊर्जिते
सम्पत्ती रविणो(णा)ऽतितीव्रमहसं यस्य प्रतापप्रथाम् ।
बाढं सोढुमशक्तिना जलजदृग्युग्मच्छलाद् ढौकिते
ऊढे प्रौढपराक्रमेण विभुना ते येन सोऽस्तुं श्रिये ॥ ३१ ॥

सत्पक्षः कमलाकरप्रणयिधीः शश्वद् विधिप्रीतिभूः
श्रीमन्मानसवाससङ्गतिरतो यद् राजहंसोऽभवम् ।
स्याद् द्वाभ्यां रहितस्य मे न तु कथं तत्पक्षि(क्ष)तिभ्यां गति-
र्येन स्त्रीद्वयदम्भतो भगवता ते स्वीकृते स श्रिये ॥ ३२ ॥

छायाकान्तिपतिः पितेव यमुनाभ्रातुर्निशाकौमुदी-
युक्तश्चन्द्र इवाऽतिसुन्दररसाधीशप्रमोदप्रदः ।
स्मेराक्षीयुगलेन मञ्जुलमभात् पाणौ गृहीतेन य-
स्तं निःशेषविशेषविद्वरगवीगेयं स्तुवेऽहं जिनम् ॥ ३३ ॥

सर्वज्ञं नरकच्छिदं च हृदये विज्ञाय वामाद्वय-
व्याजाद् विश्वविलोचनालिनलिनी ह्लादैकहेलिच्छ्वी ।
सोल्लासं श्रयतः स्म शैलतनया पाथोधिपुत्री च यं
पुण्यः पुण्यपथप्रकाशनपटुर्भूयात् स वः प्रीतये ॥ ३४ ॥

ऐश्वर्यं वृषभध्वजत्वमननघं(मनघं) यस्मिन्नवेक्ष्य प्रभौ
नष्टे स्वामिनि चित्तजन्मनि रति-प्रीती तदेणीक्षणे ।
नित्यं निर्गतिके इव प्रणयिनं यं चक्रतुः स्त्रीद्वय-
व्याजाद् विश्ववनप्रसूनसमयः पुष्णातु पुण्यं स वः ॥ ३५ ॥

स्नेहाढ्ये सुदृशे अनश्वरमहे सत्पात्रिके दीपिके
जाते ये सुदृशौ विधेर्विदधतो विश्वातिते(गे) एव यः ।
गृह्णाति स्म करेण दर्शनधिया सत्कर्मधर्माध्वनोः
श्रीमन्तः प्रथयन्तु पुण्यपटवः पादास्तदीयाः शिवम् ॥ ३६ ॥

दस्राभ्यां भुवनातिशायिगुणया रूपश्रिया सान्द्रया
ध्वस्ताभ्यामुपढौकिते उपदया [तत्]स्वस्वसाराविव ।
यो जग्राह करेण तत्प्रतिनिधी कन्ये उभे निर्निभे
नम्रानेकनरेन्द्रवन्दितपदं वन्दामहे तं जिनम् ॥ ३७ ॥

ऊर्ध्वाधःककुभोः प्रतापपटलैराक्रान्तयोर्भीततद्-
भर्तृभ्यामुपढौकिते इव निज(जा)स्थानश्रियां मण्डने ।
के[लि?]प्राभृतके प्रभुः प्रणयवान् पाणौ गृहीते उभे
यश्चक्रे सुचिरं चिनोतु रुचिरां चारित्रचर्यां स वः ॥ ३८ ॥

आद्यस्तीर्थकृतां तथा क्षितिभृतां भावी समेषामयं
विश्वेऽस्मिन्निति तच्छ्रियोः प्रतिभुवौ मत्वेव कन्ये उभे ।
यः पूज्यैः परिणायितः किल रति-प्रीती इव श्रीसुतः
श्रीमान्नाभिसुतः प्रयच्छतु स वः पद्मामुदन्वानिव ॥ ३९ ॥

स्यात् पित्रोर्युगपत् पवित्रपदयोर्नैपुण्यपुण्यात्मनोः
कर्तुं भक्तिमलं विलम्बरहितां नैका स्नुषा जातुचित् ।
ध्यात्वैवं परिणीतवान् विनयवांस्तत्कर्ममर्मक्षमे
यो द्वे पद्मविलोचने अवतु वस्तापादिवेन्दुर्भवात् ॥ ४० ॥

द्वे गङ्गागिरिजे प्रिये पशुपतेश्छायाछवी भास्वतः
श्रीगोप्यौ च तमोरिपोरपि रति-प्रीती च चेतोभुवः ।
यो द्वैवं(धं?) मरुतां मतः समुचितस्तद्वर्तिनः मेऽपि स
ध्यात्वैवं परिणीतवान् प्रभुरुभे यः मुत्तुवो(सुभ्रुवौ) स श्रिये ४१

एकामेव हि युग्मजातमनुजास्तन्वन्ति तन्वीं ध्रुवं
पूर्वेषां प्रथमः क्रमः क्रमजुषोऽप्येष ध्रुवं मूलतः ।
उच्छेद्योऽस्ति ममेति योऽत्र तदभिज्ञानाय सद्ज्ञानवान्
कान्ते द्वे परिणीतवान् स कुरुतां कैवल्यकेलीं(लिं) सताम् ४२

नाऽऽप्ताः पङ्क्तिविभेदिनः स्युरिति यो भोगार्थमभ्यर्थितः
स्वःस्त्रीभिर्वसुधाभृतां युवतिभिश्चाऽनेकशो वाग्भरैः ।
कामोर्वीरुहवारिवाहसदृशो द्वे सुभ्रुवी वू(व्यू)ढवां-
स्तासां तुष्टिकृते पृथक् पृथगसौ स्वामी श्रिये वः सदा ॥ ४३ ॥

लोकेशत्वगभीरताजितसरोजन्मासनाम्भोनिधि-
क्ष्मापाभ्यां स्वसुते उपायनकृते साक्षादिव प्रेषिते ।
यो दोर्दण्डमखण्डचण्डमहसं बिभ्रद् भ[ ]भासुरः
कन्ये द्वे परिणीतवान् प्रथयतु श्रेयांसि भूयांसि सः ॥ ४४ ॥

आसीदग्निवृषो धृतामृतरुचिः साक्षादसावीश्वर-
स्तेनोमा च सरस्वती च मरुतामस्यैव युक्ते प्रिये ।
सञ्चिन्त्येति विरञ्चिनोभयवधूव्याजात् तयोर्दत्तयोः
पाणिं पीडयति स्म योऽस्तु पुरुषापीडः स पीडापहः ॥ ४५ ॥

एकां क्ष्मां रमणीमनन्यगतिकामन्यां च सिन्धोः सुतां
दत्ते नाभिनराधिपेन गुरुणा बाल्येऽपि भुञ्जन् प्रभुः ।
स्पर्धामाश्रितया सहात्मपतिना यः पर्यणैषीत् स्त्रियौ
द्वे मात्राऽपि समर्पिते इव युवा वः पातु सोऽर्हद्गुरुः ॥ ४६ ॥

यं चेन्दुं च विचिन्त्य चेतसि चिरं जैवातृकत्वात् समौ
ब्राह्म्यौ तत्कृतये विधिर्विहितवान् कन्ये उभे सन्निभे ।
एकं वीक्ष्य वलक्ष[पक्ष]युगलं शुक्लैकपक्षं परं
तद्दत्तामुदुवाह यस्तदुभयीमप्येककः स श्रिये ॥ ४७ ॥

सूर्यं वीक्ष्य रजस्वलामपि सदा भुञ्जानमम्भोजिनीं-
नित्यैकाम्बरचारिणं च दयितं दुःखैर्भृशं व्याकुलाम् ।
छायां गां च समागतामिनतया ख्यातस्त्रिलोकीपतिः
स्त्रीरूपां परिणीतवान् सपदि यस्तं संमुगः(संस्तुमः) स्वामिनम् ४८

मत्वा मामृषसं(भं) मदर्थमकरोद् गां स्पष्टमष्टश्रवा
मां चेन्द्रं जयवाहिनीं जयकरीमेते च मामाश्रिते ।
नो लोकेशनिदेशलोप उचितश्चित्ते विचिन्त्येति य-
श्चक्रे द्रागुभयोस्तयोरुपयमं स्त्रीरूपयोः सोऽवतात् ॥ ४९ ॥

अस्त्यव्यस्तधनो महाव्रतिसुहृद् भर्तैष मद्देवरो
मत्सख्योरमुना समं परिणये स्यात् तद्वियोगो न मे ।
मत्वैवं शिवया वशाद्द्वयमिषाद् द्वे एव ते ढौकिते
यः स्वामी परिणीतवाञ् शिवसखः श्रेयःश्रिये सोऽस्तु वः ५०

नेता यः कलयाम्बभूव कमलां लोलेक्षणाभ्यां रति-
प्रीतिभ्यामिव मन्मथो हरिकुलोल्लासी कलावत्सुहृत् ।
स श्रीनाभिनरेशवंशसरसीजन्माब्जिनीवल्लभः
कान्त्या तप्तनवीनहेमविजयः पुष्णातु वः सम्पदम् ॥ ५१ ॥

श्रीऋषभशतकसरसी विविधालङ्कारकमलपरिकलिता ।
श्रीलाभविजयपण्डितमतिशरदा निर्मला जयति ॥ ५२ ॥

## जटावर्णनो नाम तृतीयः स्तवः

कल्याणद्युति यस्य बाहु-शिरसि श्यामा सहस्रत्विषः
क्रोडे स्थास्नुकलिन्दसूरिव दधौ शोभां लुठन्ती जटा ।
तं श्रेयोवनवारिवाहसदृशं विद्यानवद्यैर्यति-
व्रातैर्वन्दितपादपद्ममनघं नाभेयदेवं स्तुमः ॥ ५३ ॥

किं लोकत्रयचित्तवृत्तिमथनप्रह्वस्य चेतोभुव-
क्ष्माराजस्य भुजालतामसिरसावुच्छेत्तुमुद्यत्त (द्युक्तवान् ?) ।
रोलम्बच्छविरंसदेशपतितो यत्केशपाशो बभौ
देवं दर्पकदर्पसर्पविनताजन्मानमीहामहे ॥ ५४ ॥

स्फूर्जच्छक्तिमताऽतिधन्यधवलध्यानैकससार्चिषा
निर्दग्धोल्बणकर्ममर्मसमिधां धूमस्य किं धोरणिः ।
प्राप्तो यद्भुजमूर्ध्नि मूर्धजभरो रोलम्बनीलो लस-
त्प्रीतिं वस्तुनुतां स संसृतिसरिन्नाथैककुम्भोद्भवः ॥ ५५ ॥

मा ध्वंसाय महाव्रतिस्त्वमदयं मद्भ्रातुरौत्सुक्यवान्
भूयाः कर्तुमनाः कलिन्ददुहिता विज्ञप्तिमेनामिव ।
कर्णाभ्यर्णमुपेयुषी श्रवणयोर्मूले लुठन्ती बभौ
राजी यस्य शिरोरुहां स भगवानस्तु श्रिये वश्चिरम् ॥ ५६ ॥

देवेन्द्रैः कुमुदेन्दुसुन्दरतरैः सञ्चालितैश्चामरैः
श्लिष्टा यच्छ्रुतिपार्श्वयोरधिगता जात्याञ्जनाभा जटाः ।
दैवात् सम्मिलितैर्जलैर्दिविषदां नद्या मिथः सङ्गताः
कल्लोला इव यामुनाः शुशुभिरे सोऽर्हन् शिवायाऽस्तु वः॥ ५७ ॥

स्पर्द्धां सार्द्धमहं त्वदङ्गमुखजैः कर्ताऽस्मि नो सौरभै-
स्तेनाऽकीर्तिकरीं कुरङ्गजठरावस्थानजां वेदनाम् ।
स्वामिन् ! भिन्ध्यभिधातुमित्युपगता कस्तूरिकेव स्वयं
यं स्कन्धशिरोजराजिमिषतस्तं तीर्थनाथं स्तुमः ॥ ५८ ॥

भुक्तायाश्चिरमृद्धराज्यकमलालोलेक्षणाया व्रता-
दानस्याऽवसरे सरागविनयादालिङ्ग्य यान्त्या इयम् ।
लेखा कज्जलपेशलाक्षिपयसां किं स्कन्धयोः सङ्गता
श्रेणी यस्य शिरोरुहां श्रियमधात् पायादपायात् स वः ॥ ५९ ॥

हा ! नैकाऽपि मया महोदयशिला पूर्णीकृतौजस्विना
सप्तानामपि मध्यतश्च नरको नैकोऽपि रिक्तीकृतः ।
व्यज्ञायि स्वमकीर्तियुग्ममनिशं येनेति भर्त्राऽलकाः
स्वस्कन्धोपरिगा द्विधा शितितमास्तं दध्महे हृद्गृहे ॥ ६० ॥

घ्राणानन्द्यरविन्दकुन्दकुमुदीमोदश्रियां जित्वरं
घ्रातुं सौरभमास्यसम्भवमसौ किं स्मैत्यलीनां ततिः ।
कालिन्दीसलिलोर्मिवर्मितशरद्व्योमोपमो निःसमो
यस्यांऽसे शुशुभे लुठन् शिरसिजस्तोमः स्तुमस्तं जिनम् ॥ ६१ ॥

द्वे मोक्षस्य.....पद्धतिधुरे सार्धं द्वयोः स्कन्धयो-
र्यस्योर्व्यौ वहतस्तदेक पिशुने चिह्ने इवोद्धर्षजे ।
दोर्मूर्ध्नोः पतितौ पृथग् जलधरश्यामौ श्रियं बिभ्रतु-
श्चारू यच्चिकुरोच्चयौ चयमयं प्रीणातु पुण्यात्मनाम् ॥ ६२ ॥

भर्ता भोगभृतां त्वमेव बलवांश्चाऽमी वयं भोगिन-
स्तेनाऽस्मत्कुलकालतो गरुडतो नः पाहि दासानिति ।
किं विज्ञसुमितास्त एव फलिनीनीलोत्पलश्यामला
लग्ना यच्छ्रुतिमूलयोः शुशुभिरे केशाः स ईशः श्रिये ॥ ६३ ॥

हृत्कुण्डस्थमनुष्णधामधवलं ध्यानामृतं रक्षितुं
देवेनाऽम्बुजजन्मना विनिहितः किं श्यामलः कुण्डली ।
यद्दोर्मूर्धनि मूर्धजव्रज उमापुष्पोपमः प्रोल्लसन्
सौभाग्यं बिभराम्बभूव भगवान् भूत्यै सतामस्तु सः ॥ ६४ ॥

माऽस्मिन् दुष्टदृशां दृशामसदृशां दोषः मुखध्वंसकृद्
भूयाद् विश्वमनोरमे भगवतः काये निकाये श्रियाम् ।
मत्वेत्यब्जभुवाऽऽञ्जनी जनितमुद्रेखा कृता किं स्वयं
यस्याऽंसे पतिताऽलकालिरभसात् सोऽर्हन् श्रियं रातु वः ॥ ६५ ॥

न्यस्ता संयमबालयाऽलिफलिनीसंकाशवासोङ्किका
सद्यस्काञ्जनरत्नकङ्कणभृता भावाद् भुजेवाऽऽत्मनः ।
यस्याऽऽनन्दवतः शिरोरुहततिः स्कन्धे लुठन्ती बभौ
श्रेयस्वी भगवाञ् श्रिये श्रितवतां ज्ञानार्णवः सोऽस्तु वः ॥ ६६ ॥

भिन्नोर्मिप्रसरा स्वसाऽपि नृपतेर्दत्तप्रमोदा सुधी[:]
हंसानां सहसेयमुत्तरति किं शृङ्गाद् गिरेः स्वःसदाम् ।
दृष्ट्वा यस्य सुवर्णवर्णवपुषः स्कन्धे लुठन्तीं जटां
श्यामां चित्त इति व्यचिन्ति चतुरैः पायात् स वस्तीर्थराट्॥ ६७ ॥

पद्माह्लादलसद्गुणोत्करकला कूलङ्कषाकूलयोः
किं याता अभिराममुद्गम(ग)मी सर्वेऽपि दूर्वाङ्कुराः ।
रेजुर्यस्य पृथक् पृथक् स्थितिसृजः केशाः प्रभोरंसयो-
स्तं प्रावीण्यपटुप्रसिद्धिकमलागेहं स्तुवेऽहं जिनम् ॥ ६८ ॥

उप्ता अंसशरावयोः सुभगयोः किं मुक्तिसीमन्तिनी-
वीवाहाय शिवावदा नवयवाङ्कूराः प्रवृद्धिस्पृशः ।
केशास्तालतमाल[जाल] सदृशो यत्स्कन्धयो रेजिरे
तं वन्दे विनयावनम्रशिरसि न्यस्ताग्रहस्तं प्रभुम् ॥ ६९ ॥

ईशेऽस्मिल्लँपनच्छलाच्छ्रितवति श्वेतद्युतौ साम्प्रतं
स्थातुं वैरिणि नैव मे भुजशिरोनिश्रेणितो नश्यतः ।
अङ्कस्येत्यसिता इवाऽंह्रियुगलन्यासोद्भवा पद्धति-
र्यत्स्कन्धे पतिता स्म भाति चिकुरश्रेणिः स वः श्रेयसे ॥ ७० ॥

देव ! त्वं पुरुषोत्तमोऽसि तमसो दस्युस्तमोऽहं पुन-
र्हन्ता तेन मम त्वमेव तदहं न ध्वंसनीयस्त्वया ।
किं विज्ञसुमिति श्रुतेस्तटमितः स्वर्भाणुरेष स्फुटं
यत्स्कन्धे शुशुभे शिरोजनिचयः पायात् स वः श्रीजिनः ॥ ७१ ॥

न स्पर्धां ध्वनिना त्वया सममहं कर्ताऽस्मि तेन प्रभो !
मद्दोषं द्विकपुष्टताख्यमयशोमूलं त्वमुन्मूलय ।
इत्याख्यातुमिवाऽऽगतः पिकयुवा यत्कर्णपार्श्वे लसन्
वालौघः कलयाम्बभूव कमलामस्तु श्रियेऽर्हन् स वः ॥ ७२ ॥

तुङ्गानङ्गपतङ्गदाहनिपुणे नित्यामृतस्नेहयुग्
हृत्पात्रे पृथुधीदशे प्रकटितप्रौढप्रकाशप्रथे ।
शुक्लध्यानदशेन्धने शुचिरुचो यस्यांसभाक् कुन्तल-
व्यूहः कज्जलतामुवाह स जिनः पुष्णातु पुण्यानि वः ॥ ७३ ॥

आधिव्याधिविरोधवारिगहनात् संसारनीराकराद्
घोरादुत्तरतोऽंसदेशलसिताः शेवालवल्ल्यः किमु ? ।
यस्य स्कन्धतटे जटा घनघटा श्रीकण्ठकण्ठोपमा
रेजुर्विश्वगुरोर्गुरोरवतु वः क्लेशात् स आद्योऽर्हताम् ॥ ७४ ॥

पर्जन्यास्तव सेवकाः पुनरहं तेष्वेव सौ[भाग्यवान् ?]
.......[म]हाबलो बलवतां मुख्योऽपि भूयाद् भवान् ।
किं विज्ञापयितुं भुजङ्गमभुजाबर्होघ एष श्रवो-
मूले मुक्त इति व्यभाद् यदलकस्तोमोऽंसयोः स श्रिये ॥ ७५ ॥

पद्मानन्दविधायिना न शुचिना वक्त्रेण वीर ! त्वया
श्रीर्नेया निधनं सदामृतरुचेश्चन्द्रस्य बन्धोर्मम ।
एतद् वक्तुमिवाऽऽगता कुवलयश्रेणिः प्रभोः कर्णयो-
र्यस्याऽंसस्थलशालिनीश्रियमधात् केशालिरव्यात् स वः ॥ ७६ ॥

श्रेणिं क्षोणिरुहामिवाऽमरगिरिः कादम्बिनीबन्धुरां
यः केलिं कलयाञ्चकार चिकुरव्रातं वहन् मूर्धनि ।
दिश्यात् स प्रवराणि बिभ्रदनघं वर्ष्माऽस्तसत्पद्मिनी-
गर्भादित्यमदीनहेमविजयश्रीधाम धामानि वः ॥ ७७ ॥

श्रीऋषभशतकसरसी विविधालङ्कारकमलपरिकलिता ।
श्रीलाभविजयपण्डितमतिशरदा निर्मला जयति ॥ ७८ ॥

## इक्षुरसपारणा-वर्णनो नाम चतुर्थः स्तवः

श्रेयस्वत्यनघे मम स्थितवतः क्रोडे पितुः शैशवे
दत्ता(त्त्वा)ऽऽदावपि यं हरि[र्वि]हितवानिक्ष्वाकुरित्यन्वयम् ।
दीक्षायामपि भुक्तिरत्र घटतो तानेव तावद् हृदि
ध्यात्वेतीक्षुरसेन यः प्रविदधे प्राक् पारणं स श्रिये ॥ ७९ ॥

आसीज्ज्येष्ठमिदं मदीयमनघं तीव्रं तपो वार्षिकं
ज्येष्ठेनैव रसेन तेन घटते श्रीकारणं पारणम् ।
मत्वैवं मधुरेण यो विहितवानिक्षो रसेनाऽशनं
वर्षान्ते वृषभः स रक्षतु जगत् संसारनीराकरात् ॥ ८० ॥

प्राग्जन्मार्जित[विघ्न]कर्मसमिधः संवत्सरो दुस्तरो
जज्ञे ज्वालयतस्तपोहुतभुजा तीव्रांशुतीव्रेण मे ।
तत्तन्नो भविताऽमुनैव तुहिनः कायो मदीयो भृशं
मत्वेतीक्षुरसं पपौ प्रथमके यः पारणे तं स्तुवे ॥ ८१ ॥

अन्यन्मत्तपसो तपो भगवतां भावि त्रयोविंशते-
स्तत् प्राक् पारणकेऽपि भिद् भवतु मे मत्वेति तत्पारणे ।
पौरस्त्ये परमान्नमेव कलयन्नब्दान्त आदीश्वर-
श्चोक्षेणेक्षुरसेन तत्प्रविदधे यः पारणं तं स्तुमः ॥ ८२ ॥

आद्यः क्षोणिभृतामयं व्रतवतामाद्यस्तथैवाऽर्हता-
माद्यः पारणमाद्यमुग्रतपसः पौण्ड्रस्तथाऽऽद्ये(द्यो) रसः ।
सर्वेष्वेष रसेषु तद्भगवतोऽनेनैव भुक्तिः शुभा
श्रेयांसेन धियेति ढौकितमपाद् यस्तं स्तुमस्तं जिनम् ॥ ८३ ॥

पूर्वं पावकपक्वमोदनमसौ नाऽस्ति स्म वेश्मस्थितो
दीक्षायामपि पारणे प्रथमके स्तादेवमेव ध्रुवम् ।
श्रेयांसेन वितीर्णमैक्षवरसं ध्यात्वेति धन्यात्मना
यः प्रीतः पिबति स्म पुण्यपदवीपान्थः प्रभुः पातु सः ॥ ८४ ॥

सद्गाम्भीर्यरसेशतातिशयतोऽनेनाऽस्म्यहं निर्जितो
मा भूयोऽपि बली पराभवतु मामेषोऽधुनेत्यब्धिरी (?) ।
बुद्ध्यैवाऽमृतमेनदैक्षवरसव्याजात्कृतं प्राभृतं
स्वामी यस्तदपात् स पातु भवतः पुण्यात्मनामग्रणीः ॥ ८५ ॥

क्लृप्तोऽयं दलशः प्रयच्छति रसं रम्यं च निःपीडितो-
ऽप्येष प्रोज्झति नो निजां मधुरता-मिक्षुस्ततः सत्तमम् ।
हृत्स्थस्तेन ममाऽधुनाऽतिधवलध्यानद्रुरेतद्रसाद्
भावी भद्रफलो धियेति तमधाद् योऽन्तस्तमीडे प्रभुम् ॥ ८६ ॥

गच्छद्भिर्निधनं द्रुमैर्दिविषदां माधुर्यमत्रैव किं
स्वं न्यस्तं विदतेति दत्तमनघं माधुर्यवर्यं मुदा ।
इक्षोरेव रसं रसेश्वरभुवा श्रेयांससञ्ज्ञेन यः
पुण्यात्मा पिबति स्म पेशलपदः पुष्णातु वः स श्रियम् ॥ ८७ ॥

लोकास्तोकमनोविनोदविदुषा कर्ता(र्त्री)ऽस्मि कर्ता मुदां
स्पर्धां सार्धमहं त्वदीयवचसा माधुर्यधुर्येण नो ।
तापात् पाहि तपस्विनं हुतभुजां तन्मां जिनेन्द्राऽधुना
किं विज्ञस इतीक्षुजं रसमिमं योऽपात् स वः श्रेयसे ॥ ८८ ॥

सम्पन्नः सुमना अयं ......................

....................................................

..............................ढौकितं
श्रेयांसेन धियेति यस्तमपिबत् सम्पत्प्रदः सोऽस्तु वः ॥ ८९ ॥

उप्तः स्याद् यदि पुण्यभाजि भगवत्क्षेत्रेऽत्र पूर्वं मया
माधुर्यस्य खनी रसः फलमहं प्राप्तोऽस्मि तद्बीजजम् ।
श्रेयांसेन धियेति यत्करभुवि न्यस्तो रसः पुण्ड्रभूः
क्षेत्रान्तर्निदधे स एव तरसा येनेशिता स श्रिये ॥ ९० ॥

आसीदेष वलक्षपक्षयुगलः श्रीराजहंसो जिनो
धत्ते गोरसतां रसोत्तमतयो(या) युक्तोऽयमिक्षो रसः ।
एतत्पानममुष्य साम्प्रतमिति ध्यात्वेति यं ढौकितं
श्रेयांसेन पपौ प्रभुः प्रथितधीर्यः सोऽस्तु वः शर्मणे ॥ ९१ ॥

पत्राणां प्रकरोऽस्ति तोरणकृते पुष्पं पिकप्रीतये
सौरभ्यं प्रसन्नं मुदे मधुलिहां यस्या रसालावलेः ।
तेनाऽस्यैव रसः प्रकाममुचितस्तस्या रसालेशितुः
श्रेयांसार्पितमित्यपात् तमखिलं यः श्रेयसे सोऽस्तु वः ॥ ९२ ॥

ऊधस्यं जठर[स्थव ?]स्तु मिलनात् सर्वं भृशं कश्मलं
सर्पिर्गोरसजं तथाऽन्नमखिलं तत्कृष्णवर्त्माश्रितम् ।
अस्य स्ताददनार्थमैक्षवरसो निर्दोष इत्याशया
श्रेयांसेन वितीर्णमेनमदधद् यः स श्रिये वः प्रभुः ॥ ९३ ॥

दीक्षाऽऽदायि मनोज्ञमुक्तिरमणीदूती व्यधायि स्फुर-
न्माहात्म्यं च तपो रसाय विभुना ज्येष्ठाय येनाऽऽब्दिकम् ।
तन्मेसो(?)भवतात् प्रभोरिति धिया तत्कारणं ढौकितं
श्रेयांसेन य ऐक्षवं रसमधात् तं दध्महे हृद्गृहे ॥ ९४ ॥

प्राग्जातेः स्मरणाद्रसं सुमधुरं प्रापं(प्राप्य) प्रभुं प्रेक्ष्य यद्
दातव्योऽद्य स एव तत् प्रथमतोऽमुष्मै मया स्वामिने ।
पौत्रेणेत्युपदीकृतं सुकृतिना श्रेयांसनाम्नैक्षवं
यो जग्राह रसं रसाय भवतां शान्ताय सोऽस्तु प्रभुः ॥ ९५ ॥

भर्ता यः सलिलं विना कृततपो वर्षोपवासात्मकं
सा तज्जा तृडुपैति......ना नीरेण नाशं कथम् ? ।
तद्ध्वंसाय रसं ददामि मधुरं ध्यात्वेति दत्तं दधौ
श्रेयांसेन रसं रसालजमसौ यः सोऽस्तु वः स्वस्तिकृत् ॥ ९६ ॥

अन्यत्राऽनुपलब्धितो मधुरता चित्तस्य किं मोरट-
द्वाराऽऽधायि सुधेक्षुभिः क्षितितलात् स्वादुस्तदीयो रसः ।
श्रेयांसेन सुधेत्यढौकि विबुधाधीशाय यस्मै मुदा
हस्ताभ्यां निपिबन् सतं(तां) वितनुतां श्रेयांसि भूयांसि वः॥ ९७ ॥

ज्येष्ठो योऽस्ति रसो रसेषु मधुरो भर्त्रे कृतज्ञाय चे-
देतस्मै प्रवितीर्यतेऽयमपि मे दत्ते द्रुतं तं बहुम् ।
तद्बीजं रसमेनमैक्षवमिति श्रेयांसविश्राणितं
यः स्वामी निजकानने निहितवान् सोऽर्हन् श्रियं रातु वः॥ ९८ ॥

वृद्धिर्यस्य विषे विषेण च समं जन्मस्थितिः सद्विषा-
गारे यद्द्विषिभिश्च वेष्टितमभून्नाम्नाऽमृतं यत्पुनः ।
स्वर्भोज्येन किमस्य तेन यतिनो मत्वेति दत्तं दधौ
श्रेयांसेन रसाद् रसालजरसं यः श्रेयसे सोऽस्तु वः ॥ ९९ ॥

मा लात्वात्तमदङ्गजः प्रियवृषादानो बली मा[म]सा-
वित्थं त्रासवता सता पविभृता श्रेयांसतां बिभ्रता ।
अन्यस्माद् विगतस्पृहस्य भवताद् भक्त्यै सुधाऽस्योपदा
दत्तेतीक्षुरसा(स)च्छलाद् भगवतः सा यस्य सोऽस्तु श्रिये १००

देशानिभ्यभरप्रभूतनगरान् हित्वा पुरं हास्तिनं
प्राप्तः पद्ममभूषयन्मम गृहं यो राजहंसः शुचिः ।
ज्येष्ठेनैव रसेन भुक्तिरुचिता ज्येष्ठस्य तन्मे पितुः
पौत्रेणेति रसं प्रदत्तमदधद् यः पौण्ड्रमेष श्रिये ॥ १०१ ॥

चारित्रस्मितचक्षुषोऽपि दमिना पाणिग्रहो निर्ममे
मर्त्यामर्त्यसमक्षमक्षयसुखानन्दाय भर्त्राऽमुना ।
तद्रोगो(तदयोगो) मधुराद्रसादधिगतादेवेति पौत्रेण यः
प्रत्तं पौण्ड्रमपाद्रसं प्रभुरसौ भूयात् सतां भूतये ॥ १०२ ॥

पीयूषं निपिबन् सुरैरिव हरिः शश्वत्सुपर्वाञ्चितो
यादोभिर्मुदि रोधयन्निव पयः सिन्धो रसोल्लासवान् ।
भुञ्जानोऽञ्जलिना व्यलोकि मनुजै रिक्षो रसं यो जिनो
भूयाद् दीधितिक्लृप्तहेमविजयः स्वामी स वः शर्मणे ॥ १०३ ॥

श्रीऋषभशतकसरसी विविधालङ्कारकमलपरिकलिता ।
श्रीलाभविजयपण्डितमतिशरदा निर्मला जयति ॥ १०४ ॥

श्रीहीरहीरविजयव्रतीराजपट्ट-
पद्मांशुमद्विजयसेनमुनीन्द्रराज्ये ।
श्रीस्तम्भतीर्थनगरे रस-बाण-भूप (१६५६)
वर्षे समाप्तिमगमत् शतकं सदर्थम् ॥ १०५ ॥

श्रीमद्धर्मसागरगणिविरचितम्

## ॥ सर्वज्ञशतकम् ॥

पणमिय सिरिवीरजिणं छउमत्थजिणाणमंतरं सम्मं ।
जिणवरुवएसविसयं, तहेव अणुमोअणं वुच्छं ॥ १ ॥

छउमत्थो छउमत्थं जाणइ पाणाइवायपमुहेहिं ।
लिंगेहिं जेहिं सत्तहिं, ताइं ठाणंगभणिआइं ॥ २ ॥

पंचमहव्वयतिक्कमववायणाभोगरूवरूवाणं ।
सत्तण्हं खलु सत्तं पि मोहसत्ताविणाभूअं ॥ ३ ॥

विसयाणाभोगेणं तेसिं पडिसेवणा सुसाहूणं ।
सुत्ताणाए चरणं सुद्धं इहरा उ विवरीअं ॥ ४ ॥

तेसिं लिंगाणं पुण कारणमिह मोहणिज्जकम्मंसे ।
तप्परिणई वि दुविहा पत्तेअं दव्वभावेहिं ॥ ५ ॥

दव्वेण य परिणामो सत्ताए मोहणिज्जकम्मस्स ।
भावेण य परिणामो उदएणं होइ तस्सेव ॥ ६ ॥

छउमत्थणाणहेऊ लिंगाइं दव्वओ ण भावाओ ।
उवसंतवीअरागं जा तावं ताणि जाणाहि ॥ ७ ॥

छउमत्थो पुण केवलिकप्पो अप्पमत्तसंजओ णेओ ।
सोविह संजमजोगे उवउत्तो सुत्तआणाए ॥ ८ ॥

विवरीआइ सत्त वि केवलिणो हुंति लिंगभूआइ ।
सो केवली वि·केवलजुत्तो अहवित्थ तदभिभुहो ॥ ९ ॥

पढमो खलु सव्वन्नू-बीओ पुण खीणमोहओ होइ ।
जइ वि अणाभोगो से विहलो मोहस्स विरहेण ॥ १० ॥

छउमत्थो ते वि दुवे जाणइ लिंगेण लिंगविण्णाणं ।
पच्चक्खपरोक्खेहिं दोहिं पमाणेहिं विण्णेअं ॥ ११ ॥

इंदिययं पच्चक्खं परोक्खमणुमाणमाइअं होइ ।
अणुमाणं पुण मिच्छाकारप्पमुहेहिं लिंगेहिं ॥ १२ ॥

णाणावरणाभावे लेसो दोसस्स णेव णाणस्स ।
जह तह चरित्तमोहाभावा दोसो ण चरणस्स ॥ १३ ॥

जं हेओवादेअं केवलिणो णेव णाणमाहप्पा ।
सव्वत्थ उदासिण्णं वंजगमिहमासवाभावे ॥ १४ ॥

हेए आसवसत्ता णेए संते ण होइ सव्वन्नू ।
संतम्मि उवादेए कयकिच्चो केवली ण हवे ॥ १५ ॥

हिंसा वि दव्वओ खलु हेआणुचिया कह णु भावजुआ ।
सा जइ जिणस्स हुज्जा ता सो उवएसणिज्जो उ ॥ १६ ॥

उवएसो पुण एवं असंजओ संजओ वि तुह भणिओ ।
जाणं तु जीववहगो ता कहमेअं तुहं जुत्तं ॥ १७ ॥

सव्वसमक्खं सव्वं सावज्जं जोगमेव परिचइउं ।
तं चिअ संकारहिओ सेवंतो किं न लज्जेसि ॥ १८ ॥

जं तं सेवंतस्स उ केवलिणो तिण्णि हुंति असमाणा ।
जीववहा १ लिअ २ वीसासघाय ३ संण्णा परावण्णो ॥ १९ ॥

एवं छउमत्थमुणी ण दोसवंतो हविज्ज कइआ वि ।
जम्हा रागद्दोसा-णाभोगा संविभागपरा ॥ २० ॥

तेणं जे वावारा सावज्जत्तेण वण्णिआ समए ।
तेसिमिगो वि कहंची केवलिणो णेव जिणभणिओ ॥ २१ ॥

जो भणइ केवलिणो अवस्सभावी असक्कपरिहारो ।
जीववहो जिअविसया दोसाभावाउ णो दोसो ॥ २२ ॥

तं णो जुत्तं जं सो अरिहादिट्ठो हु अहव णो दिट्ठो ।
पढमम्मि मुसावाई अरहा बीए ण सव्वन्नू ॥ २३ ॥

तेणं सम्मविआरे केवलिणो गयणकुसुमजीववहो ।
ता कहमवस्सभाविववहारो होइ णिव्विसओ ॥ २४ ॥

पायमसंभविसंभवि–कज्जविसयवस्सभाविववहारो ।
अन्नह सव्वं कज्जं अवस्सभावि त्ति वत्तव्वं ॥ २५ ॥

खीणम्मि मोहणिज्जे णावज्जं हुज्ज सव्वहा सव्वं ।
खीणम्मि अंतराए णो से अ असक्कपरिहारो ॥ २६ ॥

केइ भणंति किरिआमित्तेणं जो हविज्ज आरंभो ।
सो णिअमा जीववहो तेणं णो अंतकिरिअ त्ति ॥ २७ ॥

एअमजुत्तं जमिहं किरिआजणिओ ण भणिओ आरंभो ।
किंतु किरिअरंभाणं णिअमो एगाहिगरणम्मि ॥ २८ ॥

तेणारंभा जोगा संजोगिणो सायबंधगा भणिआ ।
ते चेव अंतकिरिआणिरोहगा कायवावारा ॥ २९ ॥

जइ सक्खं जीववहो किरिआमित्तेण इट्ठ आरंभो ।
ता पन्नत्तीसुत्तं णिव्विसयं होइ अपमाणं ॥ ३० ॥

जइ किरिआमित्तेणं जीववहो अंतकिरिअविग्घकरो ।
ता कह केवलणाणप्पमुहं संतम्मि तम्मि भवे ॥ ३१ ॥

अहवा किरिआमित्ता जीववहाइ हविज्ज णिअमेणं ।
ता किरिआविरईए आरंभाईण वेरमणं ॥ ३२ ॥

जं केवली वि चइउं असमत्थो णत्थि तस्स विरई वि ।
केवलणाणाविसओ कह विसओ सेसणाणस्स ? ॥ ३३ ॥

एएण कायजोगा चपलाओ केवलिस्स चवलत्तं ।
तेणेव जीवहणणं एअं वयणं पि दुव्वयणं ॥ ३४ ॥

चपलत्तं पुण कम्मणशरीरजोगा पुढो हु पइसमयं ।
अइसुहुमं जीववहे ण होइ हेउ त्ति जिणवयणा ॥ ३५ ॥

णणु सेलेसीपडिपन्नकायसंफासजीववावत्ती ।
ता कह सजोगिणो जिअविराहणा णेव संभवइ ॥ ३६ ॥

इअ वयणमणाभोगा जं कारगजिणपवित्तिपमुहाणं ।
सम्मविआरा बहिओ दंसिअदोसं ण याणेइ ॥ ३७ ॥

एगस्स वि जीववहे सव्वासववज्जणं ण संजायं ।
तण्णयणुत्तरचरणो ण सिणाओ किंतु सो सबलो ॥ ३८ ॥

सबलोवसंजमेहिं असंजमाओ अ चित्तरूवाओ ।
पइकेवलिणं भिण्णाओ किंणिमित्ताओ वत्तव्वा ॥ ३९ ॥

परिसेसा मोहुदयो सो तिव्वो जमणुवरयपरिणामो ।
केवलणाणुवलंभाओ जोगवं केवली जाव ॥ ४० ॥

केवलिणो जीववहे अणुकंपा लेसओ वि णो होइ ।
कारण १ सरूव २ कज्जाइ ३ जाणमाणो वि पडिसेवी ॥ ४१ ॥

छउमत्थे जिणदोसा तहभूआ संजमोवघायकरा ।
ते चेव अणाभोगा विहला णन्नो तइअभंगो ॥ ४२ ॥

एवं सम्मविआरे केवलिउवमा ण संजयजणस्स ।
जं जाणिअ जीववहे असंजओ होइ उवमेओ ॥ ४३ ॥

एएणं केवलिणो अवज्जहेउ ण जीववहमाई ।
रागद्दोसाभावा इअ वयणं दूरमुक्खित्तं ॥ ४४ ॥

जम्हा रागद्दोसाभावा णो जीवहणणमुहमसुहं ।
बंधाभावोऽणाभोगे वज्जणमईण साहूणं ॥ ४५ ॥

खीणे मोहे णिअमा गरहाकिच्चं ण होइ कस्सावि ।
जीववहो खलु गरहाविसओ एसेव जगमेरा ॥ ४६ ॥

जीववहो वि अ दुविहो आभोगा चेव तह अणाभोगा ।
पढमो मोहुदएणं बीओ मोहस्स सत्ताए ॥ ४७ ॥

जीववहो भयहेउ चरित्तदोसो चरित्तमोहाओ ।
जह वेअमोहजाओ मेहुणदोसो चरित्तस्स ॥ ४८ ॥

पुढवीपमुहा जीवा उप्पत्तिप्पमुहभाइणो हुंति ।
जह केवलिजोगाओ भयाइलेसं पि न लहंति ॥ ४९ ॥

तेणं मच्छिअपमुहा सहावकिरिआपरायणा हुंति ।
ण य जिणकिरिआपेरिअ-किरिआलेसं पि कुव्वंति ॥ ५० ॥

सत्तण्हं एगयरं दोण्हं णो हुज्ज लक्खणं किंची ।
ता णूणं तित्थयरो मुसं वइत्ता य अण्णाणी ॥ ५१ ॥

अण्णाणाइअ दोसा देवसरूवस्स णासगा हुंति ।
दोसुब्भावणवयणं अवण्णवाओ जिणिंदस्स ॥ ५२ ॥

दोसत्तेण संभववयणमवण्णो हविज्ज संतस्स ।
दुल्लहबोहिअहेऊ ठाणंगवयणाणुसारेण ॥ ५३ ॥

ता किमसंते दोसे आरोवेऊण तस्स रूवेण ।
दोसुब्भावणवयणं वण्णिज्जइ केण रूवेण ॥ ५४ ॥

अट्ठारसदोसाणं दोसो एगो वि तस्स ते सव्वे ।
अण्णुण्णं अणुविद्धा जं ते मोहाविणाभूआ ॥ ५५ ॥

किं केवलिणो दोसा अहव गुणा जीववहमाईणि ।
दुहओ अवण्णवाओ कलंकदाणेण केवलिणो ॥ ५६ ॥

एवं अइप्पसंगा भणिआ ते चेव हुंति उस्सुत्तं ।
जीववहं केवलिणो वुच्चंताणं जिणस्सावि ॥ ५७ ॥

इअ सम्मं सद्दिट्ठी जिणिंदआणापरायणो जो सो ।
पडिवज्जउ केवलिणं णिद्दोसं सुद्धबुद्धीए ॥ ५८ ॥

पडिवज्जिअ केवलिणं केवलिवयणेण कुणउ जिणधम्मं ।
सो वि तिह करणकारणणुमोअणभेअओ णेओ ॥ ५९ ॥

तत्थवणुमोअणा खलु मूलं धम्मस्स हरिसमूलागा ।
सा णिअमा भव्वाणं अण्णं अण्णेसिमवि हुज्जा ॥ ६० ॥

जं किंचि वत्थुजायं, साभिमयपसाहगं ति मइविसओ ।
तं चिअ णुमोअणिज्जं, पसंसणिज्जं तु इअरं पि ॥ ६१ ॥

णिअकज्जाइणिमित्तं संतासंतगुणदोसदीवणयं ।
परसक्खिअं पसंसा इट्ठमणिट्ठं च तव्विसओ ॥ ६२ ॥

अहवा णुमोअणिज्जं जं तमुवादेअमेव दुहओ वि ।
जं पुण पसंसणिज्जं भयणिज्जं होइ भावेणं ॥ ६३ ॥

जं पुण इत्तो अण्णं सुरनारयमाइअं सुहं असुहं ।
णेअं हेअं तसुहं कुदिट्ठिपमुहं सुदिट्ठीणं ॥ ६४ ॥

अणुमोयणा य दुविहा पसत्थमपसत्थभेअओ णेया ।
तत्थ वि पढमा जिणमयपत्ताणं पुण्णसत्ताणं ॥ ६५ ॥

एवं सम्मत्तभिमुहभव्वाणं मंदमोहणिज्जाणं ।
मग्गाणुसारिकिच्चं कुव्वंताणं मुणेअव्वं ॥ ६६ ॥

णिअणिअमग्गासग्गहपरिच्चायनिमित्तमेव जं किच्चं ।
सम्मत्तकारणं वा तं खलु मग्गाणुसारि त्ति ॥ ६७ ॥

जं किंचि वि परसमए णाभिमयं अभिमयं च जिणसमए ।
समत्ताभिमुहाणं तं खु असग्गहविणासयरं ॥ ६८ ॥

एवंविह सुहकिच्चं पगईए भद्दगस्स भव्वस्स ।
परसमयबाहिरस्स उ णिच्छयओ ण उण इअरस्स ॥ ६९ ॥

जह संगमणयसारप्पमुहाणं बोहिबीअमुणिदाणं ।
अंबडपमुहाणं पुण जिणाइउवएससवणाई ॥ ७० ॥

तीए णुमोअणाए विसओ णाणाइपवरमुत्तिपहो ।
तस्साहणाणि णाणाविहाणि विसओ अ दुण्हं पि ॥ ७१ ॥

बीआ य अप्पसत्था मिच्छादिट्ठिस्स आभिगहिअस्स ।
हुज्जाभिणिवेसिस्सा पाएण विसेसओ अ तहा ॥ ७२ ॥

तीए विसओ णिअमयधम्मिअकिच्चाइ हुंति दुण्हं पि ।
तत्थ वि अभिगहिअस्स य सहेतुणो इंदिअत्था वि ॥ ७३ ॥

आराहग-णाराहग-विराहगा-तिण्णि माणवा कमसो ।
उत्तम-मज्झिम-अहमा जिणवरआणं समहिगिच्च ॥ ७४ ॥

पत्थिअविहिदत्ताए जिणआणाए तहण्णहाकरणे ।
पढमंतिमाउ णाणा इअरे णाराहगा वि तहा ॥ ७५ ॥

उस्सुत्तदेसणाए विराहगो सो उ दिट्ठिविससप्पो ।
अण्णेसिं तो हुज्जा दूरं दूरेण परिचज्जो ॥ ७६ ॥

दिट्ठिविसं णिअमग्गप्परूवगो उसभाइ अरिहंतो ।
इअ वयणं अइदूरट्ठिआणमवि मरणहेउ त्ति ॥ ७७ ॥

जइ वि हु आभिग्गहिओ संसारपहत्तणेण तुल्लो वि ।
तह वि जिणसमयसत्तावाई इअरो अ विवरीओ ॥ ७८ ॥

दुण्ह वि धम्मिअकिच्चं पसत्थणामं पि (रूवं पि) अक्कपयकप्पं ।
जं तं चिअ मिच्छत्तं ण उणं तह इंदिअत्था वि ॥ ७९ ॥

जइ सोहणम्मि धम्मिअमइप्पमाणं ति धम्मबुद्धीए ।
जिणसमयचयणचायणपमुहं सव्वं सुहं हुज्जा ॥ ८० ॥

तं पि अणुमोअणाए विसओभिणिवेसिणो विसेसेण ।
जं तस्स तिव्वदोसो हविज्ज आगाढतरमिच्छं ॥ ८१ ॥

जं तेण सुगुरुवयणा करिज्जमाणे पसंसिए संते ।
तस्स गुरुस्सुवएसो पसंसिओ सनिअसत्थो अ ॥ ८२ ॥

उवएसपसंसाए पसंसिआ जिणमयस्स निंदा वि ।
जं सा तस्सुवएसे णियया णिजमग्गरागेण ॥ ८३ ॥

तीए सो उम्मग्गो संसारपहो अ जिणमए भणिओ ।
तं चेव पसंसंतो जिणवरआसायगो णिअमा ॥ ८४ ॥

तेणं जिणमयसरिसं अप्पं बहुअं व परमए किंची ।
घुणअक्खरं व विहलं पयसंजमकारणाभावा ॥ ८५ ॥

अप्पं जिणमयसरिसं अभिगहिअस्सेव बंभचेराई ।
बहुअं अरिहंताइअ-णामेहिं अभिणिवेसिस्स ॥ ८६ ॥

जुगवं तित्थं तित्थंकरो ण एगो अणेगतित्थाणं ।
णो बहुतित्थगरा खलु, हवंति एगस्स तित्थस्स ॥ ८७ ॥

तेणं संपइकाले, तित्थं पुण एगमेव सम्मं ति ।
सेसं सव्वं णिअमइ-विगप्पिअं सरिसनामेहिं ॥ ८८ ॥

जइ एगो तित्थयरो अणेगतित्थाण कारणं हुज्जा ।
ता तन्नमंसिआइं तित्थाइ णमंसणिज्जाइं ॥ ८९ ॥

तेसिं सव्वेसिं चिअ, णिअणिअमग्गा हवंति तित्थाइं ।
सेसं सव्वमतित्थं, इअ बुद्धी सासया तेसिं ॥ ९० ॥

एएणं सव्वेसिं, एगो तित्थंकरो त्ति दुव्वयणं ।
सव्वेसिं तित्थाणं, आइगरा हुंति तित्थयरा ॥ ९१ ॥

तेसिं तित्थयरा पुण, सिवभूइप्पमुह णाम आइगरा ।
वीरजिणो अम्हाणं, तित्थयरो तं मह असच्चं ॥ ९२ ॥

णिअपरतित्थगरत्ता, तित्थयरो णेव तेसि वीरजिणो ।
णिअतित्थं अण्णाओ, अण्णमतित्थं ति सद्दहणा ॥ ९३ ॥

जो अण्णं तित्थयरं, अण्णं पिअरं व अन्नओ जाओ ।
जंपइ लोअविरुद्धं, अलज्जओ अहव गयसण्णो ॥ ९४ ॥

वीरजिणेणं ठविअं, तित्थमतित्थं ति भासगा सव्वे ।
माया मे वंज्झ अ त्ति वयणविरोहं अयाणंता ॥ ९५ ॥

तं तित्थं अच्छिण्णं जस्साइगरो ण लब्भइ अण्णो ।
वीराओ वीरेणं दुप्पसहंतं तयं भणिअं ॥ ९६ ॥

वीरजिणो जइ देवो, तित्थयरत्तेण सच्चवाइ त्ति ।
ता तट्ठविअं तित्थं सेसमतित्थं सओ सिद्धं ॥ ९७ ॥

लोइअदेवसरूवा, चंदप्पहमाइणो ण गुरुरूवा ! ।
सीसत्ताभावाओ, गुरूवएसस्सणायत्ता ॥ ९८ ॥

तम्मूला पइमग्गं, भिण्णाभिण्णेव पकिरिआ हुज्जा ।
जह अण्णउत्थिआणं, अण्णाणस्सेव माहप्पा ॥ ९९ ॥

तस्स य णिस्सं पत्तो जिणमयसत्ताविलोवगो पावो ।
अण्णत्थ णत्थि अत्थि अ इहेव दुहओ वि दुव्वयणो ॥ १०० ॥

तम्मुहधम्मिअसद्दा सोउमकप्पा तहा सुदिट्ठीणं ।
सुगताइबुद्धिगहिआ जह जिणपडिमा वि परिचज्जा ॥ १०१ ॥

तेणं सोभिनिविट्ठो दट्ठुं पि ण कप्पइ सुदिट्ठी णं ।
एयं वयणं दूरे तस्संबंधी सुदिट्ठी वि ॥ १०२ ॥

सोऽभिणिवेसी णिअमा अणंतसंसारदुक्खसलिलणिही ।
आसायणाइ बहलो जहा जमाली तउवणयओ ॥ १०३ ॥

मग्गट्ठिअस्साभोगा णाभोगा तह कहंचि णाभोगा ।
उस्सुत्तं तमणिअयं पाएण पओअणाभावा ॥ १०४ ॥

एएणाभिग्गहिआभिणिवेसी सोहणोऽरिहंतस्स ।
भत्तो थुईपमुहेहिं एअमण्णाण महपावं ॥ १०५ ॥

तित्थगरस्स गुणेहिं ससमग्गपरूवगाण थुइपमुहं ।
जह सुअगीअकुमारी गायइ कीलाविवाहम्मि ॥ १०६ ॥

अम्हाणं खलु मग्गप्परूवगो एरिसो त्ति बुद्धीए ।
थुइकरणम्मि पवित्ती असग्गहो एस महदोसो ॥ १०७ ॥

जह देवाइअभत्तो आभिग्गहिओ हविज्ज णेगविहो ।
तह सव्वोऽभिणिवेसी अरहंताईण भत्तिजुओ ॥ १०८ ॥

तम्हा सव्वेसिं चिअ आभिग्गहिआणमभिणिवेसीणं ।
मिच्छत्तसिद्धिहेउं वच्चं देवाइ विवरीअं ॥ १०९ ॥

अरहाइअआरोवा उक्कडमिच्छत्तमरिह देवु त्ति ।
सद्दहणे वि ण सम्मं एसेव असग्गहो जं से ॥ ११० ॥

जेणं सव्वंसेहिं सुद्धोऽभिणिवेसिणो असग्गहओ ।
अभिगहिअस्स उ जिणमयसत्तासग्गहकलंकजुओ ॥ १११ ॥

तेसिं अण्णुण्णं चिअ भिण्णदिसाणं पि मूलदिसचाओ ।
एगो दोसो तुल्लो तेणं ते दो वि उप्पहिआ ॥ ११२ ॥

किरिआतुल्लातुल्ला दिसतुल्ला जह हवंति ता तुल्ला ।
तुल्लफलंता जम्हा अन्नह तुल्ला वि णो तुल्ला ॥ ११३ ॥

पहिआओ उप्पहिओ विवरीओ होइ लोअविक्खाओ ।
सद्धाणुट्ठाणेहिं भावाभावाइजुत्तेहिं ॥ ११४ ॥

तं जाओ किरिआओ पहिआणं सुंदराउ ता चेव ।
उप्पहिआणं असुहा अजरीण जरीण जह सप्पी ॥ ११५ ॥

तेणं जं परसमए अकरणणिअमाइ सुंदरं किंची ।
तं चेव य जिणसमए वुच्चंतं होइ फलवंतं ॥ ११६ ॥

जह अरिहंदेवाइअ-सद्दहणं अभिणिवेसिमिच्छत्तं ।
तं चेव य जिणसमए सम्मत्तं साहुपमुहाणं ॥ ११७ ॥

जह जिणमय जिणपडिमा परपरिगहिआ य अजिणपडिम त्ति ।
एवं जिणमयसरिसं अण्णं पि अ अण्णसारिच्छं ॥ ११८ ॥

अहवा सुअउवओगा सव्वे अंसा दुवालसंगस्स ।
सम्मत्ते सुअणाणं अण्णाणं हुज्ज मिच्छत्ते ॥ ११९ ॥

सम्मत्तसमो न गुणो जं एगागी वि होइ मुत्तिपहो ।
मिच्छत्तसमो दोसो णो जं एगो वि भवमग्गो ॥ १२० ॥

उप्पहकिरिआवण्णा अविणाभूआ य मग्गवण्णेणं ।
मग्गुवएसी अरहा पसंसिओ मग्गणिरएणं ॥ १२१ ॥

अरिहंतसिलाहाए सिलाहणिज्जो हु सुलहबोहि अ ।
लहु सो लहेइ लहुगो णिव्वाणं सासयं ठाणं ॥ १२२ ॥

एगंतसच्चवाई अरिह त्ति पवरविआरकणगस्स ।
कसवट्टो सुमईणं सयगमिणं जयउ जा तित्थं ॥ १२३ ॥

श्रीरामचन्द्रगणिविरचितम्

# ॥ कुमारविहारशतकम् ॥

तेजः पुष्णातु पार्श्वो दुरितविजयि वः शाश्वतानन्दबीजं
संक्रान्तः सप्तरत्न्यां भुजगपतिफणाचक्रपर्यंकभाजि ।
कर्माण्यष्टौ समन्तात्त्रिभुवनभवनोत्संगितानां जनानां
यच्छेत्तुं तुल्यकालं वहति निजतनुं क्लृप्तसप्तान्यरूपाम् ॥ १ ॥

ते वस्तापं हरन्तां नखमणिमुकुरज्योतिरम्भश्छटाभि-
र्दिक्चक्रं प्रीणयन्तः करिमकरभृतः पार्श्वनाथस्य पादाः ।
पद्मैर्नित्यप्रबोधैरधरितसरसां मैत्र्यमासाद्य येषां
चित्रं विच्छिन्नतृष्णाः कति परममृतं प्राणभाजो न भेजुः ॥ २ ॥

विश्वेभ्यो भूर्भुवः स्वः शतमखमुकुटश्लिष्टमुक्तामयूख-
स्नाताः पार्श्वस्य पादाम्बुजनखमणयो मङ्गलानि क्रियासुः ।
येषामुत्संगवेद्यां-शुचिरुचिलहरीताण्डवाडम्बरायां,
संक्रामन् दुग्धसिन्धोः स्मरति मुहुरसौ यामिनीकामिनीशः ॥ ३ ॥

देवः पार्श्वः शिवं वः प्रथयतु हरतां कल्मषं शर्म दत्ता-
माधत्तां धाम कीर्तिं घटयतु दिशतां गौरवं वैभवं च ।
भूतस्तिष्ठन् भविष्यन् सवृतिरपवृतिर्दूरसंस्थःपुरस्थो
यद्ज्ञानादर्शशय्यां सममधिवसति स्वेच्छया वस्तुसार्थः ॥ ४ ॥

आस्थानी मङ्गलानां जलधिरनवधिः शर्ममय्याः सुधायाः
पार्श्वो देवाधिदेवः प्रवितरतु चिरं शाश्वतीं स श्रियं वः ।
जिष्णुः कुन्दावलेपं फणिपतिरसनाक्रोडमासाद्य सद्यः
कान्तिर्यद्गात्रयष्टेर्जनयति जगतः क्षीरधाराभिशङ्काम् ॥ ५ ॥

निश्रेणिर्मुक्तिधाम्नः स्फुरदुरुदुरितोदन्वदुत्तारसेतुः
केतुर्विघ्नोदयानां जडिमदिनपतिर्भूर्भुवः स्वःप्रदीपः ।
कुल्या कल्याणवल्ल्याः कलुषसुरसरित् पुण्यपीयूषवृष्टि-
र्दृष्टिः पार्श्वस्य तेजांस्युपनयतु सतां संहरन्ती तमांसि ॥ ६ ॥

यज्जन्मस्नात्रपर्वण्यनवरतचलच्चामरालीमरुद्भि-
र्विक्षिप्तैरन्तरीक्षे विचकिलधवलैर्दुग्धसिन्धोः पयोभिः ।
आकीर्णं शीतरश्मेः क्षणमधितवपुर्निष्कलङ्कामवस्थां
त्रैलोक्यारब्धसेवः स हरतु दुरितं पार्श्वदेवश्चिरं वः ॥ ७ ॥

स्पष्टं दृष्ट्वापि कष्टं वपुषि विगलितभ्रान्तिसृष्ट्या स्वदृष्ट्या
काष्ठक्रोडाद्विकर्षन् कमठमठशिखिम्लापिताङ्गं भुजङ्गम् ।
यस्तथ्यां मुक्तिवीथीं कथयति करुणामेव देवाधिनाथ-
श्रेणीसंवाहिताङ्घ्रिर्विघटयतु घटामापदां वः स देवः ॥ ८ ॥

आश्चर्यमन्दिरमुदारगुणाभिरामं विश्वंभरापणवधूतिलकायमानम् ।
तेजांसि यच्छतु कुमारविहारनाम भूमीभुजश्चुलुकवंशभवस्य चैत्यम् ९

यस्मिन्नास्थानभाजः शशिमणिवपुषः पार्श्वनाथस्य गात्रं
स्नात्राम्भःसेकमात्रप्रणयविघटितास्तोकलोकाधिशोकम् ।
संक्रामद्भिस्तुरङ्गद्रुमशशिसुरभिश्रीगजैर्भित्तिचित्रैः
सौभाग्यं दुग्धसिन्धोरविदितमथनोत्पातबाधस्य धत्ते ॥ १० ॥

निर्गच्छत्कान्तिवीचीनिचयधवलिताभ्यर्णसौवर्णभित्ति-
र्यस्यान्तश्चन्द्रकान्तोपलशकलमयी पुत्रिकाम्भः किरन्ती ।
वन्दारूणां त्रिलोकीप्रसृमरयशसो देवदेवस्य पादान्
शौचाचारे गलन्तीललितमविकलं नक्तमाविष्करोति ॥ ११ ॥

पर्यन्तभित्तिषु विचित्रवितानरूपबिम्बांकितासु शशिरत्नमयीषु यत्र ।
आलेख्यकर्म शबलं लिखतो वृथैव संतर्जयन्ति खलु चित्रकरान्नियुक्ताः

नानाहस्तकशालिनीः क्वचिदपि क्वापि त्रीलोकीजन-
स्तुत्याकारविराजिनीः क्वचिदथ व्यालोलताडङ्किनीः ।
दृष्ट्वा यत्र भवन्ति रत्नघटिताः पाञ्चालिकाः प्राणिनः
केचिन्नाट्यविदः स्मरग्रहभृतः केचित्परे शिल्पिनः ॥ १३ ॥

ग्राम्या दुग्धमयान् विलासिमनसः कर्पूरपूरात्मकान्
वादभ्रान्तिभृतो रसस्थितिभवान् सौवर्णिका राजतान् ।
ज्योत्स्नाभिः कलधौतजां जनयतः स्वर्णस्य कुम्भावलीं
स्तम्भान् यत्र विकल्पयन्ति रभसादागन्तवो जन्तवः ॥ १४ ॥

यस्मिन्नालोक्य मर्त्यैर्विकटमपि कृतं संकटं रङ्गमध्यं
प्रेक्षोत्का नाकनार्यो रुचिरमणिशिलापुत्रिकाणां छलेन ।
आरूढाः काश्चिदुच्चैः प्रबलरभसया मण्डपं काँश्चिदुच्चं
स्तम्भानां प्रान्तमन्याः शिखरपृथुतटीमेखलां काश्चिदुच्चाम् ॥ १५ ॥

साक्षेपं प्रेर्यमाणैरपि सरलपथे वैनतेयाग्रजेन
त्रस्तैर्भीष्माननेभ्यः शिखरगुरुतटीपीठकण्ठीरवेभ्यः ।
उद्वल्गं नीयमानः प्रसभमिह हयैरग्रतः पृष्ठतो वा
यस्योत्तुङ्गस्य मूर्ध्नि व्रजति न तरुणेऽप्यह्नि पूष्णः पताकी ॥ १६ ॥

त्रिस्थानीसंनिवेशप्रणयसुरभिणो वल्लकीनादभाज-
स्तृष्णावेशादशेषस्वरलयघटनास्फीतगीतामृतस्य ।
उत्कर्णं व्योम्नि तिष्ठन् प्रतिपदरचनां रात्रियात्रास्वतन्द्र-
श्चान्द्रः कालत्रयेऽपि प्रथयति महतीं यत्र राकां कुरङ्गः ॥ १७ ॥

बिभ्राणैरक्षरालीं त्रिभुवनजनताक्षेमरक्षैकपालीं
मन्त्रैर्विघ्नेक्षुयन्त्रैः स्नपनविधिभवैर्नित्यमाहूयमानाः ।
यातायातानि भूयः प्रथयितुमनलम्भूष्णवो यत्र देव्यो
बाह्यानां देवधाम्नां व्यधिषत वसतिं मण्डपोर्ध्वाङ्गणेषु ॥ १८ ॥

पश्यन् हाटककुम्भपङ्क्तिमतुलां निर्वर्णयन् पीठिकां
निध्यायन् विविधा वितानविततीर्व्यालोकयन् पुत्रिकाः ।
यस्मिन् मध्यमपूर्वकौतुकशतैः क्षिप्तान्तरात्मा चिराद्
द्वारस्थैरिव धारितः प्रविशति प्रायेण सर्वो जनः ॥ १९ ॥

सर्वत्र निर्मलतमोपलबिम्बितानि
स्वान्येव पुष्पबलिजूंषि वपूंषि वीक्ष्य ।
संघट्टकष्टचकिताः प्रतिपालयन्तो
मध्यं चिरेण खलु यस्य विशन्ति मुग्धाः ॥ २० ॥

विश्वं निर्दोषषट्कं किमपि विदधतो देवदेवस्य पादा-
नाश्लिष्यन् बाह्यभित्तिप्रतिहतिवलनप्राप्तमध्यैः कराग्रैः ।
एणाङ्कस्त्यक्तशङ्कः पतति मणिभुवि प्राङ्गणस्य क्षपायां
प्राप्तप्रौढिं कलङ्कं विघटयितुमना यत्र बिम्बच्छलेन ॥ २१ ॥

अन्तर्लब्धप्रवेशैः करनिकरभरैर्भंशयन्नन्धकार-
प्राग्भारं देवमूर्त्तिं बहिरपि नमतां दर्शयन् सप्रकाशम् ।
उत्तुङ्गे संमुखायाः प्रतिनिदधदयं यत्र रत्नाश्मभित्तेः
सौवर्णस्यांशुमाली कलयति करणिं प्रत्यहं दर्पणस्य ॥ २२ ॥

वैदूर्याश्मप्रणालीमुखमकरतटैर्घ्राणपात्रैकमित्रं
यस्मान्निर्गच्छदच्छं स्नपनविधिभवं केतकीपुष्पपाथः ।
दिग्लोलानीलभासो बहुलपरिमलाकृष्टभृङ्गप्रसङ्ग-
भ्रान्त्या हस्तैः किरन्त्यः पुरहरिणदृशो मौलिभिः संस्पृशन्ति ॥ २३ ॥

प्रत्यारावैः सकेकाश्चलचमरमहोमांसलं पृष्ठपीठे
बिभ्राणाश्चित्रवर्णं विविधमणिभवं कान्तिवीचीकलापम् ।
नृत्यन्तो द्वारवेदीतटभुवि कृतकं बर्हिणः प्रेक्षकाणां
नेत्राण्याक्षिप्य नित्यं विदधति सरुषं यत्र शैलूषलोकम् ॥ २४ ॥

जालीरन्ध्रप्रविष्टद्युतिचयखचिताच्चन्द्रकान्ताश्मक्लृप्ता-
दूर्ध्वस्थाद्दुग्धमुग्धं जिनशिरसि पयः पातयंश्छत्रकुम्भात्
कुर्वन्नक्षत्रबिम्बैरजिरमणिभुवां दिव्यपुष्पोपहारं
यत्र व्योमस्थ एव स्नपनविधिमहो श्वेतरोचिः करोति ॥ २५ ॥

यस्मिन् वितानगतरूपकबिम्बभाजः स्तम्भानुपेत्य विकटस्फटिकप्रकृष्टान्
दौवारिकभ्रमवशादनुकूलयन्ति मध्यप्रवेशरभसैर्नगरस्य नार्यः ॥ २६ ॥

नीलाश्मभित्तिवलयप्रतिबिम्बितस्य
पार्श्वं प्रभोर्विहितकेतकशेखरस्य ।
शेषाप्रसूनकलनाय करं क्षिपन्त्यो
ग्राम्या दिशन्ति किल यत्र न कस्य हास्यम् ॥ २७ ॥

यत्रावासमुपेयुषो भगवतः पार्श्वस्य पुण्याद्भुत-
प्राप्यैः स्नात्रजलोर्मिभिः सकृदपि स्नाताः कुरङ्गीदृशः ।

काश्चित्पूर्णसमृद्धयः सतनयाः काश्चिच्चिरं काश्चन
क्षीणाशेषरुजो भवन्ति विलसत्सौभाग्यभाजः पराः ॥ २८ ॥

जङ्घालैः किरणोर्मिभिः शितिमणीनाकल्पगान् मौक्तिक-
च्छयान् मौक्तिकगुच्छकान् शितिमणिच्छायान् मुहुः कुर्वतः ।
देवाद्यत्र शशाङ्ककान्तवपुषः शेषः समालम्बते
शेषाद् गारुडरत्ननिर्मिततनोर्देवः पुनस्तां श्रियम् ॥ २९ ॥

दिक्चक्राक्रमणप्रमोदितजगच्चेतोभिराच्छोटिता-
स्तेजोभिर्बहलांशुमांसलमणिप्रालम्बलम्बात्मभिः ।
शेषाहेरिव देवमूर्द्धनि कृतच्छत्रस्य संदर्शनात्
यत्र स्नेहभृतोपि बिभ्रति सदा मन्दां शिखां दीपकाः ॥ ३० ॥

आवेशं संहरन्तः शशिमणिवपुषः स्तम्भवेदीविटण्क-
स्थालीविश्रान्तिभाजः प्रतिदिशमनिशं तामसं यत्र दीपाः ।
आतन्वन्तः पतङ्गप्रथितमुभयमप्यात्महासप्रयासं
मुञ्चन्ते वीतरागक्रमसविधवशादञ्जनस्नेहमैत्रीम् ॥ ३१ ॥

अस्मिन्नास्थां स धत्तां चिरमधिमनसं यस्य साक्षाद्दिदृक्षा
स्वर्गस्वर्णाद्रिकूटस्फटिकगिरितटीरोहणान्तःस्थलीषु ।
आरुह्योत्तुङ्गशृङ्गां गुरुशिखरशिखां यत्र देशांतरस्था-
नित्थं संबोधयन्ति प्रचलपटमयैः पाणिभिः केतुदण्डाः ॥ ३२ ॥

यस्मिन् गाङ्गेयकुम्भव्रजवमितमहः काण्डसंश्लेषदोषाद्
दिक्चक्राक्रान्तिधीरैः शशिनि सहगते पीतिमानं करौघैः ।
निद्रालून् केलिकीरांस्तरजललवांश्चन्द्रकान्तप्रकोष्टान्
ज्योत्स्नालोलांश्चकोरान्नगरमृगदृशो वीक्ष्य रात्रिं विदन्ति ॥ ३३ ॥

श्रुत्वा श्रुत्वा वहद्भिः पुलकबहलितां गात्रयष्टिं समाजै-
र्लोकानां वर्ण्यमानां गुरुविभवजितस्वर्णसौभाग्यलेखाम् ।

दृष्टुं स्वां रूपलक्ष्मीं स्तबकितकुतुकोत्ताननेत्रैकपेयां
प्रातः प्रातर्यदन्तः प्रतिफलति बहिर्दर्पणोद्भासिभित्तेः ॥ ३४ ॥

पापीयान् प्रत्यहं ते गुरुशिखरशिरः संस्पृशाम्यग्रपादैः
सूर्यग्रावस्फुलिङ्गैर्यदपि विनमतस्त्रासमासादयामि ।
तन्मे सर्वं विसोढुं प्रभवति भगवान् विश्वलोकैकबन्धु-
र्यत्रैवं तिग्मभानुर्जिनमनुनयते बिम्बितः प्राङ्गणोर्व्याम् ॥ ३५ ॥

श्रीमान् देवाधिदेवस्त्रिजगदभयभूर्विश्वविश्वकैमित्रं-
यत्रास्ते तत्र दौःस्थ्यं किमिदमसुमतामाधितो व्याधितो वा ।
इत्युग्रं हन्तुमन्तश्चररिपुनिकरं पापपाथोधिसेतून्
प्रत्यूहव्यूहकेतून् वहति यदनिशं स्कन्धबन्धेषु दण्डान् ॥ ३६ ॥

चञ्चच्चन्द्रोदयाढ्यं सवृषमुनिगणं चारुचित्रं सकुम्भं
भास्वत्ताराभिरामं समकरमिथुनं दीप्तसिंहं सकेतुम् ।
स्वर्वर्त्मोल्लासिताशं सगुरुकविबुधं मङ्गलोद्बोधहेतुः
किं वा दृष्टान्तमुच्चैः सतुलमनुकरोत्यम्बरस्य श्रियं यत् ॥ ३७ ॥

उन्मीलद्दृष्टितेजःशमितमनसिजं विष्टपारब्धसेवं
देवं प्राप्योरगेन्द्रस्फुटमणिकिरणश्रेणिधौतोत्तमाङ्गम् ।
अम्बां बिभ्रत्कुमारव्यतिकरसुभगां सिंहपृष्ठाधिरूढां
शोभां धत्ते हिमाद्रेर्यदिह शिखरभूकोटिलीढाम्बरस्य ॥ ३८ ॥

धारानुकारिधवलाश्ममयूखपातैर्धारागृहं तदिदमित्यवधार्य यत्र ।
कौसुम्भचीनवसनाः सुदृशो बहिःस्था व्याख्याविलाससदनश्रियमापिबन्ति

त्रातस्त्रातव्यमेतत्त्रिभुवनमपि ते किन्तु तीव्रैर्महोभि-
र्नित्यं संतप्यमाने झटिति मयि कृपां नाथ कर्तुं यतेथाः ।
एवं देवं प्रवक्तुं तरणिमणिमयीर्दीपयन् धूपपात्री-
र्यस्याभ्यर्णेषु भानुर्भ्रमति वसुभरैः पूरयन् कोशदेशान् ॥ ४० ॥

प्रेक्षामण्डपमूर्द्धगां शिखरगां दण्डोर्ध्वगां कूटगां
दृष्ट्वा बिम्बगतां तले मणिशिले स्वर्णस्य कुम्भावलीम् ।
स्नानाम्भःकलशान् बहिर्विनिहितान् पश्यन् जरन् यामिको
मुग्धश्चौरभिया निषेधति जनान् यत्रादृतो भ्राम्यतः ॥ ४१ ॥

स्तम्भेषु केतकदलग्रथितेषु हन्त
भारो महान् कथममीषु निवेशितोऽयम् ।
इत्थं सविस्मयमनस्तरलानि यत्र
व्याख्यागृहं शिशुकुलानि विलोकयन्ति ॥ ४२ ॥

क्रामत्युग्रानवाप्य ध्वजपटपटलोद्धूतवाताभिघातान्
दिक्चक्रं चक्रवाले द्युमणिमणिभुवां जातवेदः कणानाम् ।
दुर्वर्णस्तम्भरोचिः प्रचयपरिचयश्वेतितोष्णांशुमूर्त्ते-
र्यस्योर्ध्वं चन्द्रतारानिकरपरिकरा व्योमलक्ष्मीर्दिवापि ॥ ४३ ॥

अत्रास्ते देवराजः खलु मम न ततो राजराजस्य धर्तुं
लक्ष्मीः स्वस्मिन्निशांते समुचितमखिलस्वर्गिवर्गार्च्यपादः ।
इत्यौचित्यार्चनीयत्रिभुवनजनतामौलिरत्नं कुबेर-
श्चिक्षेपाक्षेपमुच्चैर्महसि निजनिधीन् यत्र कुम्भच्छलेन ॥ ४४ ॥

शोणग्रावांशुजालैः क्रमकमलतले यावकश्रीर्ललाट-
प्रान्ते सिन्दूररेखा मसृणघुसृणभूरङ्गभागेऽगरागः ।
कौसुम्भी चीनपट्टे द्युतिरधरदले हारि ताम्बूलमित्थं
यस्मिन् वैधव्यभाजोप्यविधववनितामण्डनाः पौरनार्यः ॥ ४५ ॥

पुष्पं यस्मिन् कनककमलान्यंशुकं चीनवासः-
स्नानस्याम्भः कुसुमरजसो दीपिकारत्नरोचिः ।
आकल्पश्रीर्विविधमणयो रक्षकाः क्षेत्रपाला
धूपक्षोदो मृगमदकणाः पूजकाः क्ष्माभुजश्च ॥ ४६ ॥

निर्मोकान् मन्यमानाः सरभसमनसः संहरन्ते मयूराः
कीराः कर्षन्ति पाकप्रणयपरिणमद्दाडिमीबीजबुद्धया ।
ज्योत्स्नाभ्रान्त्या चकोराः प्रतिनिशमनिशं चञ्चुभिर्विक्षिपन्ते
मुक्तादामावचूलान् विविधमणिगृहद्वारदेशेषु यस्मिन् ॥ ४७ ॥

यस्मिन्नारब्धनीडान् द्युमणिमणिशिलापुत्रिकाः पाणिपद्म-
प्रान्तोन्मुक्तैः स्फुलिङ्गैर्नवकनकमयीर्गोलिकास्तर्जयद्भिः ।
यातायातानि मध्ये क्रिमपि विदधतस्त्रासन्त्यः शुकानां
पोतान्निर्व्याजशांतं मुनिनिकरमपि प्रत्यहं हासयन्ति ॥ ४८ ॥

द्वेषोन्मेषं वहद्भिर्द्विषति सुहृदि च प्रेमसीमानमन्यै-
र्देवैः कार्यं किमेभिस्तुलितजनपदाचारसंस्कारविस्त्रैः ।
देवः सेव्योऽयमेकः समसुहृदहितः प्राप्तसंसारपारो
यस्येत्थं केतुदण्डः कथयति जगते किङ्किणीनां निनादैः ॥ ४९ ॥

यत्राभ्यर्णे कृतवसतयो गीतवादित्रनृत्य-
प्रेक्षाक्षिप्ताः प्रथमवयसः पौरविप्रादिवध्वः ।
कर्मक्रुद्धश्वसुरगृहिणीवाग्भिरुच्चावचाभि-
र्माद्यन्मन्युग्लपितमनसोऽप्यापतन्त्येव भूयः ॥ ५० ॥

प्राप्यांस्तीव्रैस्तपोभिर्भवशतविहितैर्देवलोकोपभोगान्
श्रद्धालूनां जिनाङ्घ्रिस्तुतिरतमनसां मर्त्यभावेऽपि कर्तुम् ।
आरूढान् व्योमपीठीं हठहणकृते संपदां स्वर्गजानां
बाहुस्तम्भानिवोर्ध्वान् वहति यदलघूनंसदेशेषु दण्डान् ॥ ५१ ॥

कम्प्राणां वातघातैर्महदपि हरितां चक्रवालं समन्ता-
दाक्रामत्यक्रमेण प्रवरमरकतस्तम्भधाम्नां प्रताने ।
कृच्छ्रादाकृष्य चन्द्रं तृणकवलतृषा द्वारवेदीं प्रपन्न-
स्त्रस्यन् कण्ठीरवेभ्यः प्रथयति सुदृशां यत्र हास्यं कुरङ्गः ॥ ५२ ॥

आकीर्णां स्वर्णकुम्भैः शशिमणिशिखरोद्गीर्णरोचिःस्रवन्तीं-
व्यालोक्य व्योमगङ्गामिव कनकपयोजन्मराजीविभूषाम् ।
स्थित्वा स्थित्वा व्रजद्भिर्जलकनकधिया सप्तिभिर्नीयमानो
यन्मूर्ध्नि स्थानलीलां रचयति तरणेर्दीर्घकालं पताकी ॥ ५३ ॥

गन्धाकृष्टालिजालैस्त्रिदशपतिशिरःशेखरस्रस्तदाम-
स्तोमैरभ्यर्चितं ते पदकमलमहं नाथ नित्यं दिदृक्षुः ।
एणः किं त्वेष वैरी त्रसति हरिकुलाद्भद्रपीठीनिषण्णा-
दित्येवं यत्र देवं प्रणिगदति शशी बिम्बितो द्वारवेद्याम् ॥ ५४ ॥

यस्मिन् शृङ्गस्थलीनां वियति विलुलिते चन्द्रकान्तांशुपुञ्जे
तिष्ठन्तो वारवारं प्रविलुठनकृते सैकतस्य भ्रमेण ।
साटोपध्वानशुष्यन्मुखकुहरतलं व्योमपारं यियासो-
स्तीव्रांशोः सप्तयस्ते किमपि फणिरिपोरग्रजं क्लेदयन्ति ॥ ५५ ॥

अम्भःशोभाहराणां मुहुरतिसरलं भ्राम्यतां भङ्गजालै-
राकीर्णं चन्द्रकान्तप्रभवतलशिलादेहलीकुम्भभासाम् ।
मान्येभ्यः शङ्कमनाः सचकितचरणन्यासमुत्क्षिप्य वासः-
प्रान्तान् श्रोणीविलम्बान् कुलकमलदृशो यस्य मध्यं विशन्ति ॥ ५६ ॥

यामिन्यां यत्र लोकाः प्रतिकलविगलच्चन्द्रकान्ताम्बुपातै-
र्व्यस्तन्यस्तातपत्राः शिरसि मधुमयं गीतमाकर्णयन्ति ।
सूर्याश्मोच्छालितेभ्यः पुनरहनि लसज्जातवेदःकणेभ्यः
संत्रस्ताः पाणिपद्मस्थितजलकरकास्तोरणं सञ्जयन्ति ॥ ५७ ॥

यस्मिन्नीलाश्मपूरे तिमिर इव पुरो लोलहस्तं भ्रमन्त्यः
क्वापि स्वच्छाश्मभिन्नां क्वचिदलिकतटीं पाणिभिः पीडयन्त्यः ।
आत्मीयं क्वापि बिम्बं परमनुजभिया दत्तफालं विलङ्घ्य
क्रामन्त्यः पण्यनार्यो निकटभवविटांस्तन्वते स्मेरवक्त्रान् ॥ ५८ ॥

बद्धावासस्य यत्र त्रिजगदधिपतेः पार्श्वनाथस्य पाथः-
कुम्भैः श्राद्धाः शशाङ्कोपलरजतमयैर्मज्जनं कल्पयन्तः ।
पश्यन्तः कुम्भगर्भाद् द्युतिममृतसितां धारया देवमौलौ
भूयो भूयः पतन्तीं न सलिलविरहेऽप्यावहन्ते विरामम् ॥ ५९ ॥

सूर्यग्रावोत्थितानां चलचमरमरुद्विस्फुरच्चापलानां
खेलन्नर्चिःकणानां पणहरिणदृशां भालरङ्गे समूहः ।
यस्मिन् देवानुभावाज्ज्वलयति न परं वल्लरीः कुन्तलानां
पुष्णाति स्वर्णपुष्पप्रकरपरिचितं किन्तु शोभाकलापम् ॥ ६० ॥

यस्मिन्नावर्त्तयन्त्याः सहृदयहृदयानन्दकान् दृष्टिभेदान्
तन्वन्त्यास्तालगीतस्फुटपटहमृदङ्गानुगां लास्यलक्ष्मीं ।
नृत्यन् बिम्बोपनीतैर्नवनवकरणैर्हस्तचारीप्रपञ्चै-
र्नर्त्तक्याः स्तम्भ एकः स्पृशति रजतभूर्नर्त्तनाचार्यलीलाम् ॥ ६१ ॥

वल्गामुन्मथ्य रथ्यैः प्रतिहतगतिना भानुना निन्द्यमानो
युद्धश्रद्धैः प्रतीभप्रभवरवधिया दिग्गजैर्नन्द्यमानः ।
यस्याद्वैतं त्रिलोक्यामुपरमविमुखो घोषयन्नुच्चघोषं
श्रद्धालूनां त्रिसन्ध्यं पटुपटहरवो धूपवेलां ब्रवीति ॥ ६२ ॥

कूपस्तम्भानुकारं स्पृशति सितपटोद्भासितस्वर्णदण्डे
तन्वाने कान्तिदृष्टिं दिशि दिशि कलशे कर्णधारे शिरःस्थे ।
लावण्याद्वैतभाजि स्फटिकमणिशिलाराशिरोचिःपयोधौ
पूर्णं रत्नैरनन्तैर्वहति यदनिशं यानपात्रस्य लक्ष्मीम् ॥ ६३ ॥

स्तुत्याभिर्मर्त्यसार्थैरनिमिषनयनाम्भोरुहाभिः समन्तात्
पाञ्चालीभिः समेतैः स्फुटमणिगुरुभिर्मध्यमध्यं विमानैः ।
उन्मीलद्भद्रवेदीप्रणयिहरिहयोत्कृष्टमष्टापदाढ्यं
कृत्वाधः स्वर्गिधामस्थितममृतसमुत्पत्तिगुर्व्यां यदुर्व्याम् ॥ ६४ ॥

नीतान्यत्यन्तरूढैरवचनविषयं सात्त्विकैर्विक्लवत्वं
साक्षादस्तानुषंगान्यपि निकटबृहल्लोकलज्जावशेन ।
बिम्बान्यन्योन्यमच्छस्फटिकमणिशिलास्तम्भयष्टिप्रतिष्ठा-
न्याश्लिष्याश्लिष्य यस्मिन् विदधति मिथुनान्यङ्गकण्डूविनोदम् ॥ ६५ ॥

भित्तिस्तम्भप्रकोष्ठान् स्फुटरुचिपटलीमैत्र्यरोचिष्णुदेहान्
चक्षुःसान्मुख्यभाजः प्रतिनिधितरलान् सादरं वीक्षमाणः ।
कोणादिच्छादितानामपि मुदममुदं तुष्टरुष्टाननानां
यस्मिन् गन्धर्वलोकः कलयति बहिरप्यासितो मध्यगानाम् ॥ ६६ ॥

गीतज्ञैर्वार्यमाणैरपि किमपि जिनस्याज्ञया श्राद्धलोकै-
र्घण्टानां ताडितानां प्रतिरवमुखरस्तारटङ्कारपूरः ।
तांस्तान् क्लेशोपनीतान् श्रुतिषु मधुमुचो गेयवाद्यप्रभेदान्
व्यर्थीकुर्वन् सशोकं विरचयति चिरं यत्र गन्धर्वलोकम् ॥ ६७ ॥

मुह्यन्त्यो नीलभासि द्रुततरगतयो द्वारि सूर्योपलानां
हृष्यन्त्यः पुत्रिकासु प्रचकितमनसः पीठपञ्चाननेभ्यः ।
क्लामन्त्यः श्राद्धबाधैः पुलकितवपुषो बल्लभाङ्गानुषङ्गै-
र्नृत्यन्त्यस्तूर्यनादैर्विदधति सुदृशो यत्र यूनां प्रमोदम् ॥ ६८ ॥

स्वां स्वां निर्वर्ण्य भित्तौ प्रतीकृतिरचनां प्रेयसीविभ्रमेण
भ्रान्त्वा भ्रान्त्वा प्ररोहन्नवनवपुलकं यत्र नृत्यन्ति सद्यः ।
आरावैस्तारमन्द्रैर्विधुरितहरितां केकिपारापतानाम्
वृन्दान्यालोक्य कस्कः कलयति न मुदं तीव्रशोकोऽपि लोकः ॥ ६९ ॥

यस्य श्रोतुं गुणौघं त्रिभुवनमहितं शंसितुं चारिमाणं
नन्तुं पूजां च कर्त्तुं यदधिनिवसतो देवदेवस्य भूयः ।
जम्भारातिः सदैव स्पृहयति मनसा लोचनानामिवोद्यद्-
बाष्पस्नातः सहस्रं श्रुतिरसनशिरःपाणिपङ्केरुहाणाम् ॥ ७० ॥

श्राद्धाः पुण्यविधित्सया गुरुरुजो रोगापहारेच्छया
दक्षाः शिल्पदिदृक्षया कुवपुषः सौभाग्यभाग्याशया ।
क्षीणार्था धनकाम्यया रसजुषः संगीतकश्रद्धया
भृत्याः प्राभवलिप्सया तनुभृतो यत्रासते संततम् ॥ ७१ ॥

देवोऽयं कलधौतजः शशिशिलास्तम्भा अमी पुत्रिका
सेयं चञ्चलकङ्कणा गृहमिदं नाट्यस्य दृश्यावधिः ।
व्याख्यासंसदियं विरामममकरोन्निर्माय यां सूत्रकृत्
त्रैलोक्याद्भुतमीक्षतां पुनरमुं राजेव चित्रालयम् ॥ ७२ ॥

एतान् पश्यत चीनचीररचितांश्चन्द्रोदयान् मौक्तिक-
प्रालम्बः पुनरेष यस्य घटने ब्रह्मापि जिह्मायते ।
यक्षेन्द्रश्च महाबलः पुनरयं सत्यावपातो नृणां
यत्रैवं द्रविणाशया विवृणुते स्त्रैणाय देवार्चकः ॥ ७३ ॥

आत्मीयं वीक्ष्य कान्ताप्रतिनिधिसविधे बिम्बमाक्रीडमानं
तत्कालोद्बुद्धकम्पां परपुरुषधिया गात्रयष्टिं वहन्तः ।
आघ्नन्तश्चञ्चुकाण्डैरथ नखकुलिशैरत्नभित्तीः सचित्रा
बाधन्ते रक्षकाणां गणमरुणदृशो यत्र नित्यं विहङ्गाः ॥ ७४ ॥

अस्ति स्वस्तिप्रशस्तिः शिवपुरसरणिः कार्मणं लोचनानां
तन्त्रं मन्त्रोऽथ लक्ष्म्या हठहरणपविधौ नाथ चैत्यं पृथिव्याम् ।
एवं यस्य स्वरूपं सदसि निशमयन् जम्भभेदी सुरेभ्यः
प्रत्यूहव्यूहमन्तः कलयति मधुरां तुम्बुरोर्गानकेलिम् ॥ ७५ ॥

तांस्तान् दृश्यावतंसांस्तुहिनगिरिकुबेराद्रिहेमाचलादीन्
भूयो भूयोऽवलोक्य प्रशममुपययौ कौतुकं चेत्तदास्व ।
नोचेत्काञ्चिद्विभूषां कुरु हृदयहरीं तां व्रजामो धरित्री-
मित्थं स्वां स्वां पुरन्ध्रीमभिदधति मुहुर्यत्र यात्रासु देवाः ॥ ७६ ॥

यस्यालोकादशेषाद्भुतसलिलनिधेरुग्रमाहात्म्यतो वा
नासौ प्राणी न योऽभूत्प्रमदपरमना भूर्भुवःस्वस्त्रयेऽस्मिन् ।
शेषे पार्श्वस्य पार्श्वं सततमधिगते भूतधात्रीमधस्ता-
देकः शश्वद्दधानो मनसि यदि परं दुःस्थित कूर्मराजः ॥ ७७ ॥

यत्र स्नात्रस्य मन्त्रैस्त्रिजगदसुमतां क्षोभयन्त्रैकमित्रै-
र्बिभ्रत्प्रेङ्खामकाण्डे विविधमणिमयं भद्रपीठं निरीक्ष्य ।
आयुःसीमाभिशंकी मनसि स भगवान् पाककान्तालकश्री-
कीनाशः शेखरस्थैर्विकसितकुसुमैर्लभ्यते स्वास्थ्यमिन्द्रः ॥ ७८ ॥

भ्रातः कालं कियन्तं त्वमपि वह महीभारमागत्य दृश्यां
दृष्ट्वा चैत्यस्य लक्ष्मीमहमपि सफलं जन्म किञ्चित्करोमि ।
एवं शेषस्य याञ्चां विरचयितुमनाः प्राहिणोत्कूर्मराजः
यत्र स्वान्तःपुरस्त्रीर्जिनसविधभृतां पुत्रिकाणां मिषेण ॥ ७९ ॥

अन्योन्यस्य प्रणोदप्रलुलितवसनाकल्पमाल्याङ्गरागः
साबाधं यस्य सर्वो विचरति विपुलायामवत्यां पृथिव्याम् ।
अन्यस्त्रीगात्रयष्टिप्रणयभयवशाद्दूरतस्त्यक्तमार्गाः
श्राद्धैर्लोकैरबाधं कुवलयनयनाः केवलं संचरन्ति ॥ ८० ॥

नैर्मल्यश्रीप्रभावप्रहसितवियतां चन्द्रकान्तोत्तरङ्ग-
प्रान्तानां संगमेन क्वचिदपि नितरामेकदा भग्नमौलिः ।
आकाशेऽपि प्रहारप्रतिभयतरलः कोपि यत्रोर्ध्वबाहुः
सोष्णीषः कोपि कश्चिद्विचरति सुचिरं वामनीकृत्य नेत्रम् ॥ ८१ ॥

अन्योन्याश्लेषिवक्षःस्थलनिबिडहतित्रुट्यदुत्कृष्टमुक्ता-
प्रालम्बभ्रष्टरोचिःस्फुटमणिपटलीशर्करादन्तुरायाम् ।
यद्भूमौ पादवेधव्यसनपरिचयादुल्लसंतो व्रजन्तः
कुर्वन्तीवाङ्गभाजः प्रतिपदपतनं ताण्डवाडम्बराणि ॥ ८२ ॥

मध्यं वा मण्डपो वा बहिरजिरमथो नाट्यलीलागृहं वा
यत्र स्थानं न किञ्चित्प्रसभमसुमतां यन्न रुद्धं सहस्रैः ।
तीव्रांशुग्रावंवेदीतलमनलकणव्रातसंपातदुस्थै-
र्दूरस्थैर्वीक्ष्यमाणं पुनरहनि जनैः शून्यपार्श्वं सदैव ॥ ८३ ॥

गन्धारग्रामगीतध्वनिभिरविरतं यत्र तारं स्पृशद्भिः
श्रद्धाव्यस्तव्यवस्थैरहमहमिकया मङ्गलोल्लूलघोषैः ।
ध्वस्तेऽन्योन्यं विशेषे श्रुतिसदसि सुधावर्षिणि व्यर्थयन्त्यः
किन्नर्यो देवताभ्यः सततगुरुरुषो देवताःकिन्नरीभ्यः ॥ ८४ ॥

अश्मानस्तीव्ररश्मेर्घनतुहिनभरं संहरन्तः सहस्ये
कुर्वन्तो यत्र धूपज्वलनमुपरतक्लेशमुच्चैः प्रशस्याः ।
द्वेष्याश्च च्छिद्रयन्तः शिखिकणनिकरैश्चीनचीरावचूलान्
शैलूषाणां कथंचिज्जनजनितमुदं विक्षिपन्तश्च रङ्गम् ॥ ८५ ॥

गृह्णीध्वं पारिजातप्रभवसुमनसो मानसीयैः पयोभिः
कुम्भानापूरयध्वं कुरुत करिपतेः कल्पनां किञ्चिदग्र्याम् ।
पौलोमि क्षिप्रमेही प्रचलत सबला लोकपालाः पुरस्ता-
दित्थं यस्मिन् यियासोरभसविकसिताः स्वर्गनाथस्य वाचाः ॥ ८६ ॥

हस्तोत्संगोपविष्टस्फुटमणिमुकुटज्योतिरुद्योतिताशा-
मात्मीयां रत्नभित्तावधिरजनि तनुं बिम्बितां वीक्ष्य यस्मिन् ।
एतैत क्षिप्रमन्तर्भवनमभिनवः कोऽप्यदृष्टप्रविष्टः
पूत्कुर्वन्नित्थमुच्चैः क्लमयति निकरं पूजको यामिकानाम् ॥ ८७ ॥

शृंगस्थेभ्यो हरिभ्यः प्रतिभयवशतः कातरः स्वःकरेणु-
र्नश्यन् दैत्यांगनानां मुखकमलवनं नेष्यते हास्यलक्ष्मीम् ।
तस्मादारोढुमुच्चैःश्रवसि हयपतौ साम्प्रतं साम्प्रतं वः
पौलोमी शक्रमेवं निगदति चलितं यस्य यात्रोत्सवाय ॥ ८८ ॥

राकाभर्त्तुर्मयूखैरुपचयमधिकं लम्भिते यस्य चञ्च-
च्चन्द्राश्मस्तम्भभित्तिप्रभवनवरुचां कुट्टिमे व्योमभाजि ।
विश्राम्यन्तो विहङ्गा हिमगिरिशिखरोत्सङ्गवेदीभ्रमेण
क्षोणीपीठे निनादैस्तुमुलितवियतो लोलपक्षाः पतन्ति ॥ ८९ ॥

प्रतिरजनि निशीथे यत्र नैत्रैकलेह्यान्
त्रिदशपुरपुरन्ध्रीरासकान् द्रष्टुकामाः ।
सततमधिवसंत्यो यामिकानां कुटीरे
नगरहरिणनेत्राः प्रेयसः खेदयन्ति ॥ ९० ॥

लब्ध्वा साम्राज्यलक्ष्मीं किमपि कलयतोऽहङ्कृतिं शीतरश्मे-
रुन्मत्तैः कान्तिकाण्डैः स्फटिकजयितयाछन्नतां लम्भितस्य ।
वक्त्राण्याशांगनानां कपिशरुचिवशात्स्स्त्रग्भिरुत्तंसयद्भिः
कुम्भैर्दण्डैश्च हेम्नः प्रथयति जनता यस्य राकासु सत्ताम् ॥ ९१ ॥

यस्मिन् नित्यं निशीथे जिनपतिचरणाम्भोजपूजाविधान-
श्रद्धावर्धिष्णुहर्षात् करमलयविमुखान् कुर्वतस्ताण्डवानि ।
गीर्वाणान् द्रष्टुकामाः सविधसहचरीसंभृतोत्तालमालान्
पौराः स्वर्णोपचारैः प्रहरकमनिशं यामिकानर्थयन्ते ॥ ९२ ॥

यत्रालेख्यसभासु चित्ररचनासौभाग्यसंपादना-
संरम्भः फलमेति शिल्पकृतिनामेकत्र भित्तौ क्वचित् ।
सांमुख्यं भजतां पुनर्मणिशिलाव्यासंगरङ्गत्त्विषाम्
बिम्बोल्लासवशेन चित्रघटना भित्त्यन्तराणामपि ॥ ९३ ॥

भेरीभाङ्कारपूरप्रणयमुकुरितो घोरघोरैः प्रसर्पन्
घण्टाटङ्कारघोषैः प्रतिनदितघनैर्लम्भितो मांसलत्वम् ।
उर्वीमापूर्य तूर्यध्वनिरनवरतं स्मारयन् ताक्ष्र्यपक्ष-
प्रान्ताघातांस्त्रिसन्ध्यं रचयति चकितं यत्र पाताललोकम् ॥ ९४ ॥

पर्वोन्मीलन्महिम्ना गुरुसरलवपुःप्रान्तपीताम्बरेण
स्वर्णव्यासर्पिधाम्ना कृतसततपदं केतुदण्डेन मूर्ध्नि ।
अद्वैतं दैवतेषु प्रसभमभिदधत् पार्श्वनाथस्य दूरा-
दूर्ध्वीभूताङ्गुलीकः कर इव यदिह क्षोणिवध्वा विभाति ॥ ९५ ॥

पश्यंस्त्यक्तनिमेषमद्भुततमांस्तांस्तान्महीमध्यगान्
भूभागानितरेतराङ्गघटनादुत्क्षिप्य देहः परैः ।
मर्त्यत्वेऽपि जिनप्रभाववशतः प्राप्तामरत्वः क्षितिं
पद्भ्यां कश्चिदसंस्पृशंस्तत इतो यस्याङ्गणे भ्राम्यति ॥ ९६ ॥

भाग्यप्रागल्भ्यलभ्यां किमपरममरैरप्यसाध्यामवाच्यां
अश्रद्धेयामशेषत्रिजगदभिनुतां यस्य सौन्दर्यलक्ष्मीम् ।
निध्यायन्निर्निमेषं पुलकघनवपुर्लोचनानां सहस्रम्
स्पष्टं तुष्टाव सृष्टिं क्षितिमधिवसतां मानवानां च शक्रः ॥ ९७ ॥

यस्य ध्वजान् गणयितुं कनकावलीढान्
ऊर्ध्वं शिरोधिमधिकं पथि कुर्वतीनाम् ।
कुम्भाः कुरङ्गकदृशां शिरसः पतन्तो
यूनां चिरं विपणिनां जनयन्ति हास्यम् ॥ ९८ ॥

यस्योत्तुङ्गविटङ्कलीढवियतः पातुं श्रियं पेशलां
दूरोत्तानितकन्धरं निदधतां बद्धानुबन्धा दृशः ।
पौराणामनवेक्षणे मिलदुरःसंघट्टबद्धक्रुधा-
मन्योन्यं नृपवर्त्मनि प्रतिकलं कोलाहलं जायते ॥ ९९ ॥

दक्चक्रचुम्बिभिरुदंशुशशांककान्त भित्तित्विषां पिहितपीठतले प्रतानैः
व्योमस्थमेतदिति बुद्धिरुदेति यत्र देशान्तरादुपयतः सततं जनस्य १००

शेषाहेः शितयः फणामणिभुवः शोणा जिनाङ्गोद्भवाः
श्वेताः काञ्चनकल्पिताङ्गदरुहः पीताः प्रभाराशयः ।

नित्यान् यत्र विचित्रवर्णसुभगान् नेत्रैकगम्यस्थितीन्
बाह्याभ्यन्तरमण्डपेषु तरलांश्चन्द्रोदयान् कुर्वते ॥ १०१ ॥

चञ्चन्नक्षत्रराशिग्रहनिकरपरिक्षिप्तपर्यङ्कभूमि-
र्दण्डेन स्वर्णधाम्ना परिकरितवपुर्मूर्द्धलब्धाम्बरेण ।
मुक्तादामावचूलस्थपुटितविकटप्रान्तकोटेर्निशीथे
श्वेतच्छत्रस्य लक्ष्मीं कलयति निखिलां यत्र राकाशशांकः ॥ १०२ ॥

दिव्यश्रव्यावधीनां द्विषति मधुमुचां वेणुवीणारवाणां
तूर्योद्गीर्णे श्रवांसि स्थगयति निनदे निर्दयास्फारघोरे ।
अन्योन्यं गात्रगाढव्यतिकरनिहताशेषपाणिक्रियाणां
यात्रायां नेत्रनृत्यैर्भवति तनुभृतां यत्र कृत्योपदेशः ॥ १०३ ॥

एणांकांशुनिभां प्रभां जवनिकाभ्रान्त्योत्तरङ्गोद्भवा-
मुत्क्षिप्य प्रविशंति यत्र सरलस्वान्ता जनाः केचन ।
केचिद्रूप्यकपाटसंपुटपरीरोधावबोधाकुलाः
द्वारोद्घाटनिमित्तमन्तिकगतं याचन्ति देवार्चकम् ॥ १०४ ॥

स्वच्छेन्दुग्राववेद्यां विचकिलरुचयः स्वर्णवर्णाः सुवर्ण-
स्तम्भाभ्यर्णेषु नीलोपलतटनिकरे बर्हिणस्कन्धभासः ।
सास्राः सूर्याश्मभाभिः करिषु च चकिता विस्मिताः पुत्रिकाभि-
र्यद्व्याख्यावेशमरङ्गे दधति नटभटीपाटवं पूःपुरन्ध्यः ॥ १०५ ॥

यत्र श्रद्धातुराणामजिरभुवि परिभ्राम्यतां बिम्बयोगात्
व्यालोलां वीक्षमाणो हरितमणिमयीं नेत्रवल्लीं स्फटासु ।
साक्षाद्योगीन्द्रशङ्काप्रभवभयभवद्वेपथुव्यस्तपाणिः ।
पूजां पार्श्वस्य लोको विरचयति सदा पूजकानां करेण ॥ १०६ ॥

मध्ये मामुपनीय दर्शय मुखाम्भोजं कथंचिन्मनाक्
भ्रातर्यामिक कामिकस्य महतस्तीर्थस्य पार्श्वप्रभोः ।

इत्थं यत्र महोत्सवेषु जनतासंघट्टरुद्धाध्वनां
वृद्धानां वचनानि कस्य करुणां वर्षति न श्रोत्रयोः ॥ १०७ ॥

भूम्ना धूनयतोः शिरः प्रतिदिनं व्यालोक्य लोकोत्तरान्
तांस्तान् यत्र विचित्ररत्नसुभगान् कुम्भांस्तथा मण्डपान् ।
साश्चर्यं प्रतितोरणं प्रतिशिलं प्रत्युत्सवं तिष्ठतो-
र्भेदः कोऽपि न लक्ष्यते सहृदयैरागंतुवास्तव्ययोः ॥ १०८ ॥

गीतोद्गारोपहूतश्रुतिभिरभिनवोत्कृष्टनाट्यप्रबन्ध-
प्रारम्भाक्रान्तनेत्रैः स्नपनपरिमलोपार्जितघ्राणमैत्र्यैः ।
नित्यैर्नैमित्तिकैश्च प्रतिदिवसभवैरुत्सवैरेव यस्य
भ्रश्यत्कामार्थकृत्यः स्पृशति पुरजनः कोपि निर्वेदमन्तः ॥ १०९ ॥

व्यालैर्बालान्गजेन्द्रैः कपिकरभरथैर्ग्राम्यसार्थांश्चरित्रैः
श्रद्धालून् देवतानां नृपतिमृगदृशो वासवान्तः पुरीभिः ।
नानानाट्यैर्नटौघान् मरुदसुरभवैः संगरैर्वीरवर्गान्
एकाकिन्येव लोकांस्तरलयंति मुहुर्यत्र चित्रस्य संसत् ॥ ११० ॥

शुभ्रं चन्द्राश्मकान्त्या नवयवहरितं नीलरत्नप्रभाभि-
र्मुक्तादामावचूलैः प्रचलदलिकुलं लब्धमल्लीविलासैः ।
सर्वैरष्टापदस्थैर्मुकुरितकुतुकैर्वीक्ष्यमाणं जिनेन्द्रैः
प्रायः सर्वस्य दृष्टिः प्रविशति रतये यस्य लीलानिशान्तम् ॥ १११ ॥

औत्सुक्यं कामुकानां मनसि विदधती तात्त्विकानां विवेकं
काष्ठामारोपयन्ती मुहुरुपदिशती धार्मिकाणां जुगुप्साम् ।
पाञ्चाली यत्र काचिच्चपलकपिकराकृष्टनीवीनिवेशा
व्रीडां वृद्धासु हास्यं युवतिषु तनुते कौतुकं बालिकासु ॥ ११२ ॥

उष्णीषी लम्बकूर्चो गुरुतरजठरः पीवरोरुस्फिगन्घ्रि
र्निम्नग्रीवोऽल्पकायः प्रलघुमुखशिरोनासिकाकर्णनेत्रः ।

श्रोणीबद्धासिधेनुर्मृगहननचलत्पुत्रिकाभ्यर्णवर्त्ती
यस्मिन्नेकः किरातस्तटघटितवपुर्दृष्टिदोषं रुणद्धि ॥ ११३ ॥

कर्पूरागुरुकल्पमानविविधस्नात्रं भ्रमत्कामिनी
संघट्टत्रुटितार्द्धहाररभसभ्रश्यन्नितम्बम्बरम् ।
वक्षः पीडनलभ्यमानसरणि ज्येष्ठानुषंगत्रपा-
ताम्यत्पौरकुलाङ्गनं नववधूसंप्रार्थ्यमानात्मजम् ॥ ११४ ॥

खेलन्मङ्गलगीति दीव्यदमरीसार्थंपठन्मागधं
नृत्यत्पौरपुरन्ध्रि याचकशतव्यातीर्यमाणाङ्गदम् ।
स्नात्राम्बुग्रहणोच्छलत्पटुचटुव्याहारमुच्चैर्ध्वनन्
नानानाटकमर्दलं प्रतिकलं यद्वर्त्तते सर्वतः ॥ ११५ ॥

आस्तां तावन्मनुष्यः प्रकृतिमलिनधीः शाश्वतालोकचक्षु-
र्वक्तुं वक्त्रैश्चतुर्भिर्विधिरपि किमलं तस्य सौंदर्यलक्ष्मीम् ।
क्षीणाशेषाभिलाषः परमलयमयं स्थानमाप्तोऽपियस्मि-
न्नास्थां श्रीपार्श्वनाथस्त्रिभुवनकुमुदारामचन्द्रश्चकार ॥ ११६ ॥

## ॥ वैराग्यशतकम् ॥

संसारम्मि असारे, नत्थि सुहं वाहिवेयणापउरे ।
जाणंतो इह जीवो, न कुणइ जिणदेसियं धम्मं ॥ १ ॥

अज्जं कल्लं परं परारिं, पुरिसा चिंतंति अत्थसंपत्तिं ।
अंजलिगयं व तोयं, गलंतमाउं न पिच्छंति ॥ २ ॥

जं कल्ले कायव्वं, तं अज्जं चिय करेह तुरमाणा ।
बहुविग्घो हु मुहुत्तो, मा अवरण्हं पडिक्खेह ॥ ३ ॥

ही ! संसारसहावं, चरियं नेहाणुरागरत्ता वि ।
जे पुव्वण्हे दिट्ठा, ते अवरण्हे न दीसंति ॥ ४ ॥

मा सुयह जग्गियव्वे, पलाइयव्वम्मि कीस वीसमेह ? ।
तिण्णि जणा अणुलग्गा, रोगो अ जरा अ मच्चू अ ॥ ५ ॥

दिवसनिसाघडिमालं, आउं सलिलं जियाण घित्तूणं ।
चंदाइच्चबइल्ला, कालरहट्टं भमाडंति ॥ ६ ॥

सा नत्थि कला तं नत्थि, ओसहं तं नत्थि किं पि विन्नाणं ।
जेण धरिज्जइ काया, खज्जंती कालसप्पेणं ॥ ७ ॥

दीहरफणिंदनाले, महियरकेसर-दिसामहदलिल्ले ।
उअ पियइ कालभमरो, जणमयरंदं पुहवि पउमे ॥ ८ ॥

छायामिसेण कालो, सयलजियाणं छलं गवेसंतो ।
पासं कह वि न मुंचइ ता धम्मे उज्जमं कुणह ॥ ९ ॥

कालम्मि अणाईए, जीवाणं विविहकम्मवसगाणं ।
तं नत्थि संविहाणं, संसारे जं न संभवइ ॥ १० ॥

बंधवा सुहिणो सव्वे, पियमायापुत्तभारिया ।
पेयवणाओ नियत्तंति, दाऊणं सलिलंजलिं ॥ ११ ॥

विहडंति सुआ विहडंति बंधवा वल्लहा य विहडंति ।
इक्को कह वि न विहडइ, धम्मो रे जीव ! जिणभणिओ ॥ १२ ॥

अडकम्मपासबद्धो, जीवो संसारचारए ठाइ ।
अडकम्मपासमुक्को, आया सिवमंदिरे ठाइ ॥ १३ ॥

विहवो सज्जणसंगो, विसयसुहाइं विलासललियाइं ।
नलिणीदलग्गघोलिर-जललवपरिचंचलं सव्वं ॥ १४ ॥

तं कत्थ बलं तं कत्थ, जुव्वणं अंगचंगिमा कत्थ ? ।
सव्वमणिच्चं पिच्छह, दिट्ठं नट्ठं कयंतेण ॥ १५ ॥

घणकम्मपासबद्धो, भवनयरचउप्पहेसु विविहाओ ।
पावइ विडंबणाओ, जीवो को इत्थ सरणं से ? ॥ १६ ॥

घोरम्मि गब्भवासे, कलमलजंबालअसुइबीभच्छे ।
वसिओ अणंतखुत्तो, जीवो कम्माणुभावेणं ॥ १७ ॥

चुलसीई किर लोए, जोणीणं पमुहसयसहस्साइं ।
इक्किक्कम्मि अ जीवो, अणंतखुत्तो समुप्पन्नो ॥ १८ ॥

मायापियबंधूहिं, संसारत्थेहिँ पूरिओ लोओ ।
बहुजोणिनिवासीहिं, न य ते ताणं च सरणं च ॥ १९ ॥

जीवो वाहिविलुत्तो, सफरो इव निज्जले तडप्फडइ ।
सयलो वि जणो पिच्छइ, को सक्को वेयणाविगमे ? ॥ २० ॥

मा जाणसि जीव ! तुमं, पुत्तकलत्ताइ मज्झ सुहहेऊ ।
निउणं बंधणमेयं, संसारे संसरंताणं ॥ २१ ॥

जणणी जायइ जाया, जाया माया पिया य पुत्तो य ।
अणवत्था संसारे, कम्मवसा सव्वजीवाणं ॥ २२ ॥

न सा जाई न सा जोणी, न तं ठाणं न तं कुलं ।
न जाया न मुया जत्थ, सव्वे जीवा अणंतसो ॥ २३ ॥

तं किं पि नत्थि ठाणं, लोए वालग्गकोडिमित्तं पि ।
जत्थ न जीवा बहुसो, सुहदुक्खपरंपरं पत्ता ॥ २४ ॥

सव्वाओ रिद्धीओ, पत्ता सव्वे वि सयणसंबंधा ।
संसारे ता विरमसु, तत्तो जइ मुणसि अप्पाणं ॥ २५ ॥

एगो बंधइ कम्मं, एगो वहबंधमरणवसणाइं ।
विसहइ भवम्मि भमडइ, एगु च्चिय कम्मवेलविओ ॥ २६ ॥

अन्नो न कुणइ अहियं, हियं पि अप्पा करेइ न हु अन्नो ।
अप्पकयं सुहदुक्खं, भुंजसि ता कीस दीणमुहो ? ॥ २७ ॥

बहुआरंभविढत्तं, वित्तं विलसंति जीव ! सयणगणा ।
तज्जणियपावकम्मं, अणुहवसि पुणो तुमं चेव ॥ २८ ॥

अह दुक्खियाइं तह भुक्खियाइं जह चिंतियाइं डिंभाइं ।
तह थोवं पि न अप्पा, विचिंतिओ जीव ! किं भणिमो ? ॥ २९ ॥

खणभंगुरं सरीरं, जीवो अण्णो य सासयसरूवो ।
कम्मवसा संबंधो, निब्बंधो इत्थ को तुज्झ ? ॥ ३० ॥

कह आयं कह चलियं, तुमं पि कह आगओ कहं गमिही ।
अन्नुन्नं पि न याणह, जीव ! कुडुंबं कओ तुज्झ ? ॥ ३१ ॥

खणभंगुरे सरीरे, मणुयभवे अब्भपडलसारिच्छे ।
सारं इत्तियमेत्तं, जं कीरइ सोहणो धम्मो ॥ ३२ ॥

जम्मदुक्खं जरादुक्खं, रोगा य मरणाणि य ।
अहो ! दुक्खो हु संसारो, जत्थ कीसंति जंतुणो ॥ ३३ ॥

जाव न इंदियहाणी, जाव न जररक्खसी परिप्फुरइ ।
जाव न रोगवियारा, जाव न मच्चू समुल्लियइ ॥ ३४ ॥

जह गेहम्मि पलित्ते, कूवं खणिउं न सक्कए कोइ ।
तह संपत्ते मरणे, धम्मो कह कीरए ? जीव ! ॥ ३५ ॥

रूवमसासयमेयं, विज्जुलयाचंचलं जए जीयं ।
संझाणुरागसरिसं, खणरमणीयं च तारुण्णं ॥ ३६ ॥

गयकण्णचंचलाओ, लच्छीओ तियसचावसारिच्छं ।
विसयसुहं जीवाणं, बुज्झसु रे जीव ! मा मुज्झ ॥ ३७ ॥

जह संझाए सउणाण संगमो जह पहे अ पहियाणं ।
सयणाणं संजोगा, तहेव खणभंगुरा जीव ! ॥ ३८ ॥

निसाविरामे परिभावयामि, गेहे पलित्ते किमहं सुयामि ।
डज्झंतमप्पाणमुविक्खयामि, जं धम्मरहिओ दिअहा गमामि ॥ ३९ ॥

जा जा वच्चइ रयणी, न सा पडिनियत्तई ।
अहम्मं कुणमाणस्स, अहला जंति राइओ ॥ ४० ॥

जस्सऽत्थि मच्चुणा सक्खं, जस्स वऽत्थि पलायणं ।
जो जाणे न मरिस्सामि, सो हु कंखे सुहेसिया ॥ ४१ ॥

दंडकलियं करिंता, वच्चंति हु राइओ अ दिवसा य ।
आउसं संविलंता, गया वि न पुणो नियत्तंति ॥ ४२ ॥

जहेह सीहो व मियं गहाय, मच्चू नरं णेइ हु अंतकाले ।
ण तस्स माया व पिया व भाया, कालम्मि तम्मि सहरा भवंति॥ ४३ ॥

जीअं जलबिन्दुसमं, संपत्तीओ तरंगलोलाओ ।
सुमिणयसमं च पिम्मं, जं जाणसु तं करिज्जासु ॥ ४४ ॥

संझरागजलबुब्बुओवमे, जीविए य जलबिंदु चंचले ।
जुव्वणे य नइवेगसंनिभे, पावजीव ! किमियं न बुज्झसि ॥ ४५ ॥

अन्नत्थ सुया अन्नत्थ, गेहिणी परियणो वि अन्नत्थ ।
भूयबलि व्व कुडुंबं, पक्खित्तं हयकयंतेण ॥ ४६ ॥

जीवेण भवे भवे मिलियाइ देहाइं जाइं संसारे ।
ताणं न सागरेहिं, कीरइ संखा अणंतेहिं ॥ ४७ ॥

नयणोदयं पि तासिं, सागरसलिलाउ बहुयरं होइ ।
गलियं रूअमाणीणं, माऊणं अन्नमन्नाणं ॥ ४८ ॥

जं नरए नेरइया, दुहाइं पावंति घोरणंताइं ।
तत्तो अणंतगुणियं, निगोयमज्झे दुहं होइ ॥ ४९ ॥

तम्मि वि निगोयमज्झे, वसिओ रे जीव ! विविहकम्मवसा ।
विसहंतो तिक्खदुहं, अणंतपुग्गलपरावत्ते ॥ ५० ॥

नीहरिय कह वि तत्तो, पत्तो मणुयत्तणं पि रे जीव ! ।
तत्थ वि जिणवरधम्मो, पत्तो चिंतामणिसरिच्छो ॥ ५१ ॥

पत्ते वि तम्मि रे जीव !, कुणसि पमायं तुमं तयं चेव ।
जेणं भवंधकूवे, पुणो वि पडिओ दुहं लहसि ॥ ५२ ॥

उवलद्धो जिणधम्मो, न य अणुचिन्नो पमायदोसेणं ।
हा ! जीव ! अप्पवेरिअ, सुबहुं पुरओ विसूरिहिसि ॥ ५३ ॥

सोअंति ते वराया, पच्छा समुवट्ठियम्मि मरणम्मि ।
पावपमायवसेणं, न संचियो जेहिं जिणधम्मो ॥ ५४ ॥

धी धी धी संसारे, देवो मरिऊण जं तिरी होइ ।
मरिऊण रायराया, परिपच्चइ निरयजालाहिं ॥ ५५ ॥

जाइ अणाहो जीवो, दुमस्स पुप्फं व कम्मवायहओ ।
धणधन्नाहरणाइं, घरसयणकुडुंबमिल्हे वि ॥ ५६ ॥

वसियं गिरिसु वसियं, दरीसु वसियं समुद्दमज्झम्मि ।
रुक्खग्गेसु य वसियं, संसारे संसरंतेणं ॥ ५७ ॥

देवो नेरइउ त्ति य, किडपयंगु त्ति माणुसो एसो ।
रूवस्सी य विरूवो, सुहभागी दुक्खभागी य ॥ ५८ ॥

राउ त्ति य दमगु त्ति य, एस सवागुत्ति एस वेयविऊ ।
सामी दासो पुज्जो, खलोत्ति अधणो धणवइ त्ति ॥ ५९ ॥

न वि इत्थ कोइ नियमो, सकम्मविणिविट्ठसरिसकयचिट्ठो ।
अन्नुन्नरूववेसो, नडु व्व परियत्तए जीवो ॥ ६० ॥

नरएसु वेयणाओ, अणोवमाओ असायबहुलाओ ।
रे जीव ! तए पत्ता, अणंतखुत्तो बहुविहाओ ॥ ६१ ॥

देवत्ते मणुअत्ते, पराभिओगत्तणं उवगएणं ।
भीसणदुहं बहुविहं, अणंतखुत्तो समणुभूयं ॥ ६२ ॥

तिरियगइं अणुपत्तो, भीममहावेयणा अणेगविहा ।
जम्मणमरणरहट्टे, अणंतखुत्तो परिब्भमिओ ॥ ६३ ॥

जावंति के वि दुक्खा, सारीरा माणसा व संसारे ।
पत्तो अणंतखुत्तो, जीवो संसारकंतारे ॥ ६४ ॥

तण्हा अणंतखुत्तो, संसारे तारिसी तुमं आसी ।
जं पसमेउं सव्वो-दहीणमुदयं न तीरिज्जा ॥ ६५ ॥

आसी अणंतखुत्तो, संसारे ते छुहा वि तारिसिया ।
जं पसमेउं सव्वो, पुग्गलकाओ वि न तरिज्जा ॥ ६६ ॥

काऊणमणेगाइं, जम्मणमरणपरियट्टणसयाइं ।
दुक्खेण माणुसत्तं, जइ लहइ जहिच्छियं जीवो ॥ ६७ ॥

तं तह दुल्लहलंभं, विज्जुलयाचंचलं च मणुअत्तं ।
धम्मम्मि जो विसीयइ, सो काउरिसो न सप्पुरिसो ॥ ६८ ॥

माणुस्सजम्मे तडिलद्धयम्मि, जिणिंदधम्मो न कओ य जेणं ।
तुट्टे गुणे जह धाणुक्कएणं, हत्था मलेयव्वा अवस्स तेणं ॥ ६९ ॥

रे जीव ! निसुणि चंचलसहाव, मिल्हेविणु सयल वि बज्झभाव ।
नवभेयपरिग्गहविविहजाल, संसारि अत्थि सहु इंदयाल ॥ ७० ॥

पियपुत्तमित्तघरघरणिजाय, इहलोइअ सव्व नियसुहसहाय ।
न वि अत्थि कोइ तुह सरणि मुक्ख !, इक्कल्लु सहसि तिरिनिरयदुक्ख ७१

कुसग्गे जह ओसबिंदुए, थोवं चिट्ठइ लंबमाणए ।
एवं मणुआण जीवियं, समयं गोयम ! मा पमायए ॥ ७२ ॥

संबुज्झह किं न बुज्झह ?, संबोहि खलु पिच्च दुल्लहा ।
न हु उवणमंति राइओ, नो सुलहं पुणरवि जीवियं ॥ ७३ ॥

डहरा वुड्ढा य पासह, गब्भत्था वि चयंति माणवा ।
सेणे जह वट्टायं हरे, एवं आउखयम्मि तुट्टइ ॥ ७४ ॥

तिहुयणजणं मरंतं, दट्ठूण नयंति जे न अप्पाणं ।
विरमंति न पावाओ, धिद्धी धिट्ठत्तणं ताणं ॥ ७५ ॥

मा मा जंपह बहुअं, जे बद्धा चिक्कणेहिं कम्मेहिं ।
सव्वेसिं तेसिं जायइ, हिओवएसो महादोसो ॥ ७६ ॥

कुणसि ममत्तं धणसयणविहवपमुहेसु णंतदुक्खेसु ।
सिढिलेसि आयरं पुण, अणंतसुक्खम्मि मुक्खम्मि ॥ ७७ ॥

संसारो दुहहेऊ दुक्खफलो दुसहदुक्खरूवो य ।
न चयंति तं पि जीवा, अइबद्धा नेहनिअलेहिं ॥ ७८ ॥

नियकम्मपवणचलिओ, जीवो संसारकाणणे घोरे ।
का का विडंबणाओ, न पावए दुसहदुक्खाओ ॥ ७९ ॥

सिसिरम्मि सीयलानिल-लहरिसहस्सेहि भिन्नघणदेहो ।
तिरियत्तणम्मि रण्णे, अणंतसो निहणमणुपत्तो ॥ ८० ॥

गिम्हायवसंतत्तो, रण्णे छुहिओ पिवासिओ बहुसो ।
संपत्तो तिरियभवे, मरणदुहं बहु विसूरंतो ॥ ८१ ॥

वासासु रण्णमज्झे, गिरिनिज्झरणोदगेहि वज्झंतो ।
सीआनिलडज्झविओ, मओसि तिरियत्तणे बहुसो ॥ ८२ ॥

एवं तिरियभवेसुं, कीसंतो दुक्खसयसहस्सेहिं ।
वसिओ अणंतखुत्तो, जीवो भीसणभवारण्णे ॥ ८३ ॥

दुट्ठट्ठकम्मपलया-निलपेरिउ भीसणम्मि भवरण्णे ।
हिंडंतो नरएसु वि, अणंतसो जीव ! पत्तो सि ॥ ८४ ॥

सत्तसु नरयमहीसुं, वज्जानलदाहसीअविअणासुं ।
वसिओ अणंतखुत्तो, विलवंतो करुणसद्देहिं ॥ ८५ ॥

पियमायसयणरहिओ, दुरंतवाहीहिं पीडिओ बहुसो ।
मणुयभवे निस्सारे, विलविओ किं न तं सरसि ? ॥ ८६ ॥

पवणु व्व गयणमग्गे, अलक्खिओ भमइ भववणे जीवो ।
ठाणट्ठाणम्मि समुज्झिऊण धणसयणसंघाए ॥ ८७ ॥

विंधिज्जंता असयं, जम्मजरामरणतिक्खकुंतेहिं ।
दुहमणुहवंति घोरं, संसारे संसरंत जिया ॥ ८८ ॥

तह वि खणं पि कया वि हु, अन्नाणभुअंगडंकिआ जीवा ।
संसारचारगाओ, न य उव्विज्जंति मूढमणा ॥ ८९ ॥

कीलसि कियंतवेलं, सरीरवावीइ जत्थ पइसमयं ।
कालरहट्टघडीहिं, सोसिज्जइ जीवियंभोहं ॥ ९० ॥

रे जीव ! बुज्झ मा मुज्झ मा पमायं करेसि रे पाव ! ।
किं परलोए गुरुदुक्खभायणं होहिसि ? अयाण ! ॥ ९१ ॥

बुज्झसु रे जीव ! तुमं, मा मुज्झसु जिणमयं पि नाऊणं ।
जम्हा पुणरवि एसा, सामग्गी दुल्लहा जीव ! ॥ ९२ ॥

दुलहो पुण जिणधम्मो, तुमं पमायायरो सुहेसी य ।
दुसहं च नरयदुक्खं, कह होहिसि तं न याणामो ॥ ९३ ॥

अथिरेण थिरो समलेण निम्मलो परवसेण साहीणो ।
देहेण जइ विढप्पइ, धम्मो ता किं न पज्जत्तं ? ॥ ९४ ॥

जह चिंतामणिरयणं, सुलहं न हु होइ तुच्छविहवाणं ।
गुणविहववज्जियाणं, जियाण तह धम्मरयणं पि ॥ ९५ ॥

जह दिट्ठीसंजोगो, न होइ जच्चंधयाण जीवाणं ।
तह जिणमयसंजोगो, न होइ मिच्छंधजीवाणं ॥ ९६ ॥

पच्चक्खमणंतगुणे, जिणिंदधम्मे न दोसलेसो वि ।
तह वि हु अन्नाणंधा, न रमंति कया वि तम्मि जिया ॥ ९७ ॥

मिच्छे अणंतदोसा, पयडा दीसंति न वि य गुणलेसो ।
तह वि य तं चेव जिया, ही ! मोहंधा निसेवंति ॥ ९८ ॥

धिद्धी ताण नराणं, विन्नाणे तह गुणेसु कुसलत्तं ।
सुहसच्चधम्मरयणे, सुपरिक्खं जे न जाणंति ॥ ९९ ॥

जिणधम्मो य जीवाणं, अपुव्वो कप्पपायवो ।
सग्गापवग्गसुक्खाणं, फलाणं दायगो इमो ॥ १०० ॥

धम्मो बंधु सुमित्तो य, धम्मो य परमो गुरू ।
मुक्खमग्गपयट्टाणं, धम्मो परमसंदणो ॥ १०१ ॥

चउगइणंतदुहानल-पलित्तभवकाणणे महाभीमे ।
सेवसु रे जीव ! तुमं, जिणवयणं अमियकुंडसमं ॥ १०२ ॥

विसमे भवमरुदेसे, अणंतदुहगिम्हतावसंतत्ते ।
जिणधम्मकप्परुक्खं, सरसु तुमं जीव ! सिवसुहदं ॥ १०३ ॥

किं बहुणा ? जिणधम्मे, जइयव्वं जह भवोदहिं घोरं ।
लहु तरिउमणंतसुहं, लहइ जिओ सासयं ठाणं ॥ १०४ ॥

अज्ञातकर्तृकम्

## ॥ इन्द्रियपराजयशतकम् ॥

सुच्चिअ सूरो सो चेव, पंडिओ तं पसंसिमो निच्चं ।
इंदियचोरेहिं सया, न लुंटिअं जस्स चरणधणं ॥ १ ॥

इंदियचवलतुरंगो, दुग्गइमग्गाणुधाविरे निच्चं ।
भाविअभवस्सरूवो, रुंभइ जिणवयणरस्सीहिं ॥ २ ॥

इंदियधुत्ताणमहो, तिलतुसमित्तं पि देसु मा पसरं ।
जइ दिन्नो तो नीओ, जत्थ खणो वरिसकोडिसमो ॥ ३ ॥

अजिइंदिएहिं चरणं, कट्ठं व घुणेहिं किरइ असारं ।
तो धम्मत्थीहिं दढं, जइअव्वं इंदियजयम्मि ॥ ४ ॥

जह कागिणीइ हेउं, कोडिं रयणाण हारए कोइ ।
तह तुच्छविसयगिद्धा, जीवा हारंति सिद्धिसुहं ॥ ५ ॥

तिलमित्तं विसयसुहं, दुहं च गिरिरायसिंगतुंगयरं ।
भवकोडिहिं न निट्ठइ, जं जाणसु तं करिज्जासु ॥ ६ ॥

भुंजंता महुरा, विवागविरसा किंपागतुल्ला इमे,
कच्छुकंडुअणं व दुक्ख-जणया दाविंति बुद्धिसुहं।
मज्झण्हे मयतिण्हिअ व्व सययं मिच्छाभिसंधिप्पया,
भुत्ता दिंति कुजम्मजोणिगहणं, भोगा महावेरिणो ॥ ७ ॥

सक्का अग्गी निवारेउं, वारिणा जलिओ वि हु।
सव्वोदहिजलेणावि, कामग्गी दुन्निवारओ ॥ ८ ॥

विसमिव मुहम्मि महुरा, परिणामनिकामदारुणा विसया।
कालमणंतं भुत्ता, अज्ज वि मुत्तुं न किं जुत्ता? ॥ ९ ॥

विसयरसासवमत्तो, जुत्ताजुत्तं न जाणइ जीवो।
झुरइ कलुणं पच्छा, पत्तो नरयं महाघोरं ॥ १० ॥

जह निंबदुमुप्पन्नो, कीडो कडुअं पि मन्नए महुरं।
तह सिद्धिसुहपरुक्खा, संसारदुहं सुहं बिंति ॥ ११ ॥

अथिराण चंचलाण य, खणमित्तसुहंकराण पावाणं।
दुग्गइनिबंधणाणं, विरमसु एआण भोगाणं ॥ १२ ॥

पत्ता य कामभोगा, सुरेसु असुरेसु तह य मणुएसु।
न य जीव तुज्झ तित्ती, जलणस्स व कट्ठनियरेण ॥ १३ ॥

जहा य किंपागफला मणोरमा, रसेण वन्नेण य भुंजमाणा।
ते खुट्टए जीविय पच्चमाणा, एओवमा कामगुणा विवागे ॥ १४ ॥

सव्वं विलविअं गीअं, सव्वं नट्टं विडंबणा।
सव्वे आभरणा भारा, सव्वे कामा दुहावहा ॥ १५ ॥

देविंदचक्कवट्टित्तणाइं, रज्जाइं उत्तमा भोगा।
पत्ता अणंतखुत्तो, न य हं तत्तिं गओ तेहिं ॥ १६ ॥

संसारचक्कवाले, सव्वे वि य पुग्गला मए बहुसो।
आहारिआ य परिणामिया य, न य तेसु तित्तो हं ॥ १७ ॥

उवलेवो होइ भोगेसु, अभोगी नोवलिप्पइ ।
भोगी भमइ संसारे, अभोगी विप्पमुच्चइ ॥ १८ ॥

अल्लो सुक्को अ दो छूढा, गोलया मट्टिआमया ।
दो वि आवडिआ कूडे, जो अल्लो तत्थ लग्गइ ॥ १९ ॥

एवं लग्गंति दुम्मेहा, जे नरा कामलालसा ।
विरत्ता उ न लग्गंति, जहा सुक्के अ गोलए ॥ २० ॥

तणकट्ठेहि व अग्गी, लवणसमुद्दो नईसहस्सेहिं ।
न इमो जीवो सक्को, तिप्पेउं कामभोगेहिं ॥ २१ ॥

भुत्तूण वि भोगसुहं, सुरनरखयरेसु पुण पमाएणं ।
पिज्जइ नरएसु भेरव, कलकलतउतंबपाणाइं ॥ २२ ॥

को लोहेण न निहओ, कस्स न रमणीहिं भोलिअं हिअयं ।
को मच्चुणा न गहिओ, को गिद्धो नेव विसएहिं ? ॥ २३ ॥

खणमित्तसुक्खा बहुकालदुक्खा, पगामदुक्खा अनिकामसुक्खा ।
संसारसुक्खस्स विपक्खभूआ, खाणी अणत्थाण उ कामभोगा॥ २४ ॥

सव्वगहाणं पभओ, महागहो सव्वदोसपायट्टी ।
कामग्गहो दुरप्पा, जेणभिभूअं जगं सव्वं ॥ २५ ॥

जह कच्छुल्लो कच्छुं, कंडुअमाणो दुहं मुणइ सुक्खं ।
मोहाउरा मणुस्सा, तह कामदुहं सुहं बिंति ॥ २६ ॥

सल्लं कामा विसं कामा, कामा आसीविसोवमा ।
कामे अ पत्थेमाणा, अकामा जंति दुग्गइं ॥ २७ ॥

विसए अवइक्खंता पडंति संसारसायरे घोरे ।
विसएसु निरविक्खा, तरंति संसारकांतारे ॥ २८ ॥

छलिया अवइक्खंता, निरावइक्खा गया अविग्घेणं ।
तम्हा पवयणसारे निरावइक्खेण होअव्वं ॥ २९ ॥

विषयाविक्खो निवडइ, निरविक्खो तरइ दुत्तरभवोहं ।
देवीदीवसमागय भाउअजुअलेण दिट्ठंतो ॥ ३० ॥

जं अइतिक्खं दुक्खं, जं च सुहं उत्तमं तिलोअम्मि ।
तं जाणसु विसयाणं, वुड्ढिक्खयहेउअं सव्वं ॥ ३१ ॥

इंदियविसयपसत्ता, पडंति संसारसायरे जीवा ।
पक्खि व्व छिन्नपक्खा, सुसीलगुणपेहुणविहुणा ॥ ३२ ॥

न लहइ जहा लिहंतो, मुहल्लियं अट्ठिअं जहा सुणओ ।
सोसइ तालुअरसिअं, विलिहंतो मन्नए सुक्खं ॥ ३३ ॥

महिलाण कायसेवी, न लहइ किंचिवि सुहं तहा पुरिसो ।
सो मन्नए वराओ, सयकायपरिस्समं सुक्खं ॥ ३४ ॥

सुट्ठु वि मग्गिज्जंतो, कत्थ वि कयलीइ नत्थि जह सारो ।
इंदियविसएसु तहा, नत्थि सुहं सुट्ठु वि गविट्ठं ॥ ३५ ॥

सिंगारतरंगाए, विलासवेलाइ जुव्वणजलाए ।
के के जयम्मि पुरिसा, नारीनईए न बुड्डंति ॥ ३६ ॥

सोअसरी दुरिअदरी, कवडकुडी महिलिया किलेसकरी ।
वइरविरोयणअरणी, दुक्खखणी सुक्खपडिवक्खा ॥ ३७ ॥

अमुणिअ मणपरिकम्मो, सम्मं को नाम नासिउं तरइ ।
वम्महसरपसरोहे, दिट्ठिच्छोहे मयच्छीणं ॥ ३८ ॥

परिहरसु तओ तासिं, दिट्ठिं दिट्ठिविसस्स व्व अहिस्स ।
जं रमणिनयणबाणा, चरित्तपाणे विणासंति ॥ ३९ ॥

सिद्धंतजलहिपारंगओ वि, विजिइंदिओ वि सूरो वि ।
दढचित्तो वि छलिज्जइ, जुवइपिसाइहिं खुड्डाहिं ॥ ४० ॥

मयणनवणीयविलओ, जह जायइ जलणसंनिहाणम्मि ।
तह रमणि-संनिहाणे, विद्दवइ मणो मुणीणं पि ॥ ४१ ॥

निअंगमाहिं सुपउराहिं उप्पिच्छमंथरगइहिं ।
महिलाहिं निम्मगाहि व, गिरिवरगरुआ वि भिज्जंति ॥ ४२ ॥

विसयजलं मोहकलं, विलासबिब्बोअजलयराइन्नं ।
मयमयरं उत्तिन्ना, तारुण्णमहन्नवं धीरा ॥ ४३ ॥

जइ वि परिचत्तसंगो, तवतणुअंगो तहा वि परिवडइ ।
महिलासंसग्गिए, कोसाभवणूसिय मुणि व्व ॥ ४४ ॥

सव्वग्गंथविमुक्को, सीईभूओ पसंतचित्तो अ ।
जं पावइ मुत्तिसुहं, न चक्कवट्टी वि तं लहइ ॥ ४५ ॥

खेलम्मि पडिअमप्पं, जह न तरइ मच्छिआ वि मोएउं ।
तह विसयखेलपडिअं, न तरइ अप्पं पि कामंधो ॥ ४६ ॥

जं लहइ वीअराओ, सुक्खं तं मुणइ सुच्चिय न अन्नो ।
नहि गत्तासूअरओ, जाणइ सुरलोइअं सुक्खं ॥ ४७ ॥

जं अज्ज वि जीवाणं, विसएसु दुहासवेसु पडिबंधो ।
तं नज्जइ गुरुआण वि, अलंघणिज्जो महामोहो ॥ ४८ ॥

जे कामंधा जीवा, रमंति विसएसु ते विगयसंका ।
जे पुण जिणवयणरया, ते भीरु तेसु विरमंति ॥ ४९ ॥

असुइमुत्तमलपवाहरूवयं, वंतपित्तवसमज्जफोफसं ।
मेयमंसबहुहड्डकरंडयं, चम्ममित्तपच्छाइअं जुवइअंगयं ॥ ५० ॥

मंसं इमं मुत्तपुरिसमीसं, सिंघाणखेलाइअनिज्झरंतं ।
एअं अणिच्चं किमिआण वासं, पासं नराणं मइबाहिराणं ॥ ५१ ॥

पासेण पंजरेण य, बज्झंति चउप्पया य पक्खीइ ।
इय जुवइपंजरेण य, बद्धा पुरिसा किलिस्संति ॥ ५२ ॥

अहो ! मोहो महामल्लो, जेण अम्हारिसा वि हु ।
जाणंता वि अणिच्चत्तं, विरमंति न खणं पि हु ॥ ५३ ॥

जुवईहिं सह कुणंतो, संसग्गिं कुणइ सयलदुक्खेहिं ।
नहि मुसगाणं संगो, होइ सुहो सह बिडालेहिं ॥ ५४ ॥

हरिहरचउराणणचंदसुर-– खंदाइणो वि जे देवा ।
नारीण किंकरत्तं, कुणंति धिद्धी विसयतिण्हा ॥ ५५ ॥

सीअं च उण्हं च सहंति मूढा, इत्थीसु सत्ता अविवेअवंता ।
इलाइपुत्तं व चयंति जाइं, जीअं च नासंति अ रावणु व्व ॥ ५६ ॥

वुत्तूण वि जीवाणं, सुदुक्कराइं ति पावचरियाइं ।
'भयवं जा सा सा सा,' पच्चाएसो हु इणमो ते ॥ ५७ ॥

जललवतरलं जीअं, अथिरा लच्छी वि भंगुरो देहो ।
तुच्छा य कामभोगा, निबंधणं दुक्खलक्खाणं ॥ ५८ ॥

नागो जहा पंकजलावसन्नो, दट्ठुं थलं नाभिसमेइ तीरं ।
एवं जीआ कामगुणेसु गिद्धा, सुधम्ममग्गे न रया हवंति ॥ ५९ ॥

जह विट्ठपुंजखुत्तो, किमी सुहं मन्नए सयाकालं ।
तह विसयासुइरत्तो, जीवो वि मुणइ सुहं मूढो ॥ ६० ॥

मयरहरो व जलेहिं, तह वि हु दुप्पूरओ इमे आया ।
विसयामिसम्मि गिद्धो, भवे भवे वच्चइ न तत्तिं ॥ ६१ ॥

विसयविसट्टा जीवा, उब्भडरूवाइसु विविहेसु ।
भवसयसहस्सदुलहं, न मुणंति गयं पि निअजम्मं ॥ ६२ ॥

चिट्ठंति विसयविवसा, मुत्तूण लज्जं पि के विगयसंका ।
न गणंति के वि मरणं, विसयंकुससल्लिआ जीवा ॥ ६३ ॥

विसयविसेणं जीवा, जिणधम्मं हारिऊण हा नरयं ।
वच्चंति जहा चित्तयनिवारिओ बंभदत्तनिवो ॥ ६४ ॥

धिद्धी ताण नराणं, जे जिणवयणामयं पि मुत्तूणं ।
चउगइविडंबणकरं, पीयंति विसयासवं घोरं ॥ ६५ ॥

मरणे वि दीणवयणं, माणधरा जे नरा न जंपंति ।
ते वि हु कुणंति लल्लिं, बालाणं नेहगहगहिला ॥ ६६ ॥

सक्को वि नेव खंडइ, माहप्पमडुप्फुरं जए जेसिं ।
ते वि नरा नारीहिं, कराविआ निअयदासत्तं ॥ ६७ ॥

जउनंदणो महप्पा, जिणभाया वयधरो चरमदेहो ।
रहनेमि राईमई, रायमइं कासि ही विसया ॥ ६८ ॥

मयणपवणेण जइ, तारिसा वि सुरसेलनिच्चला चलिया ।
ता पक्कपत्तसत्ताण, इअरसत्ताण का वत्ता ॥ ६९ ॥

जिप्पंति सुहेणं चिय, हरिकरिसप्पाइणो महाकूरा ।
इक्कु च्चिय दुज्जेओ, कामो कयसिवसुहविरामो ॥ ७० ॥

विसमा विसयपिवासा, अणाइ भवभावणाइ जीवाणं ।
अइदुज्जेयाणि इंदिआणि, तह चंचलं चित्तं ॥ ७१ ॥

कलमल- अरइ- असुक्खं, वाही दाहाइ विविहदुक्खाइं ।
मरणं पि अ विरहाइसु, संपज्जइ कामतवियाणं ॥ ७२ ॥

पंचिंदियविसयपसंग करेसि, मणवयणकाय न वि संवरेसि ।
तं वाहिसि कत्तिअ गलपएसि, जं अट्ठकम्म न वि निज्जरेसि॥ ७३ ॥

किं तुमंधो सि किं वा सि धत्तुरिओ,
अहव किं सन्निवाएण आऊरियो ।
अमयसमधम्म जं विसव अवमन्नसे,
विसमविसविसय अमियं व बहुमन्नसे ॥ ७४ ॥

तुज्झ तह नाणविन्नाणगुणडंबरो जलणजालासु निवडंतु जिय निब्भरो ।
पयइवामेसु कामेसु जं रज्जसे, जेहिं पुण पुण वि निरयानले पच्चसे ॥ ७५

दहइ गोसीससिरिखंड छारक्कए, छगलगहणट्ठमेरावणं विक्कए ।
कप्पतरुतोडि एरंड सो वावए, जुज्जि विसएहिं मणुअत्तणं हारए ॥ ७६

अधुवं जीविअं नच्चा, सिद्धिमग्गं विआणिआ ।
विणिअट्टिज्ज भोगेसु, आउं परिमिअमप्पणो ॥ ७७ ॥

सिवमग्गसंठिआण वि; जह दुज्जेआ जीआण पण विसया ।
तह अन्नं किंपि जए, दुज्जेअं नत्थि सयले वि ॥ ७८ ॥

सविडंउब्भडरूवा, दिट्ठा मोहेइ जा मणं इत्थी ।
आयहियं चिंतंता, दूरयरेणं परिहरंति ॥ ७९ ॥

सच्चं सुअं पि सीलं, विन्नाणं तह तवं पि वेरग्गं ।
वच्चइ खणेण सव्वं, विसयविसेणं जईणं पि ॥ ८० ॥

रे जीव ! मइविगप्पिय निमेससुहलालसो कहं मूढ ! ।
सासयसुहमसमतमं, हारिसि ससिसोअरं च जसं ॥ ८१ ॥

पज्जलिअविसयअग्गी, चरित्तसारं डहिज्ज कसिणं पि ।
सम्मत्तं पि विराहिअ, अणंतसंसारिअं कुज्जा ॥ ८२ ॥

भीसणभवकंतारे, विसमा जीवाण विसयतिण्हाओ ।
जीए नडिआ चउदसपुव्वी वि रुलंति हु निग्गोए ॥ ८३ ॥

हा विसमा हा विसमा, विसया जीवाण जेहि पडिबद्धा ।
हिंडंति भवसमुद्दे, अणंतदुक्खाइं पावंता ॥ ८४ ॥

मायिंदजालचवला, विसया जीवाण विज्जुतेअसमा ।
खणदिट्ठा खणनट्ठा, ता तेसिं को हु पडिबंधो ॥ ८५ ॥

सत्तु विसं पिसाओ, वेआलो हुअवहो वि पज्जलिओ ।
तं न कुणइ जं कुविआ, कुणंति रागाइणो देहे ॥ ८६ ॥

जो रागाईण वसे, वसम्मि सो सयलदुक्खलक्खाणं ।
जस्स वसे रागाई, तस्स वसे सयलसुक्खाइं ॥ ८७ ॥

केवल दुहनिम्मविए, पडिओ संसारसायरे जीवो ।
जं अणुहवइ किलेसं, तं आसवहेउअं सव्वं ॥ ८८ ॥

ही संसारे विहिणा, महिलारूवेण मंडिअं जालं ।
बज्झंति जत्थ मूढा, मणुआ तिरिआ सुरा असुरा ॥ ८९ ॥

विसमा विसयभुअंगा, जेहिं डंसिया जिआ भववणम्मि ।
कीसंति दुहग्गीहिं, चुलसीईजोणिलक्खसु ॥ ९० ॥

संसारचारगिम्हे, विसयकुवाएण लुक्किआ जीवा ।
हिअमहिअं अमुणंता, अणुहवंति अणंतदुक्खाइं ॥ ९१ ॥

हा हा दुरंतदुट्ठा, विसयतुरंगा कुसिक्खिआ लोए ।
भीसणभवाडवीए, पाडंति जिआण मुद्धाणं ॥ ९२ ॥

विसयपिवासातत्ता, रत्ता नारीसु पंकिलसरम्मि ।
दुहिआ दीणा खीणा, रुलंति जीवा भववणम्मि ॥ ९३ ॥

गुणकारिआइं धणिअं, धिइरज्जुनियंतिआइं तुह जीव ।
निअयाइं इंदिआइं, वल्लिनिअत्ता तुरंगु व्व ॥ ९४ ॥

मणवयणकायजोगा, सुनिअत्ता ते वि गुणकरा हुंति ।
अनिअत्ता पुण भंजंति, मत्तकरिणु व्व सीलवणं ॥ ९५ ॥

जह जह दोसा विरमइ, जह जह विसएहिं होइ वेरग्गं ।
तह तह विन्नायव्वं, आसन्नं से अ परमपयं ॥ ९६ ॥

दुक्करमेएहिं कयं, जेहिं समत्थेहिं जुव्वणत्थेहिं ।
भग्गं इंदिअसिन्नं, धिइपायारं विलग्गेहिं ॥ ९७ ॥

ते धन्ना ताण नमो, दासो हं ताण संजमधराणं ।
अद्धच्छीपिच्छरिओ, जाण न हिअए खडक्कंति ॥ ९८ ॥

किं बहुणा जइ वंछसि, जीव ! तुमं सासयं सुहं अरुअं ।
ता पीअसु विसयविमुहो, संवेगरसायणं निच्चं ॥ ९९ ॥

पू.श्री. जिनभद्रगणिक्षमाश्रमणविरचितम्

# ।। ध्यानशतकम् ।।

वीरं सुक्कज्झाणग्गि - दड्ढकम्मिंधणं पणमिऊणं ।
जोईसरं सरण्णं, झाणज्झयणं पवक्खामि ॥ १ ॥

जं थिरमज्झवसाणं, तं झाणं, जं चलं तयं चित्तं ।
तं होज्ज भावणा वा, अणुपेहा वा अहव चिंता ॥ २ ॥

अंतोमुहुत्तमेत्तं, चित्तावत्थाणमेगवत्थुम्मि ।
छउमत्थाणं झाणं, जोगनिरोहो जिणाणं तु ॥ ३ ॥

अंतोमुहुत्तपरओ, चिंता झाणंतरं व होज्जाहि ।
सुचिरं पि होज्ज बहु-वत्थुसंकमे झाणसंताणो ॥ ४ ॥

अट्टं रुद्दं धम्मं, सुक्कं झाणाइ, तत्थ अंताइं ।
निव्वाणसाहणाइं, भवकारणमट्टरुद्दाइं ॥ ५ ॥

अमणुण्णाणं सद्दाइ-विसयवत्थूणं दोसमइलस्स ।
धणियं विओगचिंतण - मसंपओगाणुसरणं च ॥ ६ ॥

तह सूलसीसरोगाइ - वेयणाए विजोगपणिहाणं ।
तदसंपओगचिंता, तप्पडिआराउलमणस्स ॥ ७ ॥

इट्ठाण विसयाईण, वेयणाए य रागरत्तस्स ।
अविओगऽज्झवसाणं, तह संजोगाभिलासो अ ॥ ८ ॥

देविंदचक्कवट्टित्तणाइं, गुणरिद्धिपत्थणामईयं ।
अहमं नियाणचिंतण - मण्णाणाणुगयमच्चंतं ॥ ९ ॥

एवं चउव्विहं, रागद्दोसमोहंकियस्स जीवस्स ।
अट्टज्झाणं संसार - वद्धणं तिरियगइमूलं ॥ १० ॥

मज्झत्थस्स उ मुणिणो, सकम्मपरिणामजणियमेयंति ।
वत्थुस्सभावचिंतण - परस्स सम्मं सहंतस्स ॥ ११ ॥

कुणओ व पसत्थालंबणस्स पडियारमऽप्पसावज्जं ।
तवसंजमपडियारं च, सेवओ धम्ममणियाणं ॥ १२ ॥

रागो दोसो मोहो य, जेण संसारहेयवो भणिया ।
अट्टम्मि य ते तिण्णि वि, तो तं संसारतरुबीअं ॥ १३ ॥

कावोय-नील-काला-लेस्साओ नाइसंकिलिट्ठाओ ।
अट्टज्झाणोवगयस्स, कम्मपरिणामजणियाओ ॥ १४ ॥

तस्सऽक्कंदण-सोयण-परिदेवण-ताडणाइं लिंगाइं ।
इट्ठानिट्ठविओगा-विओगवियणानिमित्ताइं ॥ १५ ॥

निंदइ य निजकयाइं, पसंसइ सविम्हओ विभूईओ ।
पत्थेइ तासु रज्जइ, तयज्जणपरायणो होइ ॥ १६ ॥

सद्दाइविसयगिद्धो, सद्धम्मपरम्मुहो पमायपरो ।
जिणमयमणवेक्खंतो, वट्टइ अट्टम्मि झाणम्मि ॥ १७ ॥

तदविरय - देसविरय - पमायपरसंजयाणुगं झाणं ।
सव्वप्पमायमूलं, वज्जेयव्वं जइजणेणं ॥ १८ ॥

सत्तवह-वेह-बंधण-डहणंकण-मारणाइ-पणिहाणं ।
अइकोहग्गहेघत्थं, निग्घिणमणसोऽहमविवागं ॥ १९ ॥

पिसुणा सब्भासब्भूय-भूयघायाइवयणपणिहाणं ।
मायाविणोऽइसंधण-परस्स पच्छन्नपावस्स ॥ २० ॥

तह तिव्वकोहलोहाउलस्स, भूओवघायणमणज्जं ।
परदव्वहरणचित्तं, परलोयावायनिरवेक्खं ॥ २१ ॥

सद्दाइविसयसाहण-धणसारक्खणपरायणमणिट्ठं ।
सव्वाभिसंकणपरो-वघायकलुसाउलं चित्तं ॥ २२ ॥

इयकरणकारणाणुमइ-विसयमणुचिंतणं चउब्भेयं ।
अविरयदेसासंजय-जणमणसंसेवियमहण्णं ॥ २३ ॥

एयं चउव्विहं राग–दोस–मोहाउलस्स जीवस्स ।
रोद्दज्झाणं संसार–वद्धणं नरयगइमूलं ॥ २४ ॥

कावोय–नील–काला लेस्साओ तिव्वसंकिलिट्ठाओ ।
रोद्दज्झाणोवगयस्स, कम्मपरिणामजणियाओ ॥ २५ ॥

लिंगाइ तस्स उस्सण्ण–बहुल–नाणाविहामरणदोसा ।
तेसिं–चिय हिंसाइसु, बाहिरकरणोवउत्तस्स ॥ २६ ॥

परवसणे अहिनंदइ, निरवेक्खो निद्दओ निरणुतावो ।
हरिसिज्जइ कयपावो, रोद्दज्झाणोवगयचित्तो ॥ २७ ॥

झाणस्स भावणाओ, देसं कालं तहाऽऽसणविसेसं ।
आलंबणं कमं, झाइयव्वयं जे य झायारो ॥ २८ ॥

तत्तोऽणुप्पेहाओ, लेस्सा लिंगं फलं च नाऊणं ।
धम्मं झाइज्ज मुणी, तग्गयजोगो तओ सुक्कं ॥ २९ ॥

पुव्वकयब्भासो, भावणाहि झाणस्स जोग्गयमुवेइ ।
ताओ य नाण–दंसण–चरित्त–वेरग्गनियताओ ॥ ३० ॥

णाणे णिच्चब्भासो, कुणइ मणोधारणं विसुद्धिं च ।
णाणगुण–मुणियसारो, सो झाइ सुनिच्चलमईओ ॥ ३१ ॥

संकाइदोसरहिओ, पसमथेज्जाइगुणगणोवेओ ।
होइ असंमूढमणो, दंसणसुद्धीए झाणम्मि ॥ ३२ ॥

नवकम्माणायाणं, पोराणविणिज्जरं सुभायाणं ।
चारित्तभावणाए, झाणमयत्तेण य समेई ॥ ३३ ॥

सुविदियजगस्सभावो, निस्संगो निब्भओ निरासो अ ।
वेरग्गभावियमणो, झाणम्मि सुनिच्चलो होइ ॥ ३४ ॥

निच्चं चिय जुवइ–पसु–नपुंसग–कुसीलवज्जियं जइणो ।
ठाणं वियणं भणियं, विसेसओ झाणकालम्मि ॥ ३५ ॥

थिरकयजोगाणं पुण, मुणीण झाणे सुनिच्चलमणाणं ।
गामम्मि जणाइण्णे, सुण्णे रण्णे व न विसेसो ॥ ३६ ॥

जो (तो) जत्थ समाहाणं, होज्ज मणो-वय-कायजोगाणं ।
भूओवरोहरहिओ, सो देसो झायमाणस्स ॥ ३७ ॥

कालो वि सो च्चिय, जहिं जोगसमाहाणमुत्तमं लहइ ।
न उ दिवसनिसावेलाइ-नियमणं झाइणो भणियं ॥ ३८ ॥

ज च्चिय देहावत्था, जियाण झाणोवरोहिणी होइ ।
झाइज्जा तदवत्थो, ठिओ निसण्णो निवण्णो वा ॥ ३९ ॥

सव्वासु वट्टमाणा, मुणओ जं देसकालचेट्ठासु ।
वरकेवलाइलाभं, पत्ता बहुसो समियपावा ॥ ४० ॥

तो देसकालचेट्ठानियमो, झाणस्स नत्थि समयम्मि ।
जोगाणं समाहाणं, जह होइ तहा जइयव्वं ॥ ४१ ॥

आलंबणाइ वायण - पुच्छण-परियट्टणाऽणुचिंताओ ।
सामाइयाइं सद्धम्मावस्सयाइं च ॥ ४२ ॥

विसमम्मि समारोहइ, दढदव्वालंबणो जहा पुरिसो ।
सुत्ताइकयालंबो, तह झाणवरं समारुहइ ॥ ४३ ॥

झाणप्पडिपत्तिकमो, होइ मणोजोगनिग्गहोईओ ।
भवकाले केवलिणो, सेसाण जहासमाहीए ॥ ४४ ॥

सुनिउणमणाइनिहणं, भूयहियं भूयभावणमणग्घं ।
अमियमजियं महत्थं, महाणुभावं महाविसयं ॥ ४५ ॥

झाइज्जा निरवज्जं, जिणाणमाणं जगप्पईवाणं ।
अणिउणजणदुण्णेयं, नय-भंग-पमाणगमगहणं ॥ ४६ ॥

तत्थ य मइदोब्बलेणं, तव्विहायरिय विरहओ वा वि ।
णेयगहणत्तणेण य, णाणावरणोदएण च ॥ ४७ ॥

हेऊदाहरणासंभवे य, सइ सुट्ठुं जं न बुज्झेज्जा ।
सव्वण्णुमयमवितहं, तह्म वि तं चिंतए मइमं ॥ ४८ ॥

अणुवकयपराणुग्गहपरायणा, जं जिणा जगप्पवरा ।
जियरागदोसमोहा य, णऽण्णहावादिणो तेणं ॥ ४९ ॥

रागद्दोसकसाया ऽऽसवादिकिरियासु वट्टमाणाणं ।
इहपरलोयावाए, झाइज्जा वज्जपरिवज्जी ॥ ५० ॥

पयइठिइपएसाऽणुभावभिन्नं सुहासुहविहत्तं ।
जोगाणुभावजणियं, कम्मविवागं विचिंतेज्जा ॥ ५१ ॥

जिणदेसियाइ लक्खण-संठाणा-ऽऽसण-विहाण-माणाइं ।
उप्पाय-ठिइ-भंगाइ-पज्जवा जे य दव्वाणं ॥ ५२ ॥

पंचत्थिकायमइयं, लोगमणाइनिहणं जिणक्खायं ।
णामाइभेयविहियं तिविहमहोलोयभेयाइं ॥ ५३ ॥

खिइ-वलय-दीव-सागर-नरय-विमाण-भवणाइसंठाणं ।
दोसाइपइट्ठाणं, निययं लोगट्ठिइ विहाणं ॥ ५४ ॥

उवओग लक्खणमणाइ-णिहणमत्थंतरं सरीराओ ।
जीवमरूविं कारिं, भोयं च सयस्स कम्मस्स ॥ ५५ ॥

तस्स य सकम्मजणियं जम्माइजलं कसायपायालं ।
वसणसयसावयमणं, मोहावत्तं महाभीमं ॥ ५६ ॥

अण्णाणमारूएरिय-संजोगविजोग-वीइसंताणं ।
संसारसागरमणोर-पारमसुहं विचिंतिज्जा ॥ ५७ ॥

तस्स य संतरणसहं, सम्मद्दंसणसुबंधणं अणघं ।
णाणमयकण्णधारं, चारित्तमयं महापोयं ॥ ५८ ॥

संवरकयनिच्छिद्दं, तवपवणाइद्धजइणतरवेगं ।
वेरग्गमग्गपडिअं, विसोत्तियावीइ निक्खोभं ॥ ५९ ॥

आरोढुं मुणिवणिया, महग्घसीलंगरयणपडिपुन्नं ।
जह तं निव्वाणपुरं, सिग्घमविग्घेण पावंति ॥ ६० ॥

तत्थ य तिरयण – विणिओगमइयमेगंतियं निराबाहं ।
साभावियं निरुवमं, जह सोक्खं अक्खयमुवेंति ॥ ६१ ॥

किं बहुणा सव्वं चिय, जीवाइपयत्थवित्थरोवेयं ।
सव्वनयसमूहमयं, झाएज्जा समयसब्भावं ॥ ६२ ॥

सव्वप्पमायरहिआ, मुणी खीणोवसंतमोहा य ।
झायारो नाणधणा, धम्मज्झाणस्स निद्दिट्ठा ॥ ६३ ॥

एए च्चिय पुव्वाणं, पुव्वधरा सुप्पसत्थसंघयणधरा ।
दोण्ह संजोगाजोगा, सुक्काण पराण केवलिणो ॥ ६४ ॥

झाणोवरमे वि मुणी, णिच्चमणिच्चाइभावणापरमो ।
होइ सुभावियचित्तो, धम्मज्झाणेण जो पुव्विं ॥ ६५ ॥

होंति कमविसुद्धाओ, लेसाओ पीय–पम्ह–सुक्काओ ।
धम्मज्झाणोवगयस्स, तिव्वमंदाइ–भेयाओ ॥ ६६ ॥

आगम–उवएसा–ऽऽणा–णिसग्गओ जं जिणप्पणीयाणं ।
भावाणं सद्दहणं, धम्मझाणस्स तं लिंगं ॥ ६७ ॥

जिणसाहुगुणकित्तण – पसंसणाविणयदाणसंपन्नो ।
सुअसीलसंजमरओ, धम्मज्झाणी मुणेयव्वो ॥ ६८ ॥

अह खंति–मद्दव–ऽज्जव–मुत्तीओ जिणमयप्पहाणाओ ।
आलंबणाइं जेहिं, सुक्कज्झाणं समारुहइ ॥ ६९ ॥

तिहुयणविसयं कमसो, संखिविउ मणो अणुम्मि छउमत्थो ।
झायइ सुनिप्पकंपो, झाणं अमणो जिणो होइ ॥ ७० ॥

जह सव्वसरीरगयं, मंतेण विसं निरुंभए डंके ।
तत्तो पुणोऽवणिज्जइ, पहाणयरमंतजोगेणं ॥ ७१ ॥

तह तिहुयणतणुविसयं, मणोविसं जोगमंतबलजुत्तो ।
परमाणुम्मि निरुंभइ, अवणेइ तओ वि जिणविज्जो ॥ ७२ ॥

उस्सारियेंधणभरो, जह परिहाइ कमसो हुयासु व्व ।
थोविंधणावसेसो, निव्वाइ तओऽवणीओ य ॥ ७३ ॥

तह विसइंधणहीणो, मणोहुयासो कमेण तणुयम्मि ।
विसइंधणे निरुंभइ, निव्वाइ तओऽवणीओ य ॥ ७४ ॥

तोयमिव नालियाए, तत्तायसभायणोदरत्थं वा ।
परिहाइ कमेण जहा, तह जोगिमणोजलं जाण ॥ ७५ ॥

एवं चिय वयजोगं, निरुंभइ कमेण कायजोगं पि ।
तो सेलेसो व्व थिरो, सेलेसी केवली होइ ॥ ७६ ॥

उप्पाय-ट्ठिइभंगाइ-पज्जयाणं जमेगवत्थुम्मि ।
नाणानयाणुसरणं, पुव्वगयसुयाणुसारेणं ॥ ७७ ॥

सवियारमत्थवंजण - जोगंतरओ तयं पढमसुक्कं ।
होइ पुहुत्तवितक्कं, सवियारमरागभावस्स ॥ ७८ ॥

जं पुण सुणिक्कंपं, निवायसरणप्पईवमिव चित्तं ।
उप्पाय-ट्ठिइ - भंगाइयाणमेगं पि पज्जाए ॥ ७९ ॥

अवियारमत्थवंजण-जोगंतरओ तयं बितियसुक्कं ।
पुव्वगयसुयालंबण-मेगत्तवितक्कमविचारं ॥ ८० ॥

निव्वाणगमणकाले, केवलिणो दरनिरुद्धजोगस्स ।
सुहुमकिरियाऽनियट्टिं, तइयं तणुकायकिरियस्स ॥ ८१ ॥

तस्सेव य सेलेसीगयस्स, सेलो व्व निप्पकंपस्स ।
वोच्छिन्नकिरियम-प्पडिवाइ ज्झाणं परमसुक्कं ॥ ८२ ॥

पढमं जोगे जोगेसु वा, मयं बितियमेकजोगम्मि ।
तइयं च कायजोगे, सुक्कमजोगम्मि य चउत्थं ॥ ८३ ॥

जह छउमत्थस्स मणो, झाणं भण्णइ सुनिच्चलो संतो ।
तह केवलिणो काओ, सुनिच्चलो भण्णए झाणं ॥ ८४ ॥

पुव्वप्पओगओ चिय, कम्मविणिज्जरणहेउतो वा वि ।
सद्दत्थ बहुत्ताओ, तह जिणचंदागमाओ य ॥ ८५ ॥

चित्ताभावे वि सया, सुहुमोवरयकिरियाइ भण्णंति ।
जीवोपओगसब्भावओ, भवत्थस्स झाणाइं ॥ ८६ ॥

सुक्कज्झाणसुभाविअ-चित्तो चिंतेइ झाणविरमे वि ।
णिययमणुप्पेहाओ, चत्तारि चरित्तसंपन्नो ॥ ८७ ॥

आसवदाराए तह, संसारासुहाणुभावं च ।
भवसंताणमणंतं, वत्थूणं विपरिणामं च ॥ ८८ ॥

सुक्काए लेसाए दो, ततियं पुण परमसुक्कलेसाए ।
थिरयाजियसेलेसं, लेसाइयं परमसुक्कं ॥ ८९ ॥

अवहा-संमोह-विवेग-विउस्सग्गा तस्स होंति लिंगाइं ।
लिंगिज्जइ जेहिं मुणी, सुक्कज्झाणोवगयचित्तो ॥ ९० ॥

चालिज्जइ बीभेइ य, धीरो न परीसहोवसग्गेहिं ।
सुहुमेसु न संमुज्झइ, भावेसु न देवमायासु ॥ ९१ ॥

देहविवित्तं पेच्छइ, अप्पाणं तह य सव्वसंजोगे ।
देहोवहिवोस्सग्गं, निस्संगो सव्वहा कुणइ ॥ ९२ ॥

होंति सुहासव-संवर-विणिज्जराऽमरसुहाइं विउलाइं ।
झाणवरस्स फलाइं, सुहाणुबंधीणि धम्मस्स ॥ ९३ ॥

ते य विसेसेण, सुभासवादओऽणुत्तरामरसुहाइं च ।
दोण्हं सुक्काण फलं, परिनिव्वाणं परिल्लाणं ॥ ९४ ॥

आसवदारा संसार-हेयवो जं ण धम्मसुक्केसु ।
संसारकारणाइं, तओ धुवं धम्म-सुक्काइं ॥ ९५ ॥

संवरविणिज्जराओ, मोक्खस्स पहो तवो पहो तासिं ।
झाणं च पहाणंगं तवस्स, तो मोक्खहेऊयं ॥ ९६ ॥

अंबर-लोह-महीणं, कमसो जह मल-कलंक-पंकाणं ।
सोज्झावणयणसोसे, साहेंति जलाणलाइच्चा ॥ ९७ ॥

तह सोज्झाइसमत्था, जीवंबर-लोह-मेइणिगयाणं ।
झाण-जला-ऽणल-सूरा, कम्ममल-कलंक-पंकाणं ॥ ९८ ॥

तापो सोसो भेओ, जोगाणं झाणओ जहा निययं ।
तह ताव-सोस-भेया, कम्मस्स वि झाइणो नियमा ॥ ९९ ॥

जह रोगासयसमणं, विसोसण-विरेयणोसहविहीहिं ।
तह कम्मामयसमणं, झाणाणसणाइजोगेहिं ॥ १०० ॥

जह चिरसंचियमिंधण-मनलो पवनसहिओ दुयं दहइ ।
तह कम्मेंधणममिय, खणेणा झाणाणलो डहइ ॥ १०१ ॥

जह वा घणसंघाया, खणेण पवणाहया विलिज्जंति ।
झाणपवणाबहूया, तह कम्मघणा विलिज्जंति ॥ १०२ ॥

न कसायसमुत्थेहि य, वाहिज्जइ माणसेहिं दुक्खेहिं ।
ईसा-विसाय सोगा-इएहिं झाणोवगयचित्तो ॥ १०३ ॥

सीयायवाइएहिं य, सारीरेहिं सुबहुप्पगारेहिं ।
झाणसुनिच्चलचित्तो, न वाहिज्जइ निज्जरापेही ॥ १०४ ॥

इय सव्वगुणाधाणं, दिट्ठादिट्ठसुहसाहणं ज्झाणं ।
सुपसत्थं सद्धेयं, नेयं झेयं च निच्चं पि॰ ॥ १०५ ॥

पंडितश्रीरत्नचन्द्रजीविरचितम्

# ।। भावनाशतकम् ।।

श्री वृन्दारकवृन्दवल्लभतरं कल्पद्रुतुल्यं सदा
नत्वाऽऽखण्डलमण्डलार्चितपदं श्रीवर्द्धमानं जिनम्
समृत्वा हृद्यऽजरामरं गुरुगुरुं निर्मीयते बोधकं
भव्यानां भवनाशनाय शतकं सद्भावनानामिदम् ॥ १ ॥

वातोद्वेल्लितदीपकाङ्कुरसमां लक्ष्मीं जगन्मोहिनीं ।
दृष्ट्वा किं हृदि मोदसे हतमते मत्वा मम श्रीरिति
पुण्यानां विगमेऽथवा मृतिपथं प्राप्तेऽप्रियं तत्क्षणा-
दस्मिन्नेव भवे भवत्युभयथा तस्या वियोगः परम् ॥ २ ॥

त्यक्त्वा बन्धुजनं प्रियां च पितरं मुक्त्वा च जन्मावनि-
मुल्लङ्घ्याम्बुनिधिं कठोरवचनं सोढ्वा धनं सञ्चितम् ।
हा कष्टं न तथापि तिष्ठति चिरं कामं प्रयत्ने कृते
दुःखं सागरतुल्यमर्जितमभून्नो बिन्दुमात्रं सुखम् ॥ ३ ॥

हा मातः ! कमले ! धनी तव सदा वृद्ध्यै करोति श्रमं
शीतादिव्यसनं प्रसह्य सततं त्वां पेटके न्यस्यति ।
चोरेभ्यः परिरक्षणाय लभते निद्रासुखं नो क्वचिद्
ध्रौव्यं नो भजसे तथापि चपले ! त्वं निर्दया कीदृशी ॥ ४ ॥

देहे नास्ति च रोम तादृगपि यन्मूले न काचिद्रुजा
लब्ध्वा ते सहकारिकारणमनु प्रादुर्भवन्ति क्षणात् ।
आयुश्छिन्नघटाम्बुवत्प्रतिपलं सङ्क्षीयते प्राणिनां ।
तद्देहे क्षणभङ्गुरेऽशुचिमये मोहस्य किं कारणम् ॥ ५ ॥

यस्य ग्लानिभयेन नोपशमनं नायम्बिलं सेवितं
नो सामायिकमात्मशुद्धिजनकं नैकासनं शुद्धितः ।

स्वादिष्टाशनपानयानविभवैर्नक्तं दिवं पोषितं
हा नष्टं तदपि क्षणेन जरया मृत्या शरीरं रुजा ॥ ६ ॥

प्राज्यं राज्यसुखं विभूतिरमिता येषामतुल्यं बलं
ते नष्टा भरतादयो नृपतयो भूमण्डलाखण्डलाः ।
रामो रावणमर्दनोपि विगतः क्वैते गताः पाण्डवा
राजानोपि महाबला मृतिमगुः का पामराणां कथा ॥ ७ ॥

रे रे मूढ जरातिजीर्णपुरुषं दृष्ट्वा नताङ्गं परं
किं गर्वोद्धतहासयुक्तवचनं ब्रूषे त्वमज्ञानतः ।
रे जानीहि तवापि नाम निकटं प्राप्ता दशेयं द्रुतं
सन्ध्याराग इवेह यौवनमपि तिष्ठेच्चिरं तत्किमु ॥ ८ ॥

रम्यं हर्म्यतलं बलञ्च बहुलं कान्ता मनोहारिणी
जात्यश्वाश्चटुला गजा गिरिनिभा आज्ञावशा आत्मजाः ।
एतान्येकदिनेऽखिलानि नियतं त्यक्ष्यन्ति ते सङ्गतिं
नेत्रे मूढ निमीलिते तनुरियं ते नास्ति किं चापरम् ॥ ९ ॥

त्यक्त्वा धर्मं परमसुखदं वीतरागैश्च चीर्णं
धिक्कृत्यैवं गुरुविधिवचः शान्तिदान्ती तथैव ।
भ्रान्त्वा लक्ष्मीं कुनयचरितैरार्जयस्त्वं तथापि
मृत्यौ देहं प्रविशति कथं रक्षितुं सा समर्था ॥ १० ॥

मत्वा यां त्वं प्रणयपदवीं वल्लभां प्राणतोपि
पुण्यं पापं न गणयसि यत्प्रीणने दत्तचित्तः ।
सा ते कान्ता सुखसहचरी स्वार्थसिद्ध्येकसख्या
मृत्युग्रस्तं परमसुहृदं त्वां परित्यज्य याति ॥ ११ ॥

दुर्गेऽरण्ये हरिणशिशुषु क्रीडया बम्भ्रमत्सु
तत्रैकस्मिन् मृगपतिमुखातिथ्यमाप्ते प्रकामम् ।

धावन्त्यन्ये दिशिदिशि यथा स्वस्वरक्षाधुरीणाः
कालेनैवं नरि कवलिते कोप्यलं रक्षितुं नो ॥ १२ ॥

कृत्वा कामं कपटरचनां दीनदीनान्निपीड्य
हृत्वा तेषां धनमपि भुवं मोदसे त्वं प्रभूतम् ।
मत्वा स्वीयान् प्रणयवशतः पुष्यसि भ्रातृवर्गान्
कष्टेभ्यस्त्वां नरकगमने मोचयिष्यन्ति किं ते ॥ १३ ॥

येषामर्थे सततमहितं चिन्तयस्यात्मनोपि
कृत्याकृत्यं गणयसि पुनर्नैव पापं च पुण्यम् ।
गाढं धूलिं क्षिपसि शिरसि प्राणिनो हंसि चान्यान्
किं ते पुत्रा नरककुहरे भागभाजस्त्वया स्युः ॥ १४ ॥

यस्यागारे विपुलविभवः कोटिशो गोगजाऽश्वा
रम्या रामा जनकजननीबन्धवो मित्रवर्गाः ।
तस्याऽभून्नो व्यथनहरणे कोपि साहाय्यकारी
तेनाऽनाथोऽजनि स च युवा का कथा पामराणाम् ॥ १५ ॥

राज्यं प्राज्यं क्षितिरतिफला किङ्कराः कामचाराः
सारा हारा मदनसुभगा भोगभूम्यो रमण्यः ।
एतत्सर्वं भवति शरणं यावदेव स्वपुण्यं
मृत्यौ तु स्यान्न किमपि विनाऽरण्यमेकं शरण्यम् ॥ १६ ॥

संसारेऽस्मिन् जनिमृतिजरातापतप्ता मनुष्याः
सम्प्रेक्षन्ते शरणमनघं दुःखतो रक्षणार्थम् ।
नो तद् द्रव्यं न च नरपतिर्नापि चक्री सुरेन्द्रो
किन्त्वेकोयं सकलसुखदो धर्म एवास्ति नान्यः ॥ १७ ॥

अहो संसारेऽस्मिन् विरतिरहितो जीवनिवह-
श्चिरं सेहे दुःखं जननमरणैर्बहुविधमसौ ।

परावर्त्तानन्त्यं प्रतिगगनदेशं विहितवां-
स्तथाप्यन्तं नाप्नोद्भवजलनिधेः कर्मवशतः ॥ १८ ॥

अयं जीवः सेहे नरककुहरे क्षेत्रजनितां
व्यथां शैत्यादेर्यां परवशतया चैकसमये ।
शतैर्जिह्वानां सा गणयितुमशक्येति जगदु-
र्व्यथा तादृक् तीव्रा कथमिव विसोढा चिरतरम् ॥ १९ ॥

कदाचिज्जीवोऽभून्नरपतिरथैवं सुरपति-
स्तथा चाण्डालोऽभून्नटशबरकैवर्त्ततनुजः ।
कदाचिच्छ्रेष्ठोऽभूत्किटिशुनकयोनौ समभव-
न्न संसारे प्राप क्वचिदुपरतिं शान्तिमथवा ॥ २० ॥

पिता यस्याऽभूस्त्वं तव स जनकोऽभीक्ष्णमभवत्
प्रिया या सा माता सपदि वनिता सैव दुहिता ।
कृता चैवं भ्रान्त्वा जगति बहुसम्बन्धरचना
भवेप्येकत्रासन् द्विगुणनवबन्धाः किमपरे ॥ २१ ॥

अरण्यान्या अन्तं द्विरदतुरगैर्यान्ति मनुजा
लभन्ते नौकाद्यैः कतिपयदिनैः पारमुदधेः ।
भुवोप्यन्तं यान्ति विविधरथयानादिनिवहै-
र्न संसारस्यान्तं विपुलतरयत्नेपि विहिते ॥ २२ ॥

गृहे यस्मिन् गानं पणवलयतानं प्रतिदिनं
कदाचित्तत्र स्याद्युवसुतमृतौ रोदनमहो ।
क्षणं दिव्यं भोज्यं मिलति च पुनस्तुच्छमपि नो
न दृष्टं संसारे क्वचिदपि सुखं दुःखरहितम् ॥ २३ ॥

तनोर्दुःखं भुङ्क्ते विविधगदजं कश्चन जन-
स्तदन्यः पुत्रस्त्रीविरहजनितं मानसमिदम् ।

परो दारिद्र्योत्थं विषसमविपत्तिं च सहते
न संसारे कश्चित्सकलसुखभोक्तास्ति मनुजः ॥ २४ ॥

क्वचिद्राज्ञां युद्धं प्रचलति जनोच्छेदजनकं
क्वचित् क्रूरा मारी बहुजनविनाशं विदधती ।
क्वचिद् दुर्भिक्षेन क्षुधितपशुमर्त्यादिमरणं
विपद्वह्निज्वालाज्वलितजगति क्वाऽस्ति शमनम् ॥ २५ ॥

मम गृहवनमाला वाजिशाला ममेयं
गजवृषभगणा मे भृत्यसार्था ममेमे ।
वदति सति ममेति मृत्युमापद्यसे चे-
न्न हि तव किमपि स्याद्धर्ममेकं विनान्यत् ॥ २६ ॥

तव किल विलपन्ती तिष्ठति स्त्री गृहाग्रे
प्रचलति विशिखान्तं स्नेहयुक्तापि माता ।
स्वजनसमुदयस्ते याति नूनं वनान्तं
तनुरपि दहनान्तं निःसहायस्ततस्त्वम् ॥ २७ ॥

द्विरदगमनशीला प्रेमलीला किलेयं
तव हृदयविरामा केलिकामातिवामा ।
इह जनुषि सदाप्यास्वार्थसिद्धेः सखी ते
मृतिमुपगतवन्तं साश्रयेन्नो क्षणं त्वाम् ॥ २८ ॥

विपुलविभवसारं रम्यहारोपहार-मसकृदपि च दत्त्वा तोषिता ये सखायः ।
अतिपरिचयवन्तस्तेप्यदूरं वसन्तो भयदमरणकाले किं भवेयुः सहायाः

बहुजनमुपसेव्योपार्जितं द्रव्यजातं रचितमतिविशालं मन्दिरं सुन्दरं वा ।
मृतिपथमवतीर्णे वेदनानष्टभाने क्षणमपि नहि किञ्चित्त्वत्पथं चानुगच्छेत्

समजनि जनिकाले मानवो वस्त्रवित्ताऽशनजनबलहीनो बद्धमुष्टिस्तथापि
वदति तव महत्त्वं पुण्यशालित्वमेतन्मृतिसमयकरोयं रिक्तभावं व्यनक्ति

प्रतिदिवसमनेकान्प्राणिनो निःसहायान्
मरणपथगतांस्तान्प्रेक्षते मानवोऽयम् ।
स्वगतिमपि तथा तां बुध्यते भाविनीं वा
तदपि न हि ममत्वं दुःखमूलं जहाति ॥ ३२ ॥

दिशि दिशि ततकीर्त्तिर्भोजभूपः सुनीती रिपुकुलबलदारी विक्रमो दुःखहारी
अकबरनरपालो दुर्नयारातिकालो मरणमुपययुस्ते मृत्युना निःसहायाः ३३

कोऽहं जगत्यथ कदाप्रभृति स्थितिर्मे
माता पिता च तनुजा मम के इमे स्युः ।
संयोग एभिरभवन्मम किं निमित्त-
स्तत्त्वं विचिन्तय च पञ्चमभावनायाम् ॥ ३४ ॥

गावो हया गजगणा महिषा भुजिष्या
वेश्मानि वैभवचया वनवाटिकाश्च ।
एभिस्तवाऽस्ति कियता समयेन योग-
स्तत्त्वं विचिन्तय च पञ्चमभावनायाम् ॥ ३५ ॥

एतच्च पुद्गलमयं क्षणिकं शरीर-मात्मा च शारदशशाङ्कसदृक्षरूपः ।
बन्धस्तयोर्भवति कर्मविपाकजन्यो देहात्मधीर्जडधियामविवेकजन्या

रोगादिपीडितमतीवकृशं विलोक्य किं मूढ! रोदिषि विहाय विचारकृत्यम्
नाशे तनोस्तव न नश्यति कश्चिदंशो ज्योतिर्मयं स्थिरमजं हि तव स्वरूपम्

मृत्युर्न जन्म न जरा न च रोगभोगौ
ह्रासो न वृद्धिरपि नैव तवास्ति किञ्चित् ।
एतान्नु कर्ममयपुद्गलजान् विकारान्
मत्वा निजान् भजसि किं बहिरात्मभावम् ॥ ३८ ॥

जन्योस्ति नो न जनकोऽस्ति भवान्कदाचित्
सच्चित्सुखात्मकतया त्वमसि प्रसिद्धः ।

रागाद्यनेकमललब्धशरीरसङ्गी
जातो मृतोऽयमिति च व्यपदेशमेषि ॥ ३९ ॥

भार्या स्नुषा च पितरौ स्वसृपुत्रपौत्रा
एते न सन्ति तव केपि न च त्वमेषाम् ।
संयोग एष खगवृक्षवदल्पकाल-
एवं हि सर्वजगतोपि वियोगयोगौ ॥ ४० ॥

एकैकजन्मनि पुनर्बहुभिः परीतः
प्रान्ते तथापि सहकारिविनाकृतस्त्वम् ।
तस्माद्विभावय सदा ममतामपास्य
किञ्चिन्न मेऽहमपि नास्मि परस्य चेति ॥ ४१ ॥

दृष्ट्वा बाह्यं रूपमनित्यं क्षणकान्तं हे मित्र त्वं मुह्यसि किं फल्गुशरीरे।
नान्तर्दृश्य रोगसहस्राश्रितमेतद्देहं निन्द्यं रम्यमिमं ज्ञः कथयेत्कः ॥४२॥

चर्माच्छन्नं स्नायुनिबद्धास्थिपरीतं क्रव्यव्याप्तं शोणितपूर्णं मलभाण्डम्।
मेदोमज्जामायुवसाढ्यं कफकीर्णं को वा प्राज्ञो देहमिमं वेत्ति पवित्रम्

चक्षुर्युग्मं दूषिकयाक्तं श्रुतियुग्मं कीदृग्व्याप्तं सन्ततलालाकुलमास्यम्।
नासाऽजस्रं श्लेष्ममलाढ्यांतरदेशा गात्रे तत्त्वं नोच्चतरं किञ्चन दृष्टम्

बीभत्सोऽयं कीटकुलागारपिचण्डो विष्ठावासः पुक्कसकुण्डाऽप्रियगन्धः
लालापात्रं मांसविकारो रसनेयं दृष्टो नांशः कोपि च काये रमणीयः ४५

कण्डूकच्छूस्फोटकफार्शोव्रणरोगैः कुष्ठैः शोफैर्मस्तकशूलैर्भयशोकैः।
कासश्वासच्छर्दिविरेकज्वरशूलैर्व्याप्तो देहो रम्यतरः स्यात्कथमेषः ४६

यत्सङ्गात्स्याद्भोज्यमुपात्तं रमणीयं दुर्गन्धाढ्यं कृमिकुलबहुलं क्षणमात्रात्
मूल्यं वस्त्रं स्वच्छमपि स्यान्मलदुष्टं सोऽयं देहः सुन्दर इत्थं कथयेत्कः

यस्य श्लाघा देवसभायां विबुधाग्रे भूयो भूयो गोत्रभिदातीव कृतासीत्।
देहो ग्रस्तः सोपि चतुर्थस्य च सार्वभौमस्याहो षोडशरोग्या समकालम्

ज्ञात्वा गर्ह्यं फल्गुपदार्थाचितकायं मुक्त्वा मोहं तद्विषयं भोगनिकायम्।
लब्धुं लाभं मानवतन्वा कुरु कामं धर्मं ज्ञानध्यानतपस्यामयमर्हम् ४९

पटोत्पत्तिमूलं यथा तन्तुवृन्दं घटोत्पत्तिमूलं यथा मृत्समूहः।
तृणोत्पत्तिमूलं यथा तस्य बीजं तथा कर्म्ममूलं च मिथ्यात्वमुक्तम् ५०

प्रवृद्धैर्जनैरर्जिते द्रव्यजाते प्रपौत्रा यथा स्वत्ववादं वदन्ति।
भवानन्त्यसंयोजिते पापकार्ये विना सुव्रतं नश्यति स्वीयता नो ॥५१॥

गवाक्षात्समीरो यथाऽऽयाति गेहं तडागं च तोयप्रवाहः प्रणाल्याः।
गलद्वारतो भोजनाद्यं पिचण्डं तथात्मानमाशु प्रमादैश्च कर्म ॥५२॥

निशायां वने दुर्गमे निःसहायाद्धरन्ते धनं दस्यवो भीतियुक्ताः।
कषायास्तु नक्तंदिवं सर्वदेशे कुकर्मास्त्रमाश्रित्य शक्ति हरन्ति ॥५३॥

सुवृष्टौ यथा नो नदीपूररोधः प्रवृत्तौ यथा चित्तवृत्तेर्न रोधः।
तथा यावदस्ति त्रिधा योगवृत्तिर्न तावत्पुनः कर्मणां स्यान्निवृत्तिः ५४

प्रदेशा असंख्या मता आत्मनो ज्ञैर्निबद्धा अनन्तैश्च कर्माणुभिस्ते।
न तद्बन्धने कारणं विद्यतेऽन्यद्विहायाश्रवान् पञ्च मिथ्यात्वमुख्यान्५५

चतुर्थे च पूर्वे प्रकाराश्च पञ्चाऽधिका विंशतिः सूर्यभेदो द्वितीयः।
तृतीयो दशार्द्धप्रकारः प्रतीतो दश स्युर्विधाः पञ्चमे पञ्चयुक्ताः॥ ५६ ॥

विबुध्याश्रवीयप्रकारान् विचित्रान्विलोक्योग्रमेतद्विपाकं नितान्तम्।
निरुध्याश्रवं सर्वथा हेयमेनं भज त्वं सदा मोक्षदं जैनधर्मम् ॥ ५७ ॥

विनैककं शून्यगणा वृथा यथा विनाऽर्कतेजो नयने वृथा यथा।
विना सुवृष्टिं च कृषिर्वृथा यथा विना सुदृष्टिं विपुलं तपस्तथा॥ ५८ ॥

न तद्धनं येन न जायते सुखं न तत्सुखं येन न तोषसम्भवः।
न तोषणं तत्र यतो व्रतादरो व्रतं न सम्यक्त्वयुतं भवेन्न चेत् ॥ ५९ ॥

विनौषधं शाम्यति नो गदो यथा विनाशनं शाम्यति नो क्षुधा यथा।
विनाम्बुपानेन तृषाव्यथा यथा विना व्रतं कर्मरुगास्रवस्तथा ॥ ६० ॥

महाव्रताऽणुव्रतभेदतो द्विधा व्रतं मुनेः पञ्चविधं किलाग्रिमम् ।
परं मतं श्रावकसंहतेस्तथा जिनोदितं द्वादशधाऽघवारभित् ॥ ६१ ॥

रुजा शरीरं जरया च तद्बलं यशश्च लोभेन यथा विनश्यति ।
तथा प्रमादैरखिलो गुणव्रजस्ततः सुखाय श्रयताच्च पौरुषम् ॥ ६२ ॥

ज्वरे निवृत्ते रुचिरेधते यथा मले गते शाम्यति जाठरी व्यथा ।
तथा प्रमादे विगतेऽभिवर्द्धते गुणोच्चयो दुर्बलता च नश्यति ॥ ६३ ॥

कषायदोषा नरकायुरर्जका भवद्वयोद्वेगकराः सुखच्छिदः ।
कदा त्यजेयुर्मम सङ्गमात्मनो विभावयेत्यष्टमभावनाश्रितः ॥ ६४ ॥

मनोवचोविग्रहवृत्तयोऽशुभा नाना विकारा पुनरैन्द्रियाः सदा ।
निहन्ति धर्माभिमुखं बलं ततो निरुध्य तांस्त्वं शुभधर्ममाचर ॥ ६५ ॥

केन प्रकारेण पुरात्मदर्शिनः कृत्वाऽखिलां कर्मगणस्य निर्ज्जराम् ।
ज्ञानं निराबाधमलं प्रपेदिरे त्वं चिन्तयैतच्छुभभावनावशः ॥ ६६ ॥

देशेन यः सञ्चितकर्मणां क्षयः सा निर्ज्जरा प्राज्ञजनैर्निवेदिता ।
स्यात्सर्वथेयं यदि सर्वकर्मणां मुक्तिस्तदा तस्य जनस्य सम्भवेत् ६७

भुक्ते विपाकेऽर्जितकर्मणां स्वतो यद् भ्रंशनं स्यात्तदकामनिर्ज्जरा ।
यन्मोचनं स्यात्तपसैव कर्मणामुक्ता सकामा शुभलक्षणा च सा॥ ६८ ॥

इच्छां विना यत्किल शीलपालनमज्ञानकष्टं नरके च ताडनम् ।
तिर्यक्षु तृड्क्षुद्वधबन्धवेदनमेतैरकामा भवतीह निर्ज्जरा ॥ ६९ ॥

बाह्यादिभेदेन तपोस्त्यनेकधा निष्काममेवात्र शुभं सदाशयम् ।
कीर्त्यादिलोभेन तु यद्विधीयते प्रोक्तं सकामं किल मध्यमं तपः ७०

रजोभिसंसृष्टपटेऽभितो भृशं शुद्ध्यर्थमातन्य विधूयते यथा ।
कर्मावरुद्धात्मविशुद्धये समुद्घातस्तथानेकविधो विधीयते ॥ ७१ ॥

अज्ञानकष्टाश्रिततापसादयो यत्कर्म निघ्नन्ति हि वर्षकोटिभिः ।
ज्ञानी क्षणेनैव निहन्ति तद् द्रुतं ज्ञानं ततो निर्ज्जरणार्थमर्ज्जय ॥ ७२ ॥

रेऽनन्तजन्मार्जितकर्मवर्गणास्त्वं चेन्निराकर्तुमपेक्षसेतमाम् ।
ज्ञानेन सार्धञ्च तपस्तदाचर वह्निर्विनापो न हि वस्त्रशुद्धिकृत् ॥ ७३ ॥

धर्माधर्मौ पुद्गलः खात्मकाला एतद्द्रव्याभिन्नरूपो हि लोकः ।
तत्राकाशं सर्वतः स्थाय्यनन्तमेतन्मध्ये विद्यते लोक एषः ॥ ७४ ॥

नायं लोको निर्मितः केनचिन्नो कोप्यस्यास्ति त्रायको नाशको वा ।
नित्योऽनादिः सम्भृतोऽजीवजीवैर्वृद्धिह्रासौ पर्ययानाश्रयेते ॥ ७५ ॥

उच्चैर्नीचैर्वेददिग्रज्जुमानस्तन्मध्यांशे मेरुमूलं ततोऽयम् ।
भक्तो लोको मध्यमुख्यैस्त्रिभागैर्मध्ये तिर्यगूर्ध्व ऊर्ध्वेऽस्त्यधोधः ७६

तिर्यग्लोके सन्ति तिर्यङ्मनुष्याः प्रायो देवा ऊर्ध्वलोके वसन्ति ।
नीचैर्लोके नारकाद्याः प्रभूताः सर्वस्याग्रे मुक्तजीवाः सुखाढ्याः ७७

आयामोऽधो रज्जवः सप्त मूले मध्ये चैका ब्रह्मलोके च पञ्च ।
प्रान्ते त्वेका सप्तरज्जुर्घनोऽस्य न्यस्तश्रोणिहस्तमर्त्याकृतिश्च ॥ ७८ ॥

प्रान्ते वायुस्त्रिप्रकारः समन्तात्तस्मादग्रे सर्वतोऽलोकदेशः ।
यत्राकाशं द्रव्यमेकं विहाय नान्यत्किञ्चिद्विद्यतेऽनन्तकेऽस्मिन्॥ ७९ ॥

उच्चैरुच्चैर्वर्त्तते सौख्यभूमिर्नीचैर्नीचैर्दुःखवृद्धिः प्रकामम् ।
लोकस्याग्रेस्त्युत्कटं सौख्यजातं नीचैः प्रान्ते दुःखमत्यन्तमुग्रम् ८०

उच्चैःस्थानं त्वात्मनश्चित्स्वभावान्नीचैर्यानं कर्मलेपाद् गुरुत्वे ।
तस्माद्धर्मं कर्ममुक्त्यै विधेयाः लोकाग्रे स्याद्येन ते स्थानमर्हम्॥ ८१ ॥

सूक्ष्मबादरनिगोदगोलकेऽनन्तकालमघयोगतः स्थितः ।
सूक्ष्मबादरधरादिके ततोऽसङ्ख्यकालमथ दुःखसङ्कुले ॥ ८२ ॥

द्व्यक्षमुख्यविकलेन्द्रिये क्रमात्सङ्ख्यकालमटितो व्यथान्वितः ।
नारके पशुगणे पुनः पुनर्यापितोऽतिसमयः सुखोज्झितः ॥ ८३ ॥

तत्र तत्र दुरितातिभोगतः कर्मणामपनयो यदाऽभवत् ।
प्राप रत्नमिव दुर्लभं भृशं मानवत्वमतिपुण्ययोगतः ॥ ८४ ॥

मानवेऽपि न हि पुण्यमन्तरा प्राप्यते सुकुलदेशवैभवम् ।
रोगहीनमखिलाक्षसंयुतं कान्तगात्रमपि दीर्घजीवितम् ॥ ८५ ॥

पूर्वपुण्यवशतोऽखिलं हि तल्लभ्यते यदि सुकर्मपाकतः ।
दुर्लभस्तदपि कल्पवृक्षवद्योग्यसंयमिगुरोः समागमः ॥ ८६ ॥

दुर्लभादपि सुदुर्लभं मतं वीरवाक्श्रवणमात्मशान्तिदम् ।
हा ततोऽपि खलु बोधिवैभवो यो न कर्मलघुतां विनाप्यते ॥ ८७ ॥

संसदग्र्यपदमाप्यते श्रमाद्राज्यसम्पदपि शत्रुनिग्रहात् ।
इन्द्रवैभवबलं तपोव्रतैर्बोधिरत्नमखिलेषु दुर्लभम् ॥ ८८ ॥

भ्राम्यता भववनेऽघघर्षणात्काकतालवदिदं सुसाधनम् ।
प्राप्य मूर्ख ! किमु भोगलिप्सया रत्नमेतदवपात्यतेऽम्बुधौ ॥ ८९ ॥

येन समग्रा सिद्धिर्दिव्यर्द्धिश्चापि जायते शुद्धिः ।
धर्मः स किं स्वरूपो जानीहि त्वं तत्त्वधिया तच्च ॥ ९० ॥

मम सत्यं मम सत्यं वदन्ति सर्वे दुराग्रहाविष्टाः ।
नैतद्वचसा मुह्येत्किन्तु परीक्षा बुद्धिमता कार्या ॥ ९१ ॥

यस्य न रागद्वेषौ नापि स्वार्थो ममत्वलेशो वा ।
तेनोक्तो यो धर्मः सत्यं पथ्यं हितं हि तं मन्ये ॥ ९२ ॥

श्रुतचरणाभ्यां द्विविधः सज्ज्ञानदर्शनचरितभेदाद्वा ।
धर्मस्त्रेधा गदितः सोयं श्रेयःपथः समाख्यातः ॥ ९३ ॥

सप्तप्रकृत्युपशमाऽऽदित उदयति गुणपदे चतुर्थेऽलम् ।
धर्मः केवलमाद्योऽन्यलवोपि च पञ्चमे द्वयं षष्ठे ॥ ९४ ॥

तत्फलमवाप्यते नो कामगवीतः सुरद्रुमेभ्यो वा ।
सुरचिन्तामणितो वा धर्मोऽपूर्वं हि यत्फलं दत्ते ॥ ९५ ॥

तद्वस्तु न त्रिलोके जिनधर्मात्तु भवेन्न यत्साध्यम् ।
तद्दुःखं नो किञ्चिद्यस्य विनाशो न जायते धर्मात् ॥ ९६ ॥

दुर्गतिकूपे पततामालम्बनमस्ति किं विना धर्मम् ।
तस्मात्कुरु प्रयत्नं समयेऽतीते प्रयासवैफल्यम् ॥ ९७ ॥

एतद्द्वादशभावनाभिरसुमानेकान्ततो योऽसकृत्
स्वात्मानं परिभावयेत्त्रिकरणैः शुद्धैः सदा सादरम् ।
शाम्यन्त्युग्रकषायदोषनिचया नश्यन्त्युपाध्याधयो-
दुःखं तस्य विलीयते स्फुरति च ज्ञानप्रदीपो ध्रुवम् ॥ ९८ ॥

ख्यातो भुव्यऽजरामरो मुनिवरो लोकाख्यगच्छे मणि-
स्तत्पट्टे मुनिदेवराजसुकृती श्रीमौनर्सिहस्ततः ।
तस्माद्देवजिनामको बुधवरो धर्माग्रणीशेखर-
स्तत्पट्टे नथुजिन्मुनिः श्रुतधरः सौजन्यसौभाग्यभूः ॥ ९९ ॥

तच्छिष्यो हि गुलाबचन्द्रविबुधः श्रीवीरचन्द्राऽग्रज-
स्तत्पादाम्बुजसेवनैकरसिकः श्रीरत्नचन्द्रो मुनिः ।
ग्रामे थानगढाभिधे युगरसाङ्केलाब्ददीपोत्सवे
तेनेदं शतकं हिताय रचितं वृत्तैर्वरैः शोभितम् ॥ १०० ॥

श्रीविबुधविमलकृतं

## ॥ उपदेशशतकम् ॥

### प्रथमा अनित्यभावना

श्रीपञ्चासरपार्श्वनाथवदनं दन्तांशुदूरीकृत-
ध्वस्तज्ञानविलोचनश्रुतमहोमोहान्धकारव्रजम् ।
अभ्यस्तागमभव्यजन्तुहृदयाम्भोजप्रमोदप्रदं,
चन्द्रः पापकलङ्कपङ्करहितस्त्रायाद्धयान्नः पुनः ॥ १ ॥

विद्वांसो न परोपदेशकुशलास्ते युक्तिभाषाविदो,
नो कुर्व्वन्ति हितं निजस्य किमपि प्रात्तापराभ्यर्थनाः ।

तस्मात्केवलमात्मनः किल कृतेऽनुष्ठानमादीयते,
मर्त्यैर्यैः सुकृतैकलाभनिपुणैस्तेभ्यो नमः सर्वदा ॥ २ ॥

हितं न कुर्यान्निजकस्य यो हि, परोपदेशं स ददाति मूर्खः ।
ज्वलन्न मूलं स्वकपादयोश्च, दृश्येत मूढेन परस्य गेहम् ॥ ३ ॥

न कश्चित्संसारे भवति सुसहायश्च शरणं,
विना धर्मं शुद्धं जिनवरमुखोक्तं नयभृतम् ।
ततस्त्यक्त्वा मिथ्यात्वमिह कुरु यत्नं शुभमते !
रहस्यं सिद्धान्तोदितमिदमतः किञ्चन परम् ॥ ४ ॥

आशा परेषां विषवल्लितुल्येत्येवं प्रबुद्धाः प्रवदन्ति तन्न ।
तस्यां विलग्नास्तु भवेऽत्र दुःखमाशास्थिता यान्ति परत्र चात्र ॥ ५ ॥

कचवरसमः संसारोऽयं जनुर्मरणादिकाऽशुचि-
चिन्तमृतश्वाहिव्यालाश्वकुत्सितदेहभृत् ।'
किमुत रमते तस्मिन्हंसः सुमानसमन्दिरो,
भवकृमिगणे मुक्ताभ्रान्त्या रतिस्तव तत्र भोः ! ॥ ६ ॥

धर्मः स्वर्गपुरीगतौ सुतुरगो धर्मः सभामण्डनं,
धर्मः शत्रुसमागमे स्वसहजः कर्मारिदुर्गो गजः ।
धर्मो दुर्जनदन्दशूकदमने स्याद्वैनतेयस्तथा,
धर्मः केवलमुक्तिसौख्यकरणे सद्रत्नलाभः पुनः ॥ ७ ॥

वयश्चत्वारिंशच्छरदनुमितं चेतन ! गतं,
न ते किं मूर्खत्वं विकलमतिबालोचितमिदम् ।
कथं भो ! विश्वासो हृदयपवने चञ्चलगता-
वतो धर्मे यत्नं कुरु यदि शिवोत्कण्ठितमतिः ॥ ८ ॥

भव्याश्चेद्भवतां मनो भवभयोद्विग्नं निमग्नं शिवे
ऽप्यर्हद्भाषितभारतीश्रुतिसुधापानं विधत्ताधिकम् ।

धर्मं द्वादशभावनायतिदशक्षान्त्यादिधर्मान्वितं,
तीर्णागाधभवोदधिं च कुरुत त्यक्त्वा परां कल्पनाम् ॥ ९ ॥

सिद्धान्तश्रवणं हृषीकभुजंगस्याशीर्विषध्वंसनं,
प्रज्ञाकल्पलताङ्कुरोद्भववनं मोहाब्धिसंशोषणम् ।
मायावल्लिविनाशनं त्वघतरोर्मूलाग्निसंस्थापनं,
सन्तापप्रतिघातनं, शुभमनःसंवृद्धिसंभावनम् ॥ १० ॥

परिहर मनो गच्छन्मत्स्योपमं विषकण्टकोपमि-
तविषयेष्वात्मन्पाप्मन् कथं कथयामि भोः ? ।
किमपि वचसा सिद्धान्तं तं विलोक्य तत्त्वतो,
भवति हि कदा चित्ते चित्ते गुणः श्रुतसंश्रुतेः ॥ ११ ॥

विधेहि दृष्टिं समये समाधिं, कलेवरे दोषहरे त्वपारे ।
बोधं विना को न लभेत मुक्तिं, ज्ञानं प्रधानं प्रवदन्ति हेतुम् ॥ १२

श्रुत्वा सारं प्रवचनवचो ज्ञायते कार्यजातं,
दौर्जन्यं स्वं त्वपरखलता सज्जनत्वं सुधीत्वम् ।
लोकाकारो दिवनरकयोराकृतिश्चित्तवृत्तिः,
शुद्धा श्रद्धा गुरुविनयिता देवपूजाप्रभावः ॥ १३ ॥

अनित्यं संसारे भवति सकलं यन्नयनगं,
वपुर्वित्तं रूपं मणिकनकगोऽश्वद्विपजनम् ।
पुरं रामा भ्राता जनकजननीनन्दनकुलं,
बलं देहोद्भूतं वचनपटुता भाग्यभवनम् ॥ १४ ॥

गगनधनुषा मेयं देहं पयोधितरङ्गवद्,
बहु धनमिदं त्वायुर्वायुर्यथा जगतीतले ।
सुतनुयुवतिस्नेहो लेहो विषाक्तकृपाणजः-
अविचलसुखदो धर्मः कर्मक्षयः क्रियतामतः ॥ १५ ॥

भवति कोऽद्य न चक्रधरो हरिर्जिनवरः पृथिवीतलभूषणम् ।
रविविधू चपलौ खलु दृग्गतौ, तव भवेऽत्र भवेज्जड! किं स्थिरम् ॥ १६ ॥

दृश्यन्ते दिवसोदये जगति ये भावास्तु सायं न ते,
भुक्तं भोजनमेव षड्रसयुतं तत्कालनाशं गतम् ।
बालत्वं बल यौवनं च गदतः क्षीणाङ्गता वृद्धताऽ
ङ्गेऽवस्थां हि विलोक्य सारसमताधर्मे प्रयत्नं कुरु ॥ १७ ॥

## द्वितीया अशरणभावना

माता पिता च भगिनी सहजो वधूर्वा,
पुत्राः सुताः करिघटा रथपङ्क्तिरश्वाः ।
भृत्या घनाः परिकरः परतः परीत-
स्तेभ्यो न ते किमपि भोः शरणं सहायः ॥ १८ ॥

अनाथो निर्ग्रन्थो नयनभवरोगेण निहत-
स्तदा कश्चिन्न स्याच्छरणसुखदस्तस्य भुवने ।
प्रसूर्बीजी रामा सकलसुजनो दीनवदन-
स्ततो धर्मः सारो जगति भविनामेकशरणम् ॥ १९ ॥

त्राणं किन्तु परत्र जन्मनि भवेद्देहं गृहं गेहिनी,
देशा दन्तिचया रथास्तु तुरगा गावो महिष्यो मयाः ।
भण्डारः कनकं मणिर्मरकतं रत्नाञ्चितालङ्कृतिः,
सर्वं स्थास्यति यत्र तत्र शरणं धर्मं विना नास्ति किम् ? ॥ २० ॥

दग्धा द्वारवती यदा प्रकुपितद्वैपायनेनर्षिणा,
गोविन्दो बलवांस्तदैव कृतवान् रक्षां न कस्यापि च ।
निर्नाथा मनुजा धनञ्जयवशाः पञ्चत्वमाप्ता घनाः,
श्रीमन्नेमिजिनस्तदैकशरणं जातस्तु भव्याङ्गिनाम् ॥ २१ ॥

## तृतीया संसारभावना

संसारस्य सुखं त्वयापि बहुशो भुक्तं भवे भ्राम्यता,
योनिः काचन नास्ति यत्र न मृतो जातो न वा त्वं कदा ।
प्रीतिं किं विदधासि तत्र जडधी रोगाधिशोकाकुले,
बुद्धिं जैनमते निधेहि नितरां संसारमोहं त्यजन् ॥ २२ ॥

कदाचिद्देवोऽभूः क्वचिदपि नरः प्राणविकलो,
गतिस्तिर्यग्योनौ जनकजननीभेदरहितः ।
महत्कष्टं सोढं नरकभवजं वर्षशतकै-
रहो ! अद्यापि त्वं भवविरतिमस्मिन्न लभसे ॥ २३ ॥

क्वचिदपि हयः सिंहः सर्पो गजो वृषभः खरः,
क्वचिदजगरोऽभूस्त्वं चाखुः कदापि मृगः शुनः ।
भुवि पयसि वा वह्नौ वायौ वनस्पतिके स्थितो,
जड ! किमधुना संसारेऽस्मिन् रतिस्तव तादृशी ? ॥ २४ ॥

धनेशो वराको नृपो दासवृत्तिरसुतः सपुत्रः कदा कामरूपः ।
कुरूपः सयोगी वियोगी नरोऽभूर्यथा चाधुना मूढ ! धर्मं भज त्वम्२५

## ॥ चतुर्थी एकत्वभावना ॥

उत्पन्नं परलोकतोऽत्र भवता गन्तव्यमेकाकिना,
संबन्धः किल कृत्रिमो हि युवतेर्भ्रातुश्च पित्रोः पुनः ।
पुत्राणां दुहितुःपतेः श्वशुरयोः श्यालस्य मातृष्वसु
स्तस्मात्स्थास्यति सर्वमत्र सहगो धर्मो भवेदेककः ॥ २६ ॥

एकस्त्वं गुणभृत्सदैव भुवने कस्यापि कश्चिन्न ते,
सर्वः स्वार्थपरः पिता च जननी सूनुर्वधूर्बान्धवः ।
दायादः स्वजनः सुहृच्च भगिनी स्वामी तथा सेवको,
हित्वा तत्प्रतिबन्धनं जिनपतेर्धर्मं भज त्वं मुदा ॥ २७ ॥

वसति युवतिर्वेश्मान्तर्वा धनं धरणीतले,
पवनजविनो वाजिव्यूहा धनोपमिता गजाः ।
प्रबलसुभटाःस्वस्वस्थाने रथाः पतिताः पुनः,
परभवगतावेको जीवश्चलेद्गतसम्बलः ॥ २८ ॥

एको धनेशो वरभोगभोजी, छेको वराको दररोगयोजी ।
एकः सुरूपस्तु कुरूप एको, धर्मं कुरु त्वं तत एक एव ॥ २९ ॥

## पञ्चमी अन्यत्वभावना

अन्यच्छरीरं धनधान्यमन्यदन्यैव रामा गृहभारशक्ता ।
अन्ये त्वदीयाः सुतबान्धवाद्याः, सर्वं पृथक्स्वं नखवच्च हस्तात्

पाषाणात्सलिलं मणिर्विषधरात्तोयाच्च तैलं यथा,
शर्वर्या दिवसं तमो दिनमणेश्छायातपाद्दिग्गता ।
श्वेतात् कृष्णतरः कटोश्च मधुरो दुःखात्सुखं चापरं,
तद्वत्सर्वमिदं हि वस्तु भवतो विद्धि त्वमन्यत्तथा ॥ ३१ ॥

वहति वृषभः सारं भारं गृहे घृतभुक् सदा,
यदि स च जराजीर्णोऽभून्नो लभेत तृणं तदा ।
अयमिव भवे लोकः शोकाकुलः किल सर्वदा,
किमु जडमतेऽन्यार्थं स्वार्थं त्यजेर्भवमर्मदाः ॥ ३२ ॥

जनन्या ययाधारि कुक्षौ सुतो यः,
पयोऽपायि विण्मूत्रशुद्धिस्त्वकारि ।
युवाऽभूद्यदा तेन जाया न्यषेवि,
ततोऽन्यन्मयाऽज्ञायि धर्मः सहायः ॥ ३३ ॥

## षष्ठी अशुचिभावना

सपलरक्तसिराजिनकीकशे, समलमूत्रमलाविलपुद्गले ।
अरुचिरे नचिरे हि कलेवरे, सुयुवतेर्भवतेरितमक्षि किम् ? ॥ ३४ ॥

नयनयोः कुचयोर्भुजयोर्भ्रुवोः, श्रवणयोः करयोः कचबन्धने ।
किमपि चारु न चर्मनिगुम्फितं, पिशितपूरितनिन्दितभाजनम् ॥ ३५ ॥

प्रथममेव विलोक्य च चिद्दशा, निजतनौ विवराणि वहन्त्यरम् ।
नवजुगुप्सितगन्धरसानि तन्ममतया विदधासि हितं न किम् ? ३६

अनुदिनं द्वययुग्दशरन्ध्रभृद्युवतिविग्रहकर्करमन्दिरम् ! ।
नगरसारणिवत्स्रवतीदृशं, त्यज मनो भज पारगतं वचः ॥ ३७ ॥

## सप्तमी आश्रवभावना

कासारो वारिमार्गैः प्रचुरजलभरः स्याद्यथा मर्त्यलोके,
जीवेऽस्मिन्नाश्रवौघैरशुभशुभकरैः कर्मराशिस्तथैव ।
दुःखी चादुःख एको जगति रचनया कर्मणोऽयं विचित्र-
स्तस्माद् बध्नीहि पालीं विषयरुचिमनोवाग्वपुर्योगरोधैः ॥ ३८ ॥

अनन्ता आत्मानो नरकभवने ह्याश्रववशा
द्ययुर्वा यास्यन्ति प्रबलविषया यन्ति बहवः ।
अतस्तं मिथ्यात्वाविरतिकरणक्रोधशयन-
प्रमादं दुर्मोचं भवभयपुरं मुञ्च मनसा ॥ ३९ ॥

क्रियाः कुगतिकारणं जगति विंशतिः पञ्चयुक्,
प्रवृत्तिरपि दुःखदा व्रतवतां वचश्चेतसाम् ।
हृषीकदमनं वरं कुरु शिवे यदीच्छास्ति ते,
पिधानमिदमाश्रवः श्रमणधर्मरोधाध्वनः ॥ ४० ॥

क्रोधो बोधविरोधकः सुविनयामानश्च मानो भवेत्,
मायापायविधायिनी भववने लोभो वृषक्षोभकः ।
स्वर्गद्वारकपाटकस्त्वविरतिर्योगा हि रोगाश्रया
स्तत्सङ्गं परिहीयतां जिनपतेः श्रुत्वाऽऽगमं सादरम् ॥ ४१ ॥

## अष्टमी संवरभावना

घनमुनिवराः श्राद्धाः सिद्धा मनस्तनुसंवरात्,
प्रभवति महालब्धिव्यूहो गदार्तिविनाशकः ।
त्रिदशपतयो देव्यो नार्यो नमन्ति नरेश्वरा,
असुरविभवः श्रीमद्वीरं समाधिसमन्वितम् ॥ ४२ ॥

समवसरणे रत्नैः स्वर्णैः कृते रजतैर्मणी-
कनकरचिते स्थित्वा सिंहासने परमेष्ठिनः ।
नृपशुसुरवाक्संवादिन्या गिरोपदिशन्ति ते,
पिहितसकलाक्षव्यापाराच्छिवं व्रतसंवरात् ॥ ४३ ॥

धरत समितिं गुप्तिं मेयां त्रिभिः किल पञ्चभि
स्त्यजत हि मनोभृङ्गं सङ्गीभवन्तमहर्निशम् ।
विरसविषये पुष्पौपम्ये परीषहवाहिनीं,
जयत जगदीशोक्ते मुक्तेर्निबन्धनमीरितम् ॥ ४४ ॥

करणसदनद्वारावारं विभाननिवासदं,
भजत भविनोऽवश्यं वश्यं भवेच्च शिवश्रियः ।
चरमभगवद्भक्ता सिद्धायिका वरदायिनी,
सृजति सुखकृद्विघ्नाभावं सुसंवरिणामिह ॥ ४५ ॥

## नवमी निर्जराभावना

यत्कर्माहिविषामृतं जिनवरा यच्च श्रयन्ति ध्रुवं,
येनानेकजनाः शिवं हि गमिता यस्मै नमस्यन्ति वा ।
यस्मात्पारगचक्रिलब्ध्यनुभवो यस्य प्रभावाच्छुभं,
यस्मिन्सन्ति गुणा घनाः कुरु तपस्तन्मुक्तिकामो मुने ! ॥ ४६ ॥

विघ्नौघस्तपसः प्रणश्यति यथा ध्वान्तं रवेरम्बुदो,
वायोः सिंहशिशोर्गजश्च शिखिनः सर्पो निदाघाज्जडः ।
बाह्याभ्यन्तररूपषड्विधमिदं सन्निर्जराकारणं,
मा कार्षीस्त्वमनुद्यमं तपसि चेत्सिद्ध्यङ्गनाकामुकः ॥ ४७ ॥

खनति भवसमुत्थं कर्मकन्दं समूलं,
जननिधनपीडाध्वंसनार्थं त्रिशूलम् ।
अनुपमनिजशक्तिप्राप्तिकालानुकूलं,
जगति जिनवरोक्ता निर्जरा क्षेमकूलम् ॥ ४८ ॥

तस्मान्नास्ति तमो भवेद्भवतु वा लब्धिर्बभूवाभव-
द्भूयाद्वा भविता जिनो वसुसुखं स्वार्थो भविष्यत्यपि ।
छद्मानेहसि यत्त्वभूद्यतिपतेर्वीरस्य घोरं तपो,
नाधास्यद्यदि नाभविष्यदपि यद्भुत्यः प्रशंसास्पदम् ॥ ४९ ॥

## दशमी लोकभावमा

जम्बूद्वीपो लवणजलधिर्धातकी पुष्कराद्या,
अन्ये द्वीपा वलयवलयाकाररूपा असंख्याः ।
पारावारा विगतगणना द्वीपतुल्याभिधानाः,
सर्वस्थाने जननमरणं निर्मितं जीव ! तत्र ॥ ५० ॥

लोकं भावय चेतसा स्थितकटीनिर्मुक्तहस्तद्वयी-
मानुष्योपममेव धर्मगगनाधर्मप्रदेशान्वितम् ।
जीवानन्तनिगोदवासनिलयं भूनीरतेजोवृतं,
पूर्णं वायुनिकायिकक्षितिरुहैर्देवैर्नरैर्नारकैः ॥ ५१ ॥

द्रव्यतोऽन्तसहितः खलु लोकः, क्षेत्रतः प्रकथितोऽपि तथैव ।
कालतोऽन्तरहितोऽपि तु भावात्स्पर्शवर्णरसगन्धगुणौघैः ॥ ५२ ॥

ज्ञेयो लोकोऽनन्तस्सान्तः,*षड्भिर्द्रव्यैर्नित्यानित्यैः ।
मुर्तामूर्तैरेकैर्जीवाजीवैः कार्याकार्यैः ॥ ५३ ॥

## एकादशी बोधिभावना

दुर्लभमेव मनुष्यगतित्वं, दुर्लभमार्यमहीतलजन्म ।
देवगुरुक्रमपङ्कजसेवा, बोधिमणेरिह दुर्लभयोगः ॥ ५४ ॥

विप्राक्षद्यूतधान्यं युगमणिरजनीनाथपानं तु कूर्म्म-
श्चक्रंस्तम्भः किलैभिर्दशभिरतितरां सारदृष्टान्तजातैः ।
मानुष्यं दुर्गमं यत्कथितमृषिवरैरागमे वीतरागै-
स्तद्यत्नं बोधिरत्ने कुरुत भविजना ! मोहपाशं विमुच्य ॥ ५५ ॥

त्यज मोहमतिं भज बोधिरतिं, नम साधुपतिं कृतदेवनतिम् ।
कुरु दोषहतिं जहि कामगतिं, धर धर्मततिं गतजन्ममृतिम् ॥ ५६ ॥

लक्ष्मीस्तरङ्गतरला मघवद्धनुर्वद्देहं च जीवितमहो ! अचिरप्रभावात् ।
रामाक्षिकूणितमिदं तु विषाक्तबाणस्तद्बोधिरत्नममलं हृदये निधेहि ५७

## द्वादशी धर्मभावना

देवोऽष्टादशदोषवर्जितवपुः सिद्धस्वरूपाकृतिः,
साधुः संयमसाधकः श्रुतमतिः स्वाचारयत्नक्षमः ।
धर्मो जीवदयास्वरूपमतिभृत् स्याद्वादमुद्रान्वितः,
प्राप्यैतत्त्रितयं हि दुर्लभतरं कः स्यात्प्रमादी पुनः ? ॥ ५८ ॥

मुनिपतिमुखशैलादुद्गतो धर्मसूर्यो,
नयवचनकरैर्यो गाढमिथ्यातमिस्रम् ।
विषयमतिजडत्वं नाशयन् भव्यजन्तु-
प्रकरकमलखण्डं शोभयंस्तं भजध्वम् ॥ ५९ ॥

धर्मः प्रभूक्तो द्विविधोऽणुसर्वव्रतात्मकः कर्मनिघातकश्च ।
श्राद्धस्य साधोर्हृदि भावनीयः, प्राणिंस्त्वया दुर्लभ एव योगः ॥ ६० ॥

धर्मं चेतसि रक्ष रक्षितजगद्रे मूढ ! किं प्रोच्यते,
कालोऽनादिरभूत्तवैव न कदा कुत्रापि लब्धा त्वया ।
सामग्री गुरुदेवधर्ममतिकृत्संसारसंहारिणी,
तद्भाव्या हि पुनः पुनस्तु विजने गत्वातिसद्भावनाः ॥ ६१ ॥

## प्रथमो यतिधर्मः

शिवपुरगतौ गन्त्री तन्त्रीमती मृदुभाषणे,
स्वगुणरमणे रामा वामा विशारदचातुरी ।
भवजलनिधेरस्तेऽगस्तेर्महागलनालिका,
भवति जगति क्षान्तिः शान्तिङ्करी व्रतिनां सदा ॥ ६२ ॥

क्षमागुणः साधुगणस्य मञ्जुलो,
महाव्रतं क्रोधजयाय जायते ।
गुणा विना तं निखिला हि निष्फला,
यथैककाङ्कं लिखितास्तु बिन्दवः ॥ ६३ ॥

क्रोधाग्निर्द्वन्द्वधूमो धवलशमगृहश्यामकारी प्रवृद्धः,
स्वान्तध्वान्तप्रवृत्तिः प्रबलशुभमनोभाववृक्षप्रदाही ।
उद्गच्छत्प्रौढनिन्दाकुवचननिकरार्चिर्भवेद्यः क्षमाम्भो-
धाराभिस्तं विधेहि स्वपरहितकरं चारुनिर्वाणरूपम् ॥ ६४ ॥

यः क्षमासुयुवतिं रुचिराङ्गीमुद्वहेत्प्रणिपतन्ति सुरास्तम् ।
निर्वृतिः करगता किल तस्य, स्वर्गवाससुखसम्पदयत्ना ॥ ६५ ॥

## द्वितीय यतिधर्मः

मार्दवं भवति माननिरासाद्यस्य यांति स च देवगुरूणाम् ।
नम्रतां श्रुतसमुद्रविगाही, पूज्य एव जगतां मुनिरेषः ॥ ६६ ॥

महामानाद्रिः स्याद्वहति खलतावार्धिवनिता,
कुबोधः कीनाशो वसति गुरुदोषोद्भटनता ।
दरी ध्वान्ता यत्रावगुणचरटाः सन्ति बहवः,
कदा तं मा रोहीर्भज जनहितं मार्दवगुणम् ॥ ६७ ॥

गर्व्वोत्कर्षी वहति वहनं व्योममुक्ताक्षियुग्मं,
गच्छन् भूमिं रहितवचनः पश्यति प्रोद्धतो नो ।
तन्मन्येऽहं नरकगमनाद्भीतचित्तस्त्वसौ किं ?,
सोऽयं धन्यो निहितयुगदृग्यो व्रजेन्मार्दवाढ्यः ॥ ६८ ॥

निर्गर्व्वस्त्रिजगति यः स पूजनीयो, गर्व्विष्ठः स्वपरकृतान्तवेदिवर्यः ।
तद्वश्याः सुरपतयश्च सार्वभौमाः, स्वर्हस्तेऽमृतमपि तस्य भावि लभ्यम्

## तृतीयो यतिधर्मः

चारित्रार्यमरोधनेऽभ्रपटलीं सत्सङ्गसंछेदने
स्फूर्जत्खड्गलताञ्चितां गुणमृतौ संसारवार्द्धौ नदीम् ।
मायां सिद्धिनिषेधिनीं त्यज मुने ! व्याघ्रीमिवाध्वस्थितां,
मुक्तौ गन्तुमना भवान्यदि तदा निर्व्याजता भज्यताम् ॥ ७० ॥

नरकपूर्गमने बत गोपुरं, त्रिदिवमार्ग्गविघातभुजङ्गमम् ।
सकलदोषमतङ्गजविन्ध्यभूः, परिहर त्वमतः किल कैतवम्॥ ७१ ॥

माया मण्डनमेव मोहनृपतेः संसारवृक्षाम्बुदो,
रात्रिः सत्यरवेर्विनाशकरणे मिथ्यात्वकेलिगृहम् ।
विश्वासेन्दुविनिग्रहेऽपि तमसस्तुण्डद्युतिः खानिकां,
दोषाणां वरसाधुभिः परिहृता यैस्तैः प्रलब्धं शिवम् ॥ ७२ ॥

पूजन्ति देवांस्तु वपन्ति वित्तं, सत्सु व्रतं चाददते तपन्ति ।
तपस्त्यजन्ति प्रमदाविवर्गं, मायां न मुञ्चन्ति वृथेति सर्वम् ॥ ७३ ॥

## चतुर्थो यतिधर्मः

धर्मस्तु दूर्लभतरो दिवि मुक्तिनामा, सर्वेषु वस्तुषु निरीहतया मुनीनाम् ।
सम्पद्यते तनुमनोवचसां समाधिकृज्जन्मजातिमरणान्तक एव सेव्यः ७४

निमग्ना लोभाब्धौ प्रचुरधनतृष्णाघनशिलाः
प्रविष्टा ये मर्त्त्या बहुदुरितवार्याधिमकरे ।
स वार्धिस्तीर्येतैव कथमपि मुक्तिप्रवहणं,
समारुह्येताशु व्रतधरवरैर्यैर्मतिधनैः ॥ ७५ ॥

लुब्धो नरः प्राणधरः परासुश्चिन्ताचितायां शयितस्सदा तत् ।
यो मुक्तिधर्मं च दधाति चित्ते, मुक्तिं विना मुक्तक एव जीवन् ॥ ७६ ॥

प्रौद्यत्प्रौढप्रतापः प्रणतगजघटाकुम्भमुक्तक्रमाब्ज-
श्चञ्चज्ज्योत्स्नेन्दुकीर्त्त्युज्ज्वलितसुरनदीतारमुक्तासमूहः ।
स्वर्गस्त्रीप्राणनाथेश्वरमुकुटमणिक्रान्तदीप्तिप्रकर्षस्-
तेजस्वी निःस्पृहोऽयं विचरति जगति द्वादशात्मप्रभाजित् ॥ ७७ ॥

## पञ्चमो यतिधर्मः

शुष्कं वनं पल्लवितं तु शत्रुः, सुहृत्कृशानुः सलिलं भुजङ्गः ।
स्रगर्णवो निर्जलभूमिदेशस्तपःप्रभावाच्च भवेज्जगत्याम् ॥ ७८ ॥

तपोनामा धर्म्मः समुचितफलं यच्छति यते-
र्गुणाकर्षी वर्षी प्रशमपयसां कर्मदहनः ।
क्षमायुक्तो मुक्ते रथ इव पथः शीघ्रगमनः,
प्रयत्नं रत्ने सन्महसि तपसीतः सृजतराम् ॥ ७९ ॥

बाह्याभ्यन्तरषट्करूपतपसो विज्ञात्प्रणश्येन्मुने-
र्दारिद्र्यं भवकाननभ्रमणजं प्रादुर्भवेत्सन्निधिः ।
शीलं संयममन्दिरं च युवतिर्नीरागता सम्भवेत्,
पुत्रः केवलसंज्ञको भुवि ततो भाग्याद्भुतो जायते ॥ ८० ॥

कुसुमविशिखो यस्माद्भस्मावशेषतनुर्भवे,
दिव विधुभृतः पद्मा सद्मागतैव हरेर्यथा ।
वसति च मुखे वाणी पाणीकृतेव गृहेऽर्थता,
करणकरिणां घाते तप्तं तपो हरिसन्निभम् ॥ ८१ ॥

## षष्ठो यतिधर्मः

क्षोणीपानीयतेजोमरुदगविकलाऽजीवपञ्चेन्द्रियेषु,
प्रेक्षोपेक्षामनोवाक्करणगृहरजोमार्जनोत्सर्जनेषु ।
यः कर्मानाश्रवश्चेद्वरविरतिमतां संयमो मोक्षमार्ग्ग-
स्तद्धर्मे सोद्यमस्त्वं भव च जिगमिषुर्निर्वृतौ शर्मभाजि ॥ ८२ ॥

प्राणातिपातानृतचौर्यरामा-परिग्रहाक्षस्य कषायकस्य ।
योगत्रिकस्यैव निरोधरूपो, यः संयमः सङ्गमकृत्स सिद्धेः ॥ ८३ ॥

दास्यं लास्यति तस्य वासववधूश्चक्री चकारार्चनां,
हास्यं मुञ्चति सङ्गतिं सुभगता कण्ठं समालिङ्गति ।
कीर्तिश्रीः प्रददाति दक्षिणकरं चास्ते मुखे भारती,
यस्मिन्संयमभूपतिर्निविशते प्रोन्मूलितारिव्रजः ॥ ८४ ॥

संयमः समतयाञ्चितदेहो, लेह एव सुकृतान्तसुधायाः ।
शीलधामहतकामतमिस्त्रो, भूतले विजयते परचैन्द्रः ॥ ८५ ॥

## सप्तमो यतिधर्मः

सत्यादित्यो नयांशुर्जिनप्रतिवदनादुद्गतस्तूदयाद्रे-
र्मिथ्यात्वध्वान्तपङ्क्तिं प्रतिदिशमतिहञ्शोभयन् नव्यपद्मम् ।
मायारात्रिं निरस्यंशुभरुचिदिवसं दर्शयंश्छोटयन्य-
स्तिर्यक्कण्ठप्रबन्धं विरचय मनसा सेवनां तस्य नित्यम् ॥ ८६ ॥

नीवृत्स्वाकृतिनामरूपमुपमा योगः प्रतीत्यर्जुता,
भावश्च व्यवहारसम्मतमिति प्रज्ञापनायां दश ।
भेदा ये कथिता हि सत्यवचसो ज्ञात्वैव तान् ब्रूयतां,
भव्यैः सत्यविचक्षणैर्भगवतो निर्देशकारैर्जनैः ॥ ८७ ॥

क्रोधादिनिःसृतवचो भवपातहेतुः, पाषाणखण्डमिव वारिनिधेरधस्तात् ।
सत्यं शमप्रभवमूर्ध्वगतेर्निमित्तं, तुम्बीफलं पयसि शुष्कतरं यथैव । ८८

एकं सत्यं भवाम्भोधितरणवहनं मोहपाशापहारि,
प्राणित्राणं तनुत्रं सुभटकरगतास्युत्थभीतेरिवाजौ ।
साधुः संविग्नपक्षी व्रजति शिवपुरं सत्यवाहेन शीघ्रं,
भ्राम्येत्संसारकक्षे निखिलनियमभृत्तद्विना व्यर्थमत्र ॥ ८९ ॥

## अष्टमो यतिधर्मः

शौचं चेन्द्रियनिग्रहः परधनत्यागो रतोत्सर्ज्जनं,
मायामोहविवर्जनं त्वखलता निष्पृष्ठिमांसादनम् ।
शौचं सर्वशरीरिरक्षणमपां स्नानेन शुद्धिर्नवा,
किं मत्स्या जलचारिणोऽपि सुगतिं गच्छेयुरस्तांहसः ? ॥ ९० ॥

उपशमरसैर्मिश्रे शुभ्रे शुभाशयशोणगे,
सरुचिपयसि ज्ञानाम्भोजे सशीलसुगन्धिते ।
चरणशिशिरे बोधागाधे दयालहरीचिते,
कुरु कलिमलं दूरे शौचं विधेहि विवेकतः ॥ ९१ ॥

नय मनः स्ववशं हर दुर्मतिं, जिनमते सनये तनु धीषणाम् ।
भज जिनेश्वरपादसरोरुहं, भुवि न चेतन ! शौचमतः परम् ॥ ९२ ॥

अनन्तभवचक्रजभ्रमणतो बहुद्रव्यजा,
व्यधायि शुचिता मयोदधिसरित्सरोऽम्भोऽन्तरे ।
विनेन्द्रियदमं मनोनियमनं च नाभूत्कदा,
स्वभावशुचिता ततः प्रयततां तु तत्राधिकम् ॥ ९३ ॥

## नवमो यतिधर्मः

धनरजतसुवर्णक्षेत्रकुप्यालयान्न-
नृपशुनवविधोऽयं संग्रहो दुर्गतिं यत् ।
नयति निखिलजीवांस्तद्भजस्वानगार !,
निजतनुममतायास्त्यागतोऽकिञ्चनत्वम् ॥ ९४ ॥

अकिञ्चनतया यतेर्नवमधर्म एष एव श्रुतः,
क्षितौ क्षपितकर्मकः परमयोगदीपाम्बरम् ।
सुचित्तजलसंवरः कमनमेघचण्डाशुगः
प्रमाददहनाम्बुदो मनसि धीयतां स त्वया ॥ ९५ ॥

मातापित्रोश्च सेवां न गणयति वशां प्रीतिरीतिं सुतानां,
मित्राणां नैवं मैत्रीं स्वचरणवशिना सेवकानां च मूल्यम् ।
भक्तिं साधर्मिकाणां सुगुरुभगवतामर्चनां कर्महर्त्रीं,
जन्तुश्चेत्काञ्चनार्थी परिहर हृदयं काञ्चनेऽकिञ्चनातः ॥ ९६ ॥

महानर्थो यस्माज्जगति जगतीलङ्घनमयः,
पयोधौ संपाते मृतिभृति च धावन्ति पुरुषाः ।
त्यजन्ति स्वं धर्मं परमगुणहेतुं च यतयो,
जहीहि स्वर्णं त्वं नवममुनिधर्मं कुरु करे ॥ ९७ ॥

## दशमो यतिधर्मः

शीलं रत्नं हरति धनवच्छोकदारिद्र्यवह्निं,
शीलं मन्त्रं स्मरफणिविषं चौषधीवद्भिनत्ति ।
शीलं वज्रं खनति नगवन्मोहशत्रुं समर्थं,
शीलं चक्रं चरणनगरं रक्षति क्षुद्रभीतेः ॥ ९८ ॥

शीलं सौभाग्यधाम प्रबलशुचियशोदिक्पथोल्लङ्घनाश्वः,
स्वाहाभुक्कल्पवृक्षोपचयततिकरं सिद्धिसोपानरूपम् ।
सच्चारित्रद्रुबीजं भवभयतटिनीभर्त्रगस्त्यास्यभूतं,
प्रोत्सृज्योन्मादकन्थां मणिचितवसनं स्वीकुरु ब्रह्मचर्यम् ॥ ९९ ॥

शिवगृहशिरोगेहारोहे वरा त्वधिरोहिणी ।
त्रिभुवनकृतस्थानासूनां वशीकरणं ध्रुवम्
समवसरणश्रीवासाम्भोजमात्मसरःस्थलं ।
दशमसुशमिश्रेयोधर्मोऽस्त्यमैथुननामकः ॥ १०० ॥

नुदति मदगदौघ राति शौर्यं त्वमोघं,
गमयति च दिगन्तं स्वैरिणीं कीर्तिकान्ताम् ।
रमयति निजलक्ष्मीं स्वाङ्गणे रागिणीं वः,
प्रथयति गुणराशिं शीलमात्रं जनानाम् ॥ १०१ ॥

## ग्रन्थप्रशस्तिः

श्री आनन्दाभिधाना विमलपदभृतः सत्तपागच्छसूर्या
स्तेषां चन्द्रः पदेऽभूद्विजयपदधरो दानसूरीश्वरश्च ।
श्रीमद्धीराभिधानः पुनरपि सविता चोद्गतो ध्वान्तलोपी,
साहिश्रीअक्बरेण प्रकटितमहिमा दुर्जनाम्भःप्रणाशात् ॥ १०२ ॥

श्रीसेनश्वेतवाजी धृतविजयपदो देवसूरिर्दिनेशः,
सूरास्ते श्रीप्रभाख्यो मृगभृदभिनवोऽभूत्तमोध्वंसकारी ।
जातः श्रीज्ञानसूरिर्विमलपदरविद्योतितार्हत्पथाग्रः,
श्रीमत्सौभाग्यवार्द्धी रुचिरगुणधरः सूरिमुख्यो बभूव ॥ १०३ ॥

प्रोद्भूतः पट्टसूर्य सुमतिजलनिधिः सूरिराजस्तपस्वी,
यावज्जीवोज्झिताज्येतरविकृतितपोवर्धमानाख्यधारी ।
संविग्नो भिक्षुकोऽभूदिह च कलियुगे धन्य एवापरोऽयं,
श्रीसिद्धाद्रौ प्रतिष्ठाकृदपि बहुगुणः सङ्घभाग्येन जातः ॥ १०४ ॥

गीतार्थो ग्रन्थकर्ता विजयपदपरः श्रीयशोवाचकेशो,
यः सत्संविग्नपक्षीतिबिरुदविबुधस्तर्कसंपर्कबुद्धिः ।
न्यायाचार्यस्तु काश्यां द्विजकृतमहिमो लब्धविद्याप्रतिष्ठ
स्तत्साहाय्यप्रदानान्मुदितजनपदोऽभून्मुनिः सिंहशूरः ॥ १०५ ॥

संवेगी साधुसिंहर्द्धिविमलसुगुरुर्बोधिबीजं वपन्यो,
ग्रामे ग्रामे व्यहार्षीत्सुविहितनिकरो देशनाभिर्जगत्याम् ।
मिथ्यात्वस्तम्भमर्द्दी मदनतरुजडोन्मूलने हस्तिवीर्यो,
गाम्भीर्यक्षोभिताब्ध्युद्धतसलिलभरो निःस्पृहः शुद्धभोजी ॥ १०६ ॥

विमलकीर्तिधरो भुवि तच्छिशुर्विमलकीर्तिगुरुर्गुणसागरः ।
विमलशिष्यजनैः परगौतमो, विमलशासनशोभितदेशनः ॥ १०७ ॥

विबुधविमलसूरिस्तच्छिशुः सङ्घसेवी, सुमतिजलधिसूरेर्लब्धसूरित्वसंज्ञः
निजपरहितहेतोस्तत्त्वसारोपदेशं, शतकमितसूकाव्यैर्ग्रन्थरूपं व्यधत्त १०८

कृशानुनन्दमुनिचन्द्र-मितेऽब्दे श्रावणासितपञ्चम्याम् ।
उपदेशशतकाख्यग्रन्थः समाप्तोऽभूत्पत्तने ॥ १०९ ॥

अज्ञातकर्तृकम्

# ॥ देशनाशतकम् ॥

संसारे नत्थि सुहं, जम्मजरामरणरोगसोगेहिं ।
तह वि हु मिच्छंधजिआ, न कुणंति जिणिंदवरधम्मं ॥ १ ॥

माइंदजालसरिसं, विज्जुचमक्कारसत्थहं सव्वं ।
सामण्णं खणदिट्ठं, खणनट्ठं कोत्थ पडिबंधो ॥ २ ॥

को कस्स इत्थ सयणो, को व परो भवसमुद्दभमणम्मि ।
मच्छु व्व भमंति जिआ, मिलंति पुण जंति अइदूरं ॥ ३ ॥

जम्मे जम्मे सयणा - वलीउ मुक्काउ जाउ जीवेण ।
ताओ सव्वागासे, संगहियाओ न मायंति ॥ ४ ॥

जीवेण भवे भवे, मिल्हिआइं देहाइं जाइं संसारे ।
ताणं न सागरेहिं, कीरइ संखा अणंतेहिं ॥ ५ ॥

तेलुक्कं पि असरणं, आहिंडइ विविहजोणिपविसंतं ।
लुक्कंतं पि न छुट्टइ, जम्मजरामरणरोगाणं ॥ ६ ॥

छंडे वि सयणवग्गं, घरसारपवित्थरं पि सयलं पि ।
संसारअपारवहे, अणाहपहिअ व्व जाइ जिओ ॥ ७ ॥

वायहयपंडुपत्ताणं, संचयं जाइ दसदिसि जेम ।
इट्ठं पि तह कुडुंबं, सकम्मवायाहयं जाइ ॥ ८ ॥

हा माया हा बप्पो, हा बंधू हा पणइणी सुओ इट्ठो ।
पिक्खंतस्स वि सव्वं, मरइ कुडुंबं सकरुणस्स ॥ ९ ॥

अहवा कुडुंबमज्झे, अइदइओ वाहिवेयणाभिहओ ।
सलसलइ वाहिमुम्मुर-मज्झगओ वडहपोअ व्व ॥ १० ॥

सयणा न लिंति विअणं, न विज्ज ताणं कुणंति ओसहिणा ।
मच्चूवग्घेण जिओ, निज्जइ जअ हरिणपोअ व्व ॥ ११ ॥

जह तरुअरम्मि सउणा, वियालए दसदिसागया वसिउं ।
जंति पहाए नवरं, न विज्जए के वि किंचि दिसिं ॥ १२ ॥

घरतरुअरम्मि सयणा, चउगइसंसारबहुदिसागंतुं ।
वसिऊण पंच दिअहे, न नज्जए कत्थ वच्चंति ? ॥ १३ ॥

अत्थो घरे निअत्तइ, बंधवसत्थो मसाणभूमीए ।
एगो अ जाइ जीवो, न किंचि अत्थेण सयणेण ॥ १४ ॥

मच्चुकरहेण खज्जइ, जिअलोअवणं अपत्तफलकुसुमं ।
अनिवारिअपसरोधो, सदेवमणुआसुरलोए ॥ १५ ॥

गब्भत्थं जोणिगयं, नीहरमाणं च तहय नीहरियं ।
बालं परिवड्ढंतं, डहरं तरुणं पि मज्झवयं ॥ १६ ॥

तसरं पंडुरं थेरं, मच्चुविवाए वि पिच्छए सव्वं ।
पायाले वि पविट्ठं, गिरिगुहकंतारमज्झम्मि ॥ १७ ॥

थलउअहिसिलसिंगे, आगासे वा भमंतयं जीवं ।
सुहिअं दुहिअं सरणं, रोरं मुक्खं विउं विरूअं ॥ १८ ॥

रूवं वाहिअं निरूअं, दुब्बलं बलियं पि नेव परिहरइ ।
वणगयदवु व्व जलिउं, सयरायरपाणिसंघातं ॥ १९ ॥

अत्थेण न छुट्टिज्जइ, बाहुबलेण न मंततंतेहिं ।
ओसहमणिविज्जाहिअ, न धरा मच्चुस्स घडीआ वि ॥ २० ॥

जम्मजरामरणहया, सत्ता बहुरोगसोगसंतत्ता ।
हिंडंति भवसमुद्दे, दुक्खसहस्साइं च पावंता ॥ २१ ॥

जम्मजरामरणत्ता, सत्ता पिअविप्पओगदुक्खत्ता ।
असरणा मरंति जंति अ, संसारे संसरंति सया ॥ २२ ॥

असरणा मरंति इंदा, बलदेवा वासुदेवचक्कहरा ।
ता एअं नाऊणं, करेह धम्मुज्जमं तुरिअं ॥ २३ ॥

भीसणभवाडवीए, एगो जीवो सया वि असहाओ ।
कम्महओ अ भवालिं, आहिंडइ विविहरूवेहिं ॥ २४ ॥

जह आगइ त्ति एगो, कडिदोरेणावि विरहिओ जीवो ।
गच्छिस्सइ तह वि अ, एगो छंडे वि सव्वं पि ॥ २५ ॥

जाइ अणाहो जीवो, दुमस्स पुप्फं व कम्मवायहओ ।
धणधन्नाहरणाइं, पिअपुत्तकलत्तमिल्हे वि ॥ २६ ॥

अन्नस्स पेट्टसूले, अन्नस्स न वेअणा जहा होइ ।
तह अन्नेण कयाइं, कम्माइं न भुंजए अन्नो ॥ २७ ॥

छंडेयव्वं देहं, अवस्स कइआ वि नत्थि संदेहो ।
ता छड्डणजोएणं, उवज्जिअव्वं सासयं सुक्खं ॥ २८ ॥

तुच्छत्थिखंडसरिसा, विसया महानिहिसमं च मणुअत्तं ।
लद्धेण जेण मुक्खो, लहइ धम्मे निउत्तेण ॥ २९ ॥

जह सव्ववाहिहरगं, गोसीसं चंदणं महग्घं पि ।
दहिऊण कुणइ छारं, भायणनिम्मज्जणट्ठाए ॥ ३० ॥

तह दुलहमहग्घेअं, मणुयत्तं दहइ छारयाणेइ ।
विसयाइट्टीकज्जे, जो धम्मे तं न लाएइ ॥ ३१ ॥

सव्वट्ठसिद्धिवासी, देवा निवडंति आउए जिण्णे ।
तेत्तीससागराऊ, का गणणा इयरजीवेसु ॥ ३२ ॥

जं वोलीणं सुक्खं, तं वीसरिअं न तेण तत्तिगओ ।
संपइ समए सुक्खं, जं भुंजइ तं मुणइ एव ॥ ३३ ॥

तिलतुसवालग्गं पि हु, चउदसरज्जुम्मि इत्थ संसारे ।
जं असिऊण न मुक्कं, तं दव्वं नत्थि अणुअं पि ॥ ३४ ॥

सो नत्थित्थ पएसो, लोए तिविहे वि जत्थ न हु जाओ ।
न मओ अ वाहिगहिओ, जीवो भवभमणकंतारे ॥ ३५ ॥

सव्वे जीवा जणिआ, जणिओ सव्वेहिं एस पुण गसिओ।
सव्वे अणेण गसिआ, अणाइसंसारभमणम्मि ॥ ३६ ॥

सव्वे देवा आसी, सव्वे मणुतिरिय आसि संसारे।
सव्वे अणंतवारं, परिक्कमा नरयजालाहिं ॥ ३७ ॥

धी धी धी संसारं, देवो मरिऊण जं तिरी होइ।
मरिऊण रायराया, परिपक्कइ नरयजालाहिं ॥ ३८ ॥

हा विसमो संसारो, तरुणो निअरूवगव्विओ मरिउं।
जाई ससरीरे वि अ, किमीकुलमज्झम्मि होइ किमी ॥ ३९ ॥

हा हा हा अइकट्ठो, संसारो कम्मसंतई बलिया।
जेण विअक्खणमणुओ, एगिंदिय होइ मरिऊणं ॥ ४० ॥

अंधो बहिरो मूओ, रसणिंदिअवज्जिओ जिओ दुहिओ।
हिंडइ अणंतकालं, बेइंदियत्तं पि अलहंतो ॥ ४१ ॥

सामी जायइ दासो, दासो सामित्तणेण जायइ।
मित्तो जायइ सत्तू, सत्तू वि अ होइ पुण मित्तो ॥ ४२ ॥

बंधू वि होइ परो, परो वि बंधुत्तणेण संघडइ।
सयणो वि अ होइ परो, परो वि सयणत्तमुवजाइ ॥ ४३ ॥

माया जायइ पत्ती, पत्ती मरिऊण होइ पुण माया।
बहिणी वि होइ धूआ, धूआ बहिणी वि पत्ती वि ॥ ४४ ॥

पुरिसो वि होइ इत्थी, नपुंसगत्तेण सो वि संजायइ।
कुंथू वि होइ हत्थी, हत्थी कुंथूणत्तणमुवेइ ॥ ४५ ॥

नत्थि हु कोइ अपुव्वो, जम्मो देहो वि जं न जीवेण।
गहिऊणं पुण मुक्को, भवपरिवाडीभमंतेण ॥ ४६ ॥

कत्थइ महुरं गीअं, पिअयणसहिएण उववणे रम्मे।
कत्थइ गुरुअविलावा, पियविरहविसंथुलेण कया ॥ ४७ ॥

बहुसो नरयगयेणं, विअणानिवहेहिं पूरिओ कालो ।
कंदंतकरंतेणं, सागरमाणो महाघोरो ॥ ४८ ॥

निरउव्वट्टो वि पुणो, संसरमाणो तिरियजोणीसु ।
खुहतिण्हवेयणहओ, भमिओ संसारकंतारे ॥ ४९ ॥

तिरियत्तणा उवट्टो, संसरमाणो मणुस्सजाईसु ।
विविहं दुक्खं दुग्गं, सारीरं माणसं पत्तो ॥ ५० ॥

तुडिचडणेण भमंतो, सुरालयं कह वि पाविउं जीवो ।
पाहुणउ व्व रमित्ता, कइ वि दिणेन्नत्थ पुण एइ ॥ ५१ ॥

जम्मजरमच्चुरोगा, सोगा बाहंति सव्वलोगम्मि ।
मुत्तूण सिद्धिखित्तं, संसाराइअभावं ति ॥ ५२ ॥

एसो चउगइगुहिरो, संसारमहोअही दुरुत्तारो ।
मच्छु व्व जहा जीवा, अणोरपारम्मि भमणंति ॥ ५३ ॥

इअ संसारे असारे, अणोरपारम्मि ताव हिंडंति ।
जाव न दयाइधम्मं, जीवा काऊण सिज्झंति ॥ ५४ ॥

अन्नाणं खलु कट्ठं, अन्नाणाओ न किंचि कट्ठयरं ।
भवसायरं अपारं, जेणावरिआ भमंति जिआ ॥ ५५ ॥

इगबितिचउरिंदियए, संमुच्छिमजीवरासिपडिआणं ।
दुलहाइ धम्मबोही, अबोहिलाभासु जोणीसु ॥ ५६ ॥

को नारयाणं, धम्मं, कहेइ ताणं पि बोही दूरेणं ।
तिरिआ वि किसन्नत्ता, तेणं अइदुलहो बोहिपहो ॥ ५७ ॥

मणुआ वि जवणसयबब्बराइ, बहुविहअणारिया कत्तो ।
बोहिं लहंति मूढा, दयाइपरिणामपरिमुक्का ॥ ५८ ॥

अंधा बहिरा मूगा, पंगू रोगेहिं पीडिया विविहा ।
न लहंति बोहिलाभं, पडिया पावाडवीमज्झे ॥ ५९ ॥

अन्ने अकम्मभूमी, संभूआ न हु लहंति ते बोहिं।
छप्पन्नंतरदीवा, बोही तेसिं पि दुल्लंभो ॥ ६० ॥

अन्ने धम्माभिमुहा, धम्मस्स विसेसयं अयाणंता।
न लहंति बोहिलाभं, हिंडंति कुधम्मिधम्मिहुआ ॥ ६१ ॥

कुच्छियदेवाराहग, कुलिंगधारी कुतित्थरइ निच्चं।
कुच्छियआगमभाविअ, सुधम्मबोही न पावंति ॥ ६२ ॥

दुट्ठत्तणेण जडत्तणेण, दुविअड्ढपंडिअत्तेणं।
संसारसूअरत्तेण, केइ बोहिं न पावंति ॥ ६३ ॥

आलस्सोवहया अन्ने, अन्ने मोहेण मोहिआ पावा।
रागाइहया अन्ने, बोही तेसिं पि दूरेण ॥ ६४ ॥

अन्ने माणोवहया, अवन्नवाएण अट्ठमयधिट्ठा।
बोहिबाहिरा ते वि, हुंति संसारवुड्ढिकरा ॥ ६५ ॥

कोहणसीला अन्ने, सप्पा इव मिसिमिसिंति पडिणीया।
ताणं कत्तो बोही, अबोहीलाभेण पडिबद्धा ॥ ६६ ॥

अन्ने वि मत्तबाला, अन्ने पंचंगविसयतल्लिच्छा।
अन्ने कसायपरिगया, अन्ने निद्दालसोवहया ॥ ६७ ॥

एगे भत्तकहाए, चोरकहाए अ जणवयकहाए।
अच्छंति विगहबद्धा, अइदुलहा बोहि तेसिं पि ॥ ६८ ॥

किवणत्तणेण अन्ने, भएण नाणाविहेण पडिबद्धा।
न लहंति बोहिलाभं, सोगेण य सल्लिआ अन्ने ॥ ६९ ॥

अन्नाणोवहया अन्ने, सेअं किसणं पि जाण समसरिसं।
ते वि न लहंति बोहिं, संसारबइल्ल ते दुपया ॥ ७० ॥

अन्ने वि कुऊहलिणो, दिसिदेसुज्जाणपव्वयवणेसुं।
पिच्छणयगीअवाइअ, अइहासरसिक्कपडिबद्धा ॥ ७१ ॥

बहुमंततंतचवणा, कुगहकुहेडयकुदंसणविलग्गा ।
कुमइकुदिट्ठंतेहि अ, बोहिं न लहंति इअमाई ॥ ७२ ॥

जह कप्परुक्खतरूणं, सरिसनामेण अंतरं गरुअं ।
तह जणजिणधम्मेसु वि, समनामे अंतरं गरुअं ॥ ७३ ॥

जहघरघट्टचिंता – मणीण पाहाणसरिसनामेहिं ।
कंचणलुट्ठाणं तह, जाणिज्जा अंतरं गरुअं ॥ ७४ ॥

एवं च नामसामण्णयाइ, विउसो न लग्गए धम्मे ।
सुपरिक्खिउ त्ति काउं, नाउं परमत्थओ लेइ ॥ ७५ ॥

जो रीरीति काऊण, कंचणं लेइ वण्णनडिअंगं ।
सो विक्कयम्मि घट्ठो, बहु झुरइ अणायपरमत्थो ॥ ७६ ॥

कणयं पि जो कलित्ता, कसच्छेउं ताविऊण तं लेइ ।
छिज्जइ न परिक्खन्नू, एवं धम्मे वि जो कुसलो ॥ ७७ ॥

दीसंति दाणी सुहडा, अइविउसा के वि के वि रूवी वि ।
परमत्थवत्थुगहणिक्क- लालसा के वि दीसंति ॥ ७८ ॥

बावत्तरिकलाकुसला, कसणाए कणयरययरयणाणं ।
चुक्कंति धम्मकसणा, तेसिं वि धम्मु त्ति दुन्नेउ ॥ ७९ ॥

ते धन्ना कयपुण्णा, जीवा तेलुक्कभवसमुद्दम्मि ।
जे धम्मबोहिरयणं, लहंति सिवसंपयनिहाणं ॥ ८० ॥

धम्मेण होइ राया, चक्कहरो नवनिहीसरो गरुओ ।
चउदसरयणाहिवई, भारहछक्खंडभत्तारो ॥ ८१ ॥

बलदेव-वासुदेवत्तणाइ, खयरत्तणाइं पावंति ।
काऊण तवविसेसं, हुंति सुरिंदा वि धम्मेणं ॥ ८२ ॥

धम्मेण असुरवंतर – जोइसवेमाणिअत्तणाइं पि ।
लब्भंति इच्छिआइं, सुक्खाइं जाइं तेलुक्के ॥ ८३ ॥

मणिमंतोसहिविज्जाउ, जाउ सिज्झंति ताउ धम्मेणं ।
देवा कुणंति आणं, अपरिहओ होइ धम्मेणं ॥ ८४ ॥

अरोग-रूव-धण-सयण, संपया-देहमाउ-सोहग्गं ।
सग्गापवग्गगमणं, होइ सुविन्नेण धम्मेण ॥ ८५ ॥

जत्थ न जरा न मच्चू, न वाहिणो नेव सव्वदुक्खाइं ।
सय सुत्थमेव जीवो, वसइ तहिं सव्वकालम्मि ॥ ८६ ॥

सम्मत्तसाररहिया, जाणंता बहुविहाइ सत्थाइ ।
अरय व्व तुंबलग्गा, भमंति संसारकंतारे ॥ ८७ ॥

सम्मत्तपत्तजीवा, नारयतिरिया न हुंति कइआ वि ।
सुहमाणसदेवेहिं, उप्पज्जित्ता सिवं जंति ॥ ८८ ॥

चिंतय रे जीव तए, अन्नाणवसेण विवेगरहिएण ।
विअणाउ अमाणाउ, नरएसु अणंतसो पत्ता ॥ ८९ ॥

अच्छिनिमीलणमित्तं, नत्थि सुहं दुक्खमेव पडिबद्धं ।
नरए नेरइआणं, अहोनिसं पच्चमाणाणं ॥ ९० ॥

जं नरए नेरइया, दुक्खं पावंति गोयमा ! तिक्खं ।
तं पुण निगोअमज्झे, अणंतगुणिअं मुणेअव्वं ॥ ९१ ॥

सूइहिं अग्गिवण्णाहिं संभिन्नस्स निरंतरं ।
जावइयं गोयमा ! दुक्खं, गब्भे अट्ठगुणं तओ ॥ ९२ ॥

जायमाणस्स जं दुक्खं, मरमाणस्स जंतुणो ।
तेण दुक्खेण संतत्तो, न सरई पुव्वजाइयं ॥ ९३ ॥

ता धीर मा विसीअसु, इमासु अइअप्पवेअणासु तुमं ।
को उत्तरिउं जलहिं, निबुड्डए गुप्पईनीरे ? ॥ ९४ ॥

न परो करेइ दुःक्खं, नेव सुहं कोइ कस्सई देई ।
जं पुण सुचरिअदुचरिअं, परिणमइ पुराणयं कम्मं ॥ ९५ ॥

न हु होइ सोइअव्वो, जो कालगओ दढं समाहीए ।
सो होइ सोइअव्वो, तवसंजमदुब्बलो जो उ ॥ ९६ ॥

तित्थयरा गणहारी, सुरवइणो चक्किकेसवा रामा ।
संहरिया हयविहिणा, सेसजिएसुं च का गणना ? ॥ ९७ ॥

जं चिअ विहिणा लिहिअं, तं चिअ परिणमइ सयललोयस्स ।
इअ जाणिऊण धीरा, विहुरे वि न कायरा हुंति ॥ ९८ ॥

अन्नन्नदेसजाया, अन्नन्नकुलेसु वड्ढिअसरीरा ।
जिणसासणं पवन्ना, सव्वे ते बंधवा भणिआ ॥ ९९ ॥

आजम्मेणं तु जं पावं, बंधिज्जा मच्छबंधओ ।
वयभंगं काउमाणो, तं चेव य पुणो अट्ठगुणं ॥ १०० ॥

पू.आ.श्री विजयसिंहसूरिविरचितम्

# ॥ साम्यशतकम् ॥

अहङ्कारादिरहितं, निश्छद्मसमताऽऽस्पदम् ।
आद्यमप्युत्तमं कञ्चित्, पुरुषं प्रणिदध्महे ॥ १ ॥

उन्मनीभूयमास्थाय, निर्मायसमतावशात् ।
जयन्ति योगिनः शश्वदङ्गीकृतशिवश्रियः ॥ २ ॥

औदासीन्य क्रमस्थेन, भोगिनां योगिनामयं ।
आनन्दः कोऽपि जयतात्, कैवल्यप्रतिहस्तकः ॥ ३ ॥

साम्यपीयूषपाथोधि–स्नाननिर्वाणचेतसाम् ।
योगिनामात्मसंवेद्य–महिमा जयताल्लयः ॥ ४ ॥

आस्तामयं लयः श्रेयान्, कलासु सकलास्वपि ।
निष्कले किल योगेऽपि, स एव ब्रह्मसंविदे ॥ ५ ॥

नित्यानन्दसुधारश्मे-रमनस्ककलाऽमला ।
अमृतस्यादिमं बीज-मनपाया जयत्यसौ ॥ ६ ॥

यः कश्चित्तु लयः साम्ये, मनागाविरभून्मम ।
तमाशु वचसां पात्रं, विधातुं यतते मतिः ॥ ७ ॥

अष्टाङ्गस्यापि योगस्य, रहस्यमिदमुच्यते ।
यदङ्ग-विषयासङ्गत्यागान्माध्यस्थ्यसेवनम् ॥ ८ ॥

रागद्वेषपरित्यागा-द्विषयेष्वेषु वर्तनम् ।
औदासीन्यमिति प्राहु-रमृताय रसाञ्जनम् ॥ ९ ॥

तस्यानघमहो बीजं, निर्ममत्वं स्मरन्ति यत् ।
तद्योगी विदधीताशु, तत्रादरपरं मनः ॥ १० ॥

विहाय विषयग्राम-मात्माराममना भवन् ।
निर्ममत्वसुखास्वा-दान्मोदते योगिपुङ्गवः ॥ ११ ॥

येऽनिशं समतामुद्रां, विषयेषु नियुञ्जते ।
करणैश्वर्यधुर्यास्ते, योगिनो हि नियोगिनः ॥ १२ ॥

ममत्ववासना नित्य-सुखनिर्वासनानकः ।
निर्ममत्वं तु कैवल्य-दर्शनप्रतिभूः परम् ॥ १३ ॥

भुव्यभिष्वंग एवायं, तृष्णाज्वरभरावहः ।
निर्ममत्वौषधं तत्र, विनियुञ्जीत योगवित् ॥ १४ ॥

पर्यवस्यति सर्वस्य, तारतम्यमहो ! क्वचित् ।
निर्ममत्वमतः साधु, कैवल्योपरि निष्ठितम् ॥ १५ ॥

ममत्वविषमूर्छाल-मान्तरं तत्त्वमुच्चकैः ।
तद्वैराग्यसुधासेका-च्चेतयन्ते हि योगिनः ॥ १६ ॥

विरागो विषयेष्वेषु परशुर्भवकानने ।
समूलकाषंकषित-ममतावल्लिरुल्बणः ॥ १७ ॥

शरीरकेऽपि दुःखाय मोहमाधाय तत्परा ।
क्लिश्यन्ते जन्तवो हन्त ! दुस्तरा भववासना ॥ १८ ॥

अहो ! मोहस्य माहात्म्यं, विद्वत्स्वपि विजृम्भते ।
अहङ्कारभवात्तेषां यदन्धङ्करणं श्रुतम् ॥ १९ ॥

श्रुतस्य व्यपदेशेन, विवर्त्तस्तमसामसौ ।
अन्तः सन्तमसः स्फाति-र्यस्मिन्नुदयमियुषि ॥ २० ॥

केषाञ्चित्कल्पते मोहाद्, व्यावभाषीकृते श्रुतम् ।
पयोऽपि खलु मन्दानां, सन्निपाताय जायते ॥ २१ ॥

ममत्वपङ्कं निःशङ्कं, परिमार्ष्टुं समन्ततः ।
वैराग्यवारिलहरी-परीरम्भपरो भव ॥ २२ ॥

रागोरगविषज्वाला-वलीढदग्धचेतनः ।
न किञ्चिच्चेतति स्पष्टं, विवेकविकलः पुमान् ॥ २३ ॥

तद्विवेकसुधाम्भोधौ, स्नायं स्नायमनामयः ।
विनयस्व स्वयं राग-भुजङ्गममहाविषम् ॥ २४ ॥

बहिरन्तर्वस्तुतत्त्वं, प्रथयन्तमनश्वरम् ।
विवेकमेकं कलये-त्तार्त्तीयीकं विलोचनम् ॥ २५ ॥

उद्दामक्रममाबिभ्रद्, द्वेषदन्तावलो बलात् ।
धर्मारामममयं भिन्द-न्नियम्यो जितकर्मभिः ॥ २६ ॥

सैष द्वेषशिखी ज्वाला-जटालस्तापयन्मनः ।
निर्वाप्यः प्रशमोद्दाम-पुष्करावर्त्तसेकतः ॥ २७ ॥

वश्या वेश्येव कस्य स्या-द्वासना भवसंभवा ।
विद्वांसोऽपि वशे यस्याः, कृत्रिमैः किल किञ्चितैः ॥ २८ ॥

यावज्जागर्ति सम्मोह-हेतुः संसारवासना ।
निर्ममत्वकृते तावत्, कुतस्त्या जन्मिनां रुचिः ॥ २९ ॥

दोषत्रयमयः सैषः, संस्कारो विषमज्वरः ।
मेदुरीभूयते येन, कषायक्काथयोगतः ॥ ३० ॥

तत्कषायानिमांश्छेत्तु-मीश्वरीमविनश्वरीम् ।
पावनां वासनामेना-मात्मसात्कुरुत द्रुतम् ॥ ३१ ॥

स्पष्टं दुष्टज्वरः क्रोध-श्चैतन्यं दलयन्नयम् ।
सुनिग्राह्यः प्रयुज्याशु, सिद्धौषधिमिमां क्षमाम् ॥ ३२ ॥

आत्मनः सततस्मेर-सदानन्दमयं वपुः ।
स्फुरल्लूकानिलस्फातिः, (स्फुरदुल्कानलस्फातिः) कोपोऽयं
ग्लपयत्यहो ॥ ३३ ॥

व्यवस्थाप्य समुन्मील-दहिंसावल्लिमण्डपे ।
निर्वापय तदात्मानं, क्षमाश्रीचंदनद्रवैः ॥ ३४ ॥

क्रोधयोधः कथङ्कार-महङ्कारं करोत्ययम् ।
लीलयैव पराजिग्ये, क्षमया रामयापि च (यः) ॥ ३५ ॥

भर्तुः शमस्य ललितै-र्बिभ्रती प्रीतिसम्पदम् ।
नित्यं पतिव्रतावृत्तं, क्षान्तिरेषा निषेवते ॥ ३६ ॥

कारणानुगतं कार्य-मिति निश्चिनु मानस ! ।
निरायासा सुखं सूते, यन्निःक्लेशमसौ क्षमा ॥ ३७ ॥

अखर्वगर्वशैलाग्र-श्रृङ्गादुद्धरकन्धरः ।
पश्यन्नहंयुराश्चर्यं, गुरूनपि न पश्यति ॥ ३८ ॥

उच्चैस्तरमहङ्कार-नगोत्सङ्गमसौ श्रितः ।
युक्तमेव गुरून्मानी, मन्यते यल्लघीयसः ॥ ३९ ॥

तिरयन्नुज्ज्वलालोक-मभ्युन्नतशिराः पुरः ।
निरूणद्धि सुखाधानं, मानो विषमपर्वतः ॥ ४० ॥

मृदुत्वभिदुरोद्योगा-देनं मानमहीधरम् ।
भित्त्वा विधेहि हे स्वान्त ! प्रगुणां सुखवर्तिनीम् ॥ ४१ ॥

चित्रमम्भोजिनी(दल)-कोमलं किल मार्दवम् ।
वज्रसारमहङ्कार-पर्वतं सर्वतः स्यति ॥ ४२ ॥

अस्मिन् संसारकान्तारे, स्मेरमायालतागृहे ।
अश्रान्तं शेरते हन्त !, पुमांसो हृतचेतसः ॥ ४३ ॥

मायावल्लीवितानोऽयं, रुद्धब्रह्माण्डमण्डपः ।
विधत्ते कामपिच्छायां, पुंसां सन्तापदीपनीम् ॥ ४४ ॥

सूत्रयन्ती गतिं जिह्मां, मार्दवं बिभ्रती बहिः ।
अजस्रं सर्पिणीवेयं, माया दन्दश्यते जगत् ॥ ४५ ॥

प्रणिधाय ततश्चेत-स्तन्निरोधविधित्सया ।
ऋजुतां जाङ्गुलीमेतां, शीतांशुमहसं स्मरेत् ॥ ४६ ॥

लोभद्रुममवष्टभ्य, तृष्णावल्लिरुदित्वरी ।
आयासकुसुमस्फीता, दुःखैरेषा फलेग्रहिः ॥ ४७ ॥

आशाः कवलयन्नुच्चै-स्तमो मांसलयन्नयम् ।
लोभः पुमर्थहंसानां, प्रावृषेण्यघनाघनः ॥ ४८ ॥

क्षमाभृदप्रियः साधु-वृत्तलक्ष्मीविनाकृतः ।
मर्यादामदयं लुम्पन्, लोभोऽम्बुधिरयं नवः ॥ ४९ ॥

लवणोदन्वतो यः स्याद-गाधबोधने विभुः ।
अलम्भविष्णुः सोऽप्यस्य, नैव वैभवसंविदे ॥ ५० ॥

समन्तात्तस्य शोषाय, स्वस्थीकृतजलाशयम् ।
इमं मानससन्तोष-मगस्तिं श्रय सत्वरम् ॥ ५१ ॥

यस्मै समीहसे स्वान्त !, वैभवं भवसम्भवम् ।
अनीहयैव तद्वश्य-मवश्यं श्रय तं (तत्) सुखम् ॥ ५२ ॥

अजितैरिन्द्रियैरेष, कषायविजयः कुतः ।
तदेतानि जयेद्योगी वैराग्यस्थेमकर्मभिः ॥ ५३ ॥

एतानि सौमनस्यस्य, द्विषन्ति महतामपि ।
स्वार्थसम्पत्तिनिष्ठानि, स्पर्धन्ते हन्त ! दुर्जनैः ॥ ५४ ॥

यद्वामी पिशुनाः कुर्युरनार्य(रनर्थ)मिह जन्मनि ।
इन्द्रियाणि तु दुर्वृत्तान्यमुत्रापि प्रकुर्वते ॥ ५५ ॥

भोगिनो दृग्विषाः स्पष्टं, दृशा स्पृष्टं दहन्त्यहो ! ।
स्मृत्यापि विषयाः पापा, दन्दह्यन्ते च देहिनः ॥ ५६ ॥

विष्येष्विन्द्रियग्राम-श्चेष्टमानोऽसमञ्जसम् ।
नेतव्यो वश्यतां प्राप्य, साम्यमुद्रां महीयसीम् ॥ ५७ ॥

यदामनन्ति विषयान्, विषसब्रह्मचारिणः ।
तदलीकममी यस्मा-दिहामुत्रापि दुःखदाः ॥ ५८ ॥

यदात्मन्येव निःक्लेशं, नेदीयोऽकृत्रिमं सुखम् ।
अमीभिः स्वार्थलाम्पट्या-दिन्द्रियैस्तद्विबाध्यते ॥ ५९ ॥

अन्तरङ्गद्विषत्सैन्य-नासीरैर्वीरकुञ्जरैः ।
क्षणादक्षैः श्रुतबलं, लीलयैव विलुप्यते ॥ ६० ॥

स्वैरचारीन्द्रियाश्वीय-विशृङ्खलपदक्रमैः ।
विसृत्वरेण रजसा, तत्त्वदृष्टिर्विलीयते ॥ ६१ ॥

इन्द्रियाण्येव पञ्चेषु-र्विधाय किल सायकान् ।
जगत्त्रयजयी दत्ते, पदं वक्षसि विद्विषाम् ॥ ६२ ॥

वीरपञ्चतयीमेता-मुरीकृत्य मनोभवः ।
उपैति सुभटश्रेणी-संख्यारेखां न पूरणीम् ॥ ६३ ॥

अहो ! सङ्कल्पजन्मायं, विधाता नूतनः किल ।
क्लेशजं दुःखमप्येत-द्धत्ते यस्तु सुखाख्यया ॥ ६४ ॥

विषमेषुरयं धूर्त्तचक्रशक्रत्वमर्हति ।
दुःखं सुखतयाऽदर्शि, येन विश्वप्रतारिणा ॥ ६५ ॥

यस्य साम्राज्यचिन्तायां, प्रधानं हन्त ! योषितः ।
सोऽपि सङ्कल्पभूः स्वस्य, कथं स्थेमानमीहते ? ॥ ६६ ॥

दर्शयन्ति खलवै-रतथ्यमपि तात्त्विकम् ।
या इन्द्रजालिकप्रष्ठास्ताः किं विश्रम्भभाजनम् ? ॥ ६७ ॥

निजलालाविलं लीढे, यथा श्वा शुष्ककीकसम् ।
स्ववासनारसाज्जन्तु-र्वस्तुभिः प्रीयते तथा ॥ ६८ ॥

विधाय कायसंस्कार-मुदारघुसृणादिभिः ।
आत्मानमात्मनैवाहो !, वञ्चयन्ते जडाशयाः ॥ ६९ ॥

स्वान्तं विजित्य दुर्दान्त-मिन्द्रियाणि सुखं जयेत् ।
तत्तु तत्त्वविचारेण, जेतव्यमिति मे मतिः ॥ ७० ॥

सञ्चरिष्णुरसौ स्वैरं, विषयग्रामसीमसु ।
स्वान्तदन्ती वशं याति, वीतकर्मानुशासनात् ॥ ७१ ॥

मनःपवनयोरैक्यं, मिथ्या योगविदो विदुः ।
बम्भ्रमीति यतः स्वैर-मतीत्य पवनं मनः ॥ ७२ ॥

चक्षुष्यद्वेष्यतां भावे-ष्विन्द्रियैः स्वार्थतः कृताम् ।
आत्मन् ! स्वस्याभिमन्वानः, कथं नु मतिमान् भवान् ? ॥ ७३ ॥

अवधत्से यथा मूढ !, ललनाललिते मनः ।
मैत्र्यादिषु तथा धेहि, विधेहि हितमात्मनः ॥ ७४ ॥

आत्मन्येव हि नेदिष्ठे, निरायासे सुखे सति ।
किं ताम्यसि बहिर्मूढ, सतृष्णायामिवैणकः ॥ ७५ ॥

प्रियाप्रियव्यवहृति-र्वस्तुनो वासनावशात् ।
अङ्गजत्वे सुतः प्रेयान्, यूकालिक्षमसम्मतम् ॥ ७६ ॥

इदं कृत्रिमकर्पूर-कल्पं सङ्कल्पजं सुखम् ।
रञ्जयत्यञ्जसा मुग्धा-नान्तरज्ञानदुःस्थितान् ॥ ७७ ॥

ममत्वं माम ! भावेषु, वासनातो न वस्तुतः ।
औरसादपरत्रापि, पुत्रवात्सल्यमीक्ष्यते ॥ ७८ ॥

वासनावेशवशतो, ममता न तु वास्तवी ।
गवाश्वादिनि विक्रीते, विलीनेयं कुतोऽन्यथा ॥ ७९ ॥

विश्वं विश्वमिदं यत्र, मायामयमुदाहृतम् ।
अवकाशोऽपि शोकस्य, कुतस्तत्र विवेकिनाम् ॥ ८० ॥

धिगविद्यामिमां मोह-मयीं विश्वविसृत्वरीम् ।
यस्याः सङ्कल्पितेऽप्यर्थे, तत्त्वबुद्धिर्विजृम्भते ॥ ८१ ॥

अनादिवासनाजाल-माशातन्तुभिरुम्भितम् ।
निशातसाम्यशस्त्रेण, निकृन्तति महामतिः ॥ ८२ ॥

अनादिमायारजनीं, जननीं तमसां बलात् ।
स्वज्ञानभास्वदालोका-दन्तं नयति योगवित् ॥ ८३ ॥

अध्यात्मोपनिषद्बीज-मौदासीन्यममन्दयन् ।
न किञ्चिदपि यः पश्येत्, स पश्येत्तत्वमात्मनः ॥ ८४ ॥

निःसङ्गतां पुरस्कृत्य, यः साम्यमवलम्बते ।
परमानन्दजीवातौ, योगेऽस्य क्रमते मतिः ॥ ८५ ॥

दम्भजादपि निःसङ्गा-द्भवेयुरिह सम्पदः ।
निश्छद्मनः पुनस्तस्मात्, किं दवीयः ? परं पदम् ॥ ८६ ॥

सङ्गावेशान्निवृत्तानां, माभून्मोक्षो वशंवदः ।
यत्किञ्चन पुनः सौख्यं, निर्वक्तुं तन्न शक्यते ॥ ८७ ॥

स्फुरत्तृष्णालताग्रन्थि-विषयावर्त्तदुस्तरः ।
क्लेशकल्लोलहेलाभि-र्भैरवो भवसागरः ॥ ८८ ॥

विदलद्बन्धकर्माण-मद्भुतां समतातरीम् ।
आरुह्य तरसा योगिन् !, तस्य पारीणतां श्रय ॥ ८९ ॥

शीर्णपर्णाशनप्रायै-र्यन्मुनिस्तप्यते तपः ।
औदासीन्यं विना विद्धि, तद् भस्मनि हुतोपमम् ॥ ९० ॥

येनैव तपसा प्राणी, मुच्यते भवसन्ततेः ।
तदेव कस्यचिन्मोहाद्, भवेद् भवनिबन्धनम् ॥ ९१ ॥

सन्तोषः सम्भवत्येष, विषयोपप्लवं विना ।
तेन निर्विषयं कश्चि-दानन्दं जनयत्ययम् ॥ ९२ ॥

वशीभवन्ति सुन्दर्यः, पुंसां व्यक्तमनीहया ।
यत्परब्रह्मसंवित्ति-निरीहं श्लिष्यति स्वयम् ॥ ९३ ॥

सूते सुमनसां कश्चिदा-मोदं समता लता ।
यद्वशादाप्नुयुः सख्य-सौरभं नित्यवैरिणः ॥ ९४ ॥

साम्यब्रह्मास्त्रमादाय, विजयन्तां मुमुक्षवः ।
मायाविनीमिमां मोह-रक्षोराजपताकिनीम् ॥ ९५ ॥

मा मुहः कविसङ्कल्प-कल्पितामृतलिप्सया ।
निरामयपदप्राप्त्यै, सेवस्व समतासुधाम् ॥ ९६ ॥

योगग्रन्थमहाम्भोधि-मवमथ्य मनोमथा ।
साम्यामृतं समासाद्य, सद्यः प्राप्नुहि निर्वृत्तिम् ॥ ९७ ॥

मैत्र्यादिवासनामोद-सुरभीकृतदिङ्मुखम् ।
पुमांसं ध्रुवमायान्ति, सिद्धिभृङ्गाङ्गनाः स्वयम् ॥ ९८ ॥

औदासीन्योल्लसन्मैत्री-पवित्रं वीतसम्भ्रमम् ।
कोपादिव विमुञ्चन्ति, स्वयं कर्माणि पुरुषम् ॥ ९९ ॥

योगश्रद्धालवो ये तु, नित्यकर्मण्युदासते ।
प्रथमे मुग्धबुद्धीना-मुभयभ्रंशिनो हि ते ॥ १०० ॥

प्रातिहार्यमियं धत्ते, निवृत्तिर्निर्वृतिश्रियः ।
य एव रोचतेऽमुष्यै, तां स एव हि पश्यति ॥ १०१ ॥

अहो ! वणिक्कला कापि, मनसोऽस्य महीयसी ।
निवृत्तितुलया येन, तुलितं दीयते सुखम् ॥ १०२ ॥

साम्यदिव्यौषधिस्थेम-महिम्ना निहतक्रियम् ।
कल्याणमयतां धत्ते, मनो हि बहु पारदम् ॥ १०३ ॥

भूयांसि यानि शास्त्राणि यानि सन्ति महात्मनाम् ।
इदं साम्यशतं किञ्चित्, तेषामञ्चलमञ्चतु ॥ १०४ ॥

क्लेशावेशमपास्य निर्भरतरं ध्यातोऽपि यश्चेतसा,
सत्कल्याणमयत्वमाशु तनुते योगीन्द्रमुद्राभृताम् ।
सोऽयं सिद्धरसः स्फुटं समरसो भावो मया व्याकृतः,
श्रीमानद्भुतवैभवः सुमनसामानन्दजीवातवे ॥ १०५ ॥

श्रीमच्चन्द्रकुलाम्बुजैकतरणेः सत्तर्कविद्याटवी,
सिंहस्याभयदेवसूरिसुगुरोरध्यात्मसंविज्जुषः ।
शिष्यांशेन किमंप्यकारि विजयप्राज्येन सिंहेन यद्-
नव्यं साम्यशतं तदस्तु सुहृदामुज्जागरुकं हृदि ॥ १०६ ॥

# ।। समाधिशतकम् ।।

येनात्माबुध्यतात्मैव, परत्वेनेव चापरम् ।
अक्षयानन्तबोधाय, तस्मै सिद्धात्मने नमः ॥ १ ॥

जयन्ति यस्यावदतोऽपि भारतीविभूतयस्तीर्थकृतोऽप्यनीहितुः ।
शिवाय धात्रे सुगताय विष्णवे, जिनाय तस्मै सकलात्मने नमः॥ २ ॥

श्रुतेन लिङ्गेन यथात्मशक्ति, समाहितान्तःकरणेन सम्यक् ।
समीक्ष्य कैवल्यसुखस्पृहाणां, विविक्तमात्मानमथाभिधास्ये ॥ ३ ॥

बहिरन्तःपरश्चेति, त्रिधात्मा सर्वदेहिषु ।
उपेयात्तत्र परमं, मध्योपायाद् बहिस्त्यजेत् ॥ ४ ॥

बहिरात्मा शरीरादौ, जातात्मभ्रान्तिरान्तरः ।
चित्तदोषात्मविभ्रान्तिः परमात्मातिनिर्मलः ॥ ५ ॥

निर्म्मलः केवलः शुद्धो, विविक्तः प्रभुरव्यः ।
परमेष्ठी परात्मेति, परमात्मेश्वरो जिनः ॥ ६ ॥

बहिरात्मेन्द्रियद्वारै-रात्मज्ञानपराङ्मुखः ।
स्फुरितस्वात्मनो देहमात्मत्वेनाध्यवस्यति ॥ ७ ॥

नरदेहस्थमात्मानमविद्वान्मन्यते नरम् ।
तिर्यञ्चं तिर्यगङ्गस्थं, सुराङ्गस्थं सुरं तथा ॥ ८ ॥

नारकं नारकाङ्गस्थं, न स्वयं तत्वतस्तथा ।
अनन्तानन्तधीशक्तिः, स्वसंवेद्योऽचलस्थितिः ॥ ९ ॥

स्वदेहसदृशं दृष्ट्वा, परदेहमचेतनम् ।
परमात्माधिष्टितं मूढः, परत्वेनाध्यवस्यति ॥ १० ॥

स्वपराध्यवसायेन, देहेष्वविदितात्मनाम् ।
वर्त्तते विभ्रमः पुसां, पुत्रभार्यादिगोचरः ॥ ११ ॥

अविद्यासंज्ञितस्तस्मात्संस्कारो जायते दृढः ।
येन लोकोऽङ्गमेव स्वं, पुनरप्यभिमन्यते ॥ १२ ॥

देहेस्वबुद्धिरात्मानं, युनक्त्येतेन निश्चयात् ।
स्वात्मन्येवात्मधीस्तस्माद्वियोजयति देहिनम् ॥ १३ ॥

देहेष्वात्मधिया जाताः, पुत्रभार्यादिकल्पनाः ।
संपत्तिमात्मनस्ताभिर्मन्यते हा हतं जगत् ॥ १४ ॥

मूलं संसारदुःखस्य; देह एवात्मधीस्ततः ।
त्यक्त्वैनां प्रविशेदन्तर्बहिरव्यावृतेन्द्रियः ॥ १५ ॥

मत्तश्च्युत्वेन्द्रियद्वारैः पतितो विषयेष्वहम् ।
तान्प्रपद्याहमिति मां, पुरा वेद न तत्त्वतः ॥ १६ ॥

एवं त्यक्त्वा बहिर्वाचं, त्यजेदन्तरशेषतः ।
एष योगः समासेन, प्रदीपः परमात्मनः ॥ १७ ॥

यन्मया दृश्यते रूपं, तन्न जानाति सर्वथा ।
जानन्न दृश्यते रूपं, ततः केन ब्रवीम्यहम् ॥ १८ ॥

यत्परैः प्रतिपाद्योऽहं, यत्परान् प्रतिपादये ।
उन्मत्तचेष्टितं तन्मे, यदहं निर्विकल्पकः ॥ १९ ॥

यदग्राह्यं न गृह्णाति, गृहीतं नापि मुञ्चति ।
जानाति सर्वथा सर्वं, तत्स्वसंवेद्यमस्म्यहम् ॥ २० ॥

उत्पन्नपुरुषभ्रान्तेः, स्थाणौ यद्वद्विचेष्टितम् ।
तद्वन्मे चेष्टितं पूर्वं देहादिष्वात्मविभ्रमात् ॥ २१ ॥

यथासौ चेष्टते स्थाणौ, निवृत्ते पुरुषग्रहे ।
तथा चेष्टोऽस्मि देहादौ, विनिवृत्तात्मविभ्रमः ॥ २२ ॥

येनात्मनानुभूयेऽहमात्मनैवात्मनाऽत्मनि ।
सोऽहं न तन्न सा नासौ, नैको न द्वौ न वा बहुः ॥ २३ ॥

यदभावे सुषुप्तोऽहं, यद्भावे व्युत्थितः पुनः ।
अतीन्द्रियमनिर्देश्यं, तत्स्वसंवेद्यमस्म्यहम् ॥ २४ ॥

क्षीयन्तेऽत्रैव रागाद्यास्तत्त्वतो मां प्रपश्यतः ।
बोधात्मानं ततःकश्चिन्न मे शत्रुर्न च प्रियः ॥ २५ ॥

मामपश्यन्नयं लोको, न मे शत्रुर्न च प्रियः ।
मां प्रपश्यन्नयं लोको, न मे शत्रुर्न च प्रियः ॥ २६ ॥

त्यक्त्वैवं बहिरात्मानमन्तरात्मव्यवस्थितः ।
भावयेत्परमात्मानं, सर्वसंकल्पवर्जितः ॥ २७ ॥

सोऽहमित्यात्तसंस्कारस्तस्मिन्भावनया पुनः ।
तत्रैव दृढसंस्काराल्लभते ह्यात्मनःस्थितिम् ॥ २८ ॥

मूढात्मा यत्र विश्वस्तस्ततो नान्यद्भयास्पदम् ।
यतो भीतस्ततो नान्यदभयस्थानमात्मनः ॥ २९ ॥

सर्वेन्द्रियाणि संयम्य, स्तिमितेनान्तरात्मना ।
यत्क्षणं पश्यतो भाति, तत्तत्त्वं परमात्मनः ॥ ३० ॥

यः परात्मा स एवाहं, योऽहं स परमस्ततः ।
अहमेव मयोपास्यो, नान्यः कश्चिदिति स्थितिः ॥ ३१ ॥

प्राच्याव्य विषयेभ्योऽहं, मा मयैव मयि स्थितम् ।
बोधात्मानं प्रपन्नोऽस्मि, परमानन्दनिर्वृत्तम् ॥ ३२ ॥

यो न वेत्ति परं देहादेवमात्मानमव्ययम् ।
लभते न स निर्वाणं, तप्त्वापि परमं तपः ॥ ३३ ॥

आत्मदेहान्तरज्ञानजनिताह्लादनिर्वृतः ।
तपसा दुष्कृतं घोरं, भुञ्जानोऽपि न खिद्यते ॥ ३४ ॥

रागद्वेषादिकल्लोलैरलोलं, यन्मनोजलम् ।
स पश्यात्यात्मनस्तत्त्वं, स तत्त्वं नेतरो जनः ॥ ३५ ॥

अविक्षिप्तं मनस्तत्त्वं विक्षिप्तं भ्रान्तिरात्मनः ।
धारयेतदविक्षिप्तं, विक्षिप्तं नाश्रयेत्ततः ॥ ३६ ॥

अविद्याभ्याससंस्कारैरवशं, क्षिप्यते मनः ।
तदेव ज्ञानसंस्कारैः, स्वतस्तत्त्वेऽवतिष्ठते ॥ ३७ ॥

अपमानादयस्तस्य, विक्षेपो यस्य चेतसः ।
नापमानादयस्तस्य, न क्षेपो यस्य चेतसः ॥ ३८ ॥

यदा मोहात्प्रजायेते, रागद्वेषौ तपस्विनः ।
तदैव भावयेत् स्वस्थमात्मानं शाम्यतः क्षणात् ॥ ३९ ॥

यत्र काये मुनेः प्रेम, ततः प्राच्यव्य देहिनम् ।
बुद्धया तदुत्तमे काये, योजयेत्प्रेम नश्यति ॥ ४० ॥

आत्मविभ्रमजं दुःखमात्मज्ञानात्प्रशाम्यति ।
नायतास्तत्र निर्वान्ति, कृत्वापि परमं तपः ॥ ४१ ॥

शुभं शरीरं दिव्यांश्च, विषयानभिवाञ्छति ।
उत्पन्नात्ममतिर्देहे, तत्त्वज्ञानी ततश्च्युतिम् ॥ ४२ ॥

परत्राहंमतिः स्वास्माच्च्युतो, बध्नात्यसंशयम् ।
स्वस्मिन्नहंमतिच्च्युत्वा, परस्मान्मुच्यते बुधः ॥ ४३ ॥

दृश्यमानमिदं मूढस्त्रिलिङ्गमवबुध्यते ।
इदमित्यवबुद्धस्तु, निष्पन्नं शब्दवर्जितम् ॥ ४४ ॥

जानन्नप्यात्मनस्तत्त्वं, विविक्तं भावयन्नपि ।
पूर्वविभ्रमसंस्काराद्भ्रान्तिं भूयोऽपि गच्छति ॥ ४५ ॥

अचेतनमिदं दृश्य-मदृश्यं चेतनं ततः ।
क्व रुष्यामि क्व तुष्यामि, मध्यस्थोऽहं भवाम्यतः ॥ ४६ ॥

त्यागादाने बहिर्मूढः, करोत्यध्यात्ममात्मवित् ।
नान्तर्बहिरुपादानं, न त्यागो निष्ठितात्मनः ॥ ४७ ॥

युञ्जीत मनसात्मानं, वाक्कायाभ्यां वियोजयेत् ।
मनसा व्यवहारं तु, त्यजेद्वाक्काययोजितम् ॥ ४८ ॥

जगद्देहात्मदृष्टीनां, विश्वास्यं रम्यमेव च ।
स्वात्मन्येवात्मदृष्टीनां क्व विश्वासः क्व वा रतिः ॥ ४९ ॥

आत्मज्ञानात्परं कार्यं, न बुद्धौ धारयेच्चिरम् ।
कुर्यादर्थवशात्किंचिद्वाक्कायाभ्यामतत्परः ॥ ५० ॥

यत्पश्यामीन्द्रियैस्तन्मे, नास्ति यन्नियतेन्द्रियः ।
अन्तः पश्यामि सानन्दं, तदस्य जयोतिरुत्तमम् ॥ ५१ ॥

सुखमारब्धयोगस्य, बहिर्दुःखमथात्मनि ।
बहिरेवासुखं सौख्य–मध्यात्मं भावितात्मनः ॥ ५२ ॥

तद्ब्रूयात्तत्परान्पृच्छे–तदिच्छेत्तत्परो भवेत् ।
येनाविद्यामयं रूपं, त्यक्त्वा विद्याभयं व्रजेत् ॥ ५३ ॥

शरीरे वाचि चात्मानं, संधत्ते वाक्शरीरयोः ।
भ्रान्तोऽभ्रान्तः पुनस्तत्त्वं, पृथगेषां निबुध्यते ॥ ५४ ॥

न तदस्तीन्द्रियार्थेषु, यत्क्षेमङ्करमात्मनः ।
तथापि रमते बाल–स्तत्रैवाज्ञानभावनात् ॥ ५५ ॥

चिरं प्रसुप्तास्तमसि, मूढात्मानः कुयोनिषु ।
अनात्मीयात्मभूतेषु, ममाहमिति जाग्रति ॥ ५६ ॥

पश्येन्निरन्तरं देहमात्मनोऽनात्मचेतसा ।
अपरात्मधियाऽन्येषामात्मतत्वे व्यवस्थितः ॥ ५७ ॥

अज्ञापितं न जानन्ति, यथा मां ज्ञापितं तथा ।
मूढात्मानस्ततस्तेषां, वृथा मे ज्ञापनाश्रमः ॥ ५८ ॥

यद्बोधयितुमिच्छामि तन्नाहं यदहं पुनः ।
ग्राह्यं तदपि नान्यस्य, तत्किमन्यस्य बोधये ॥ ५९ ॥

बहिस्तुष्यति मूढात्मा, पिहितज्योतिरन्तरे ।
तुष्यत्यन्तः प्रबुद्धात्मा, बहिर्व्यावृत्तकौतुकः ॥ ६० ॥

न जानन्ति शरीराणि, सुखदुःखान्यबुद्धयः ।
निग्रहानुग्रहधियं, तथाप्यत्रैव कुर्वते ॥ ६१ ॥

स्वबुद्धया यावद् गृह्णीयात्, कायवाक्चेतसां त्रयम् ।
संसारस्तावदेतेषां, भेदाभ्यासे तु निर्वृत्तिः ॥ ६२ ॥

घने वस्त्रे यथात्मानं, न घनं मन्यते तथा ।
घने स्वदेहेप्यात्मानं न घनं मन्यते बुधः ॥ ६३ ॥

जीर्णे वस्त्रे यथात्मानं, न जीर्णं मन्यते तथा ।
जीर्णे स्वदेहेप्यात्मानं, न जीर्णं मन्यते बुधः ॥ ६४ ॥

नष्टे वस्त्रे यथात्मानं, न नष्टं मन्यते तथा ।
नष्टे स्वदेहेऽप्यात्मानं, न नष्टं मन्यते बुधः ॥ ६५ ॥

रक्ते वस्त्रे यथात्मानं, न रक्तं मन्यते तथा ।
रक्ते स्वदेहेऽप्यात्मानं, न रक्तं मन्यते बुधः ॥ ६६ ॥

यस्य सस्पन्दमाभाति, निस्पन्देन समं जगत् ।
अप्रज्ञमक्रियाभोगं, स कामं याति नेतरः ॥ ६७ ॥

शरीरकञ्चुकेनात्मा, संवृतज्ञानविग्रहः ।
नात्मानं बुध्यते, तस्माद् भ्रमत्यतिचिरं भवे ॥ ६८ ॥

प्रविशद् गलतां व्यूहे, देहेऽणूनां समाकृतौ ।
स्थितिभ्रान्त्या प्रपद्यते, तमात्मानमबुद्धयः ॥ ६९ ॥

गौरः स्थूलः कृशा वाहमित्यङ्गेनाविशेषयन् ।
आत्मानं धारयेन्नित्यं, केवलज्ञप्तिविग्रहम् ॥ ७० ॥

मुक्तिरेकान्तिकी तस्य, चित्ते यस्याचला धृतिः ।
तस्य नैकान्तिकी मुक्तिर्यस्य नास्त्यचला धृतिः ॥ ७१ ॥

जनेभ्यो वाक्कृतः स्पन्दो, मनसश्चित्रविभ्रमाः ।
भवन्ति तस्मात्संसर्गं, जनैर्योगी ततस्त्यजेत् ॥ ७२ ॥

ग्रामोऽरण्यमिति द्वेधा, निवासोऽनात्मदर्शिनाम् ।
दृष्टात्मनां निवासस्तु, विविक्तात्मैव निश्चलः ॥ ७३ ॥

देहान्तरगतेर्बीजं, देहेऽस्मिन्नात्मभावना ।
बीजं विदेहनिष्पतेरात्मन्येवात्मभावना ॥ ७४ ॥

नयत्यात्मानमात्मैव, जन्मनिर्वाणमेव वा ।
गुरुरात्मात्मनस्तस्मान्नान्योऽस्ति परमार्थतः ॥ ७५ ॥

दृढात्मबुद्धिर्देहादावुत्पश्यन्नाशमात्मनः ।
मित्रादिभिर्वियोगं च, बिभेति मरणाद् भृशम् ॥ ७६ ॥

आत्मन्येवात्मधीरन्यां, शरीरगतिमात्मनः ।
मन्यते निर्भयं त्यक्त्वा, वस्त्रं वस्त्रान्तरग्रहम् ॥ ७७ ॥

व्यवहारे सुषुप्तो यः स जागर्त्यात्मगोचरे ।
जागर्ति व्यवहारेऽस्मिन्सुषुप्तश्चात्मगोचरे ॥ ७८ ॥

आत्मानमन्तरे दृष्ट्वा, दृष्ट्वा देहादिकं बहिः ।
तयोरन्तरविज्ञानादभ्यासादच्युतो भवेत् ॥ ७९ ॥

पूर्वं दृष्टात्मतत्त्वस्य, विभात्युन्मत्तवज्जगत् ।
स्वभ्यस्तात्मधियः पश्चात्काष्ठपाषाणरूपवत् ॥ ८० ॥

शृण्वन्नप्यन्यतः कामं, वदन्नपि कलेवरात् ।
नात्मानं भावयेद्भिन्नं, यावत्तावन्न मोक्षभाक् ॥ ८१ ॥

तथैव भावयेद्देहाद्, व्यावृत्त्यात्मानमात्मनि ।
यथा न पुनरात्मानं, देहे स्वप्नेऽपि योजयेत् ॥ ८२ ॥

अपुण्यमव्रतैः पुण्यं, व्रतैर्मोक्षस्तयोर्व्ययः ।
अव्रतानीव मोक्षार्थी, व्रतान्यपि ततस्त्यजेत् ॥ ८३ ॥

अव्रतानि परित्यज्य, व्रतेषु परिनिष्ठितः ।
त्यजेत्तान्यपि संप्राप्य, परमं पदमात्मनः ॥ ८४ ॥

यदन्तरर्जल्पसंपृक्तमुत्प्रेक्षाजालमात्मनः ।
मूलं दुःखस्य तन्नाशे, शिष्टमिष्टं परं पदम् ॥ ८५ ॥

अव्रती व्रतमादाय, व्रती ज्ञानपरायणः ।
परात्मज्ञानसंपन्नः, स्वयमेव परो भवेत् ॥ ८६ ॥

लिङ्गं देहाश्रितं दृष्टं, देह एवात्मनो भवः ।
न मुच्यन्ते भवात्तस्मात्ते ये लिङ्गकृताग्रहाः ॥ ८७ ॥

जातिर्देहाश्रिता दृष्टा, देह एवात्मनो भवः ।
न मुच्यन्ते भवात्तस्मात्ते, ते जातिकृताग्रहाः ॥ ८८ ॥

जातिलिङ्गविकल्पेन, येषां च समयाग्रहः ।
तेऽपि न प्राप्नुवन्त्येव, परमं पदमात्मनः ॥ ८९ ॥

यत्त्यागाय निवर्तन्ते, भोगेभ्यो यदवाप्तये ।
प्रीतिं तत्रैव कुर्वन्ति, द्वेषमन्यत्र मोहिनः ॥ ९० ॥

अनन्तरज्ञः संधत्ते, दृष्टिं पङ्गोर्यथान्धके ।
संयोगाद्दृष्टिभङ्गेऽपि, संधत्ते तद्वदात्मनः ॥ ९१ ॥

दृष्टभेदो यथा दृष्टिं, पङ्गोरन्धे न योजयेत् ।
तथा न योजयेद्देहे, दृष्टात्मा दृष्टिमात्मनः ॥ ९२ ॥

सुप्तोन्मत्ताद्यवस्थैव, विभ्रमोऽनात्मदर्शिनाम् ।
विभ्रमाऽक्षीणदोषस्य, सर्वावस्थात्मदर्शिनः ॥ ९३ ॥

विदिताशेषशास्त्रोऽपि, न जाग्रदपि मुच्यते ।
देहात्मदृष्टिर्ज्ञातात्मा, सुप्तोन्मत्तोऽपि मुच्यते ॥ ९४ ॥

यत्रैवाहितधीः पुंसः, श्रद्धा तत्रैव जायते ।
यत्रैव जायते श्रद्धा, चित्तं तत्रैव लीयते ॥ ९५ ॥

यत्रैवाहितधीः पुंसः, श्रद्धा तस्मान्निवर्त्तते ।
यस्मान्निवर्तते श्रद्धा, कुतश्चित्तस्य तल्लयः ॥ ९६ ॥

भिन्नात्मानमुपास्यात्मा, परो भवति तादृशः ।
वर्तिर्दीपं यथोपास्य, भिन्ना भवति तादृशी ॥ ९७ ॥

उपास्यात्मानमेवात्मा, जायते परमोऽथवा ।
मथित्वात्मानमात्मैव, जायतेऽग्निर्यथा तरुः ॥ ९८ ॥

इतीदं भावयेन्नित्य–मवाचागोचरं पदम् ।
स्वत एव तदाप्नोति यतो नावर्तते पुनः ॥ ९९ ॥

अयत्नसाध्यं निवार्णं चित्तत्वं भूतजं यदि ।
अन्यथा योगतस्तस्मान्नदुःखं योगिनां क्वचित् ॥ १०० ॥

स्वप्ने दृष्टे विनष्टेऽपि, न नाशोऽस्ति यथात्मनः ।
तथा जागरदृष्टेऽपि, विपर्यासो विशेषतः ॥ १०१ ॥

अदुःखभावितज्ञानं, क्षीयते दुःखसंनिधौ ।
तस्माद्यथाबलं दुःखै–रात्मानं भावयेन्मुनिः ॥ १०२ ॥

प्रयत्नादात्मनो वायुरिच्छाद्द्वेषप्रवर्तितात् ।
वायोः शरीरयन्त्राणि, वर्तन्ते स्वेषु कर्मसु ॥ १०३ ॥

तान्यात्मनि समारोप्य साक्षाण्यास्ते सुखं जडः ।
त्यक्त्वारोपं पुनर्विद्वान्, प्राप्नोति परमं पदम् ॥ १०४ ॥

मुक्त्वा परत्र परबुद्धिमहंधियं च, संसारदुःखजननीं जननाद्विमुक्तः ।
ज्योतिर्मयं सुखमुपैति परात्मनिष्टस्तन्मार्गमेतदधिगम्य समाधितन्त्रम् ॥१०५॥

महोपाध्यायश्रीयशोविजयजीविरचितम्

# ।। समताशतक ।।

समता गंगा मगनता, उदासीनता जात।
चिदानंद जयवंत हो, केवलभानु प्रभात ॥ १ ॥

सकल कलामें सार लय, रहो दूर थिति अेह।
अकल योगमें सकल, लय देर ब्रह्म विदेह ॥ २ ॥

चिदानंद विधुकी कला, अमृतबीज अनपाय।
जाने केवल अनुभवी, किनही कही न जाय ॥ ३ ॥

तो भी आश्रव तापके, उपशम करन निदान।
बरषतहुं ताके वचन, अमृतबिंदु अनुमान ॥ ४ ॥

उदासीनता परिनयन, ग्यां(ग्या)न ध्यां(ध्या)न रंगरोल।
अष्ट अंग मुनि ! योगको, अेही अमृत निचोल ॥ ५ ॥

अनासंगमति विषयमें, रागद्वेषको छेद।
सहजभावमें लीनता, उदासीनता भेद ॥ ६ ॥

ताको कारन अममता, तामे मन विसराम।
करे साधु आनंदघन, होवत आतमराम ॥ ७ ॥

ममता थिर सुख शाकिनी, निरममता सुख मूल।
ममता शिव प्रतिकूल है, निरममता अनुकूल ॥ ८ ॥

ममता विष मूर्छित भये, अंतरंग गुन वृंद।
जागे भावि विरागता, लगन अमृतके बुंद ॥ ९ ॥

पर (रि)नति विषय विरागता, भवतरु मूलकुठार।
ता आगे कयुं करि रहे, ममता वेलि प्रचार ॥ १० ॥

हहा ! मोहकी वासना, बुधकु भी प्रतिकूल।
या केवल श्रुतअंधता, अहंकारको मूल ॥ ११ ॥

मोह तिमिर मनमें जगिं (गे), याके उदय अछेह।
अंधकार परिनाम है, श्रुतके नामे तेह ॥ १२ ॥

करे मूढमति पुरुषकुं, श्रुत भी मद भय रोष।
ज्युं रोगीकुं खीर घृत, संनिपातको पोष ॥ १३ ॥

टले दाह तृषा हरे, गाले ममता पंक।
लहरी भाव विरागकी, ताको भजो निसंक ॥ १४ ॥

कागभुजंगम विष हरन, धारो मंत्र विवेक।
भववन मूल उछेदकुं, विलसे याकी टेक ॥ १५ ॥

रवि दूजो तीजो नयन, अंतर भाव प्रकास।
करो धंध सवि परिहरी, एक विवेक अभ्यास ॥ १६ ॥

प्रशम पुष्करावर्तके, वरसत हरष विशाल।
द्वेष हुताश बुझाइ, चिंता जाल जटाल ॥ १७ ॥

किनके वश भववासना, होवै वेशा धूत।
मुनि भी जिनके बश भये, हावि भावि अवधूत ॥ १८ ॥

जबलुं भवकी वासना, जागे मोह निदान।
तबलुं रुचे न लोककुं, निरमम भाव प्रधान ॥ १९ ॥

विषम ताप भववासना, त्रिविध दोषको जोर।
प्रगटे याकी प्रबलता, क्वाथ कषाए घोर ॥ २० ॥

तातें दुष्ट कषाय के, छेद हेत निज चित्त।
धरो अेह शुभवासना, सहज भावमें मित्त ॥ २१ ॥

सिद्ध औषधि इक खिमा, ताको करो प्रयोग।
ज्युं मिटि जाये मोह घर, विषम क्रोध ज्वर रोग ॥ २२ ॥

चेतन को कोमल ललित, चिदानंदमय देह।
सूक भूक जुर जात है, क्रोध लूकतिं तेह ॥ २३ ॥

क्षमासार चंदन रसे सींचो चित्त पवित्त ।
दयावेल मंडप तले, रहो लहो सुख मित्त ॥ २४ ॥

याको भाजे शम वधू, खिमा सहजमें जोर ।
क्रोध जोध किउं करि करि, सो अपनो बल सोर ॥ २५ ॥

देत खेद वरजित खिमा, खेद रहित सुखराज ।
इनमें नहि संदेह कछु, कारन सरिखो काज ॥ २६ ॥

परबत गरव शिकर चड्यो, गुरुकुं भी लघु रूप ।
कहि तिहां अचरज किश्यो ? कथन ग्यांन अनुरूप ॥ २७ ॥

आठ शिखर गिरिराज के, ठामे विमलालोक ।
तो प्रकाश सुख क्युं लहे ? विषम मानवश लोक ॥ २८ ॥

मान महीधर छेद तुं, कर(रि) मृदुता पविघात ।
ज्युं सुख मारग सरलता, होवि चित्त विख्यात ॥ २९ ॥

मृदुता कोमल कमलथे, वज्रसार अहंकार ।
छेदत हे इक पलकमें, अचरज एह अपार ॥ ३० ॥

विकसित माया बेलि घर, भव अटवी के बीच ।
सोवत हे नित मूढ नर, नयन ग्यान के मीच ॥ ३१ ॥

कोमलता बाहिर धरत, करत वक्रगति चार ।
माया सापिणि जग डसे, ग्रसे सकल गुनसार ॥ ३२ ॥

ताके निग्रह करनकुं, करो जु चित्त विचार ।
समरो ऋजुता जंगुली, पाठसिद्ध निरधार ॥ ३३ ॥

लोभ महातरु सिर चढी, बढी जु तिसना वेलि ।
खेद कुसुम विकसित भई, फले दुःख रिउ मेलि ॥ ३४ ॥

लोभ मेघ उन्नत भये, पाप पंक बहु होत ।
धरम हंस रति नहु लहै, रहे न ग्यांन उद्योत ॥ ३५ ॥

आगर सबही दोषको, गुन धनको बडचोर।
व्यसन बेलिको कंद है, लोभ पास चिहुं ओर ॥ ३६ ॥

कोउ सयंभूरमनको, जे नर पावइ पार।
सो भी लोभसमुद्दको, लहे न मध्यप्रचार ॥ ३७ ॥

मनसंतोष अगस्तिकुं, ताके शोष निमित्त।
नितु सेवो जिनि सो कियो, निज जल अंजलि मित्त ॥ ३८ ॥

याकी लालचि तुं फिरे, चित ! इत उत डमडोल।
ता लालचि मिटि जात घट, प्रकटि सुख रंगरोल ॥ ३९ ॥

धन मानत गिरिमृत्तिका, फिरत मूढ दूरध्यान।
अखय खजानो ग्यांनको, लख न सुख निदान ॥ ४० ॥

होत न विजय कषायको, बिनु इन्द्रिय वशि कीन।
तातै इन्द्री वश करै, साधु सहज गुणलीन ॥ ४१ ॥

आपि काजि परसुख हरे, धरे न कोस्युं प्रीति।
इन्द्रिय दुरजन परि दहै, वहै न धर्म न नीति ॥ ४२ ॥

अथवा दुरजन थैं बुरे, इह परभव दुःखकार।
इन्द्रिय दुरजन देतु है, इह भवि दुःख इकवार ॥ ४३ ॥

नयन फरज जनु तनु लगें, दहि द्रष्टिविष साप।
तिनसुं भी पापी विषे, सुमरे करि, संताप ॥ ४४ ॥

इच्छाचारी विषयमें, फिरतें इन्द्रिय ग्राम।
बश कीजै पगमें धरी, यंत्र ग्यान परिणाम ॥ ४५ ॥

उनमारगगामी असब, इन्द्रिय चपल तुरंग।
खेंची नरग अरण्यमें, लिइ जाइ निज संग ॥ ४६ ॥

जे नजीक है श्रमरहित, आपही (हि) में सुख राज।
बाधत है ताकुं करन, आप अरथ के काज ॥ ४७ ॥

अंतरंग रिपु कटक भट, सेनानी बलवंत।
इन्द्रिय खिनुमै हरत है, श्रुतबल अतुल अनंत ॥ ४८ ॥

अनियत चंचल करण हय, पदप्रवाहरजपूर।
आशाछादक करतु हे, तत्त्वदृष्टि बल दूर ॥ ४९ ॥

पंच बाण इन्द्रिय करी, काम सुभट जग जीति।
सबके सिरि पग देतु हे, गणे न कोसुं भीति ॥ ५० ॥

वीर पंच इन्द्रिय लही; काम नृपति बलवंत।
करे न संख्या पूरणी, सुभट श्रेणिकी तंत ॥ ५१ ॥

दुःख सबहि सुख विषयको, करम व्याधि प्रतिकार।
ताकुं मनमथ सुख कहे, धूरत जग दुःखकार ॥ ५२ ॥

ठगे कामके सुख गिर्ने, पाइ विषयके भीख।
सहज राज पावन नहीं, लगी न सद्गुरु सीख ॥ ५३ ॥

अप्रमाद पवि दंडथिं, करी मोह चकचूर।
ज्ञानी आतमपद लहै, चिदानंद भरपूर ॥ ५४ ॥

याके राज विचारमैं, अबला एक प्रधान।
सो चाहत है ज्ञानजय, कैसे काम अयान ॥ ५५ ॥

उरभ्रान्ति मिटि जात है, प्रगटत (ग्यां)न उद्योत।
ग्यानीकुंभि विषयभ्रम, दिसा मोह सम होत ॥ ५६ ॥

दाखे आप विलास करि, जूठेकुं भी साच।
इन्द्रजाल परि कामिनी, तासु तू मत राच ॥ ५७ ॥

हसित फूल पल्लव अधर, कुच फल कठिन विशाल।
प्रिया देखी मति राचि तूं, या विषवेलि रसाल ॥ ५८ ॥

चरम मढित है कामिनी, भाजन मूत्र पुरीष।
काम कीट आकुल सदा, परिहर सुनि गुरु सीख ॥ ५९ ॥

विषै त्यजि सौ सब त्यजि, पातक दोष वितान ।
जलधि तरत नवि क्युं तरेइ, तटिनी गंग समान ॥ ६० ॥

चाटे निज लालामिलित, शुष्क अस्थि ज्युं श्वान ।
तेसें राचे विषयमें, जड निज रुचि अनुमान ॥ ६१ ॥

भूषन बहुत बनावतै, चंदन चरचत देह ।
वंचत आप ही आपकुं, जड धरि पुद्गल नेह ॥ ६२ ॥

दुरदम मनके जय किये, इन्द्रिय जय सुख होत ।
तातें मनजय करणकुं, करो विचार उद्योत ॥ ६३ ॥

विषयग्रामकी सीममें, इच्छाचारि चरंत ।
जिनआना अंकुश करी, मन गज बस करु संत ॥ ६४ ॥

एक भाव मन पौनको, जुठ कहे ग्रंथकार ।
यातें पवनहितें अधिक, होत चित्तको चार ॥ ६५ ॥

जामें राचे ताहिमें, बिरचै (ते) करि चित चार ।
इष्ट अनिष्ट न विषयको, युं निहयें निरधार ॥ ६६ ॥

केवल तामें करमको, राग द्वेष ते बंध ।
परमें निज अभिमान धरि, काहि फिरतु है अंध ॥ ६७ ॥

जईसै ललना ललितमें भाव धरतु (त) है सार ।
तइसै मैत्री प्रमुखमें, चित धरि करि सुविचार ॥ ६८ ॥

बाहिर बहुरि कहा फिरै, आपहिमें हित देखि ।
मृगतृष्णासम विषयको, सुख सब जानि उवेखि ॥ ६९ ॥

प्रिय अप्रिय व्यवहार निज, रुचि रस साचो नाहि ।
अंगज वल्लभ सुत भयो, यूकादिक नहि कांहि ॥ ७० ॥

होवत सुख नृप रंककुं, नोबत सुनत समान ।
इक भोगे इक नाहि सो, बढ्यो चित अभिमान ॥ ७१ ॥

भवको सुख संकल्पभव, कृत्रिम जिस्यो (जिसो) कपूर।
रंजत है जन मुगधकुं, वरजित ग्यांन अंकुर ॥ ७२ ॥

गुन ममकारन बस्तुको, सो वासना निमित्त।
मांने सुतमें सुत अधिक, दोरत हैं हित चित्त ॥ ७३ ॥

मन कृत ममता जूठ हे, नहीं वस्तु परजाय।
नहि तो बस्तु बिकाईथै, क्युं ममता मिटि जाय ? ॥ ७४ ॥

जन जनकी रुचि भिन्न है, भोजन कूर कपूर।
भागवंतकुं जो रुचइ, करभ करे सो दूर ॥ ७५ ॥

करभ हसे नृप भोगकुं, हसै करभकुं भूप।
उदासीनता बिनु नहीं, दोउकुं रति रूप ॥ ७६ ॥

परमे राचे पररुचि, निजरुचि निजगुनमांहि।
खेले प्रभु आनंदघन, धरि (री) समता गल बांहि ॥ ७७ ॥

मायामय जगको कह्यो, जिहां सबकी विस्तार।
ग्यानीकुं होबत कहां, तहां शोक को चार ॥ ७८ ॥

सोचत नांहि अनित्यमति, होवत माल मलान।
भांडे भी सोचत भगै, धरत नित्य अभिमांन ॥ ७९ ॥

कूट वासना गठित है, आसा (शा) तंतु वितान।
छेदे ताकुं शुभमती, कर धरि बोध कृपांन ॥ ८० ॥

जननी मोह अंधारकि, माया रजनी कूर।
ग्यांन भांन आलोकर्ति, ताकुं कीजे दूर ॥ ८१ ॥

उदासीनता मगन हुई, अध्यातम रस कूप।
देखे नहि कबु और जब, तब देखे निज स्वरूप ॥ ८२ ॥

आगे करी निस्संगता, समता सेवत जेहु।
रमै परम आनंदरस, सत्ययोगमै तेहु ॥ ८३ ॥

दंभही जनित असंगता, इहभवके सुख दे।
दंभरहित निस्संगता, कौन दूर सुख दे ॥ ८४ ॥

मत हो संगनिवृत्तकुं, प्रेम परमगति पाई।
ताको समता रंग पुनि, किनही कह्यौ न जाई ॥ ८५ ॥

तिसना विद्रुम वल्लिघन, विषय घुमर बहु जोर।
भीम भयंकर खेद जल, भवसायर चिहु ओर ॥ ८६ ॥

चाहे ताको पार तो, सज करि समता नाउ।
शील अंग दृढ पाटिए सहस अढार बनाउ ॥ ८७ ॥

कूआथंभ शुभ योग परि, बइठि मालिम ग्यान।
अध्यातम सढ़ि बलि चलै, संयम पवन प्रमान ॥ ८८ ॥

योगी जे बहु तप करे, खाइ झुरे तरुपात।
उदासीनता विनु भसम, हुतिमै सो भी जात ॥ ८९ ॥

छूटि भवके जालथै, जिम नहि तप करे लोक।
सो भी मोहे काहुकुं, देत जनमको शोक ॥ ९० ॥

विषय उपद्रव सब मिटे, होवत सुख संतोष।
ताते विषयातीत है, देत शान्तरस पोष ॥ ९१ ॥

बिनु लालचि बश होत है, वशा बात एह साच।
याते करइ निरीह कें, आगै सम रती नाच ॥ ९२ ॥

दिई परिमल समता लता, वचन अगोचर सार।
नित्त बिइर भी जिहां वसे, लहि प्रेम म(स)हकार ॥ ९३ ॥

सेना राखस मोहकी, जीर्पि सुखि प्रबुद्ध।
ब्रह्मबानीक (ब्रह्मबान इक) लेइकिं, समता अंतर शुद्ध ॥ ९४ ॥

कवि मुख कलपित अमृतके, रसमें मूझत काहि।
भजो एक समतासुधा, रति धरि शिवपद माहि ॥ ९५ ॥

योगग्रंथ जलनिधि मथो, मन करी मेरु मथान ।
समता अमरत पाइके, हो अनुभौ रसु जान ॥ ९६ ॥

उदासीन मति पुरुष जो, समतानिधि शुभ वेष ।
छोरत ताकुं क्रोध किधु, आपही कर्म अशेष ॥ ९७ ॥

शुद्ध योग श्रद्धान धरी, नित्य करमको त्याग ।
प्रथम करि जो मूढ सो, उभय भ्रष्ट निरभाग ॥ ९८ ॥

क्रिया मूढ जूठी क्रियां, कर न थापे ग्यान ।
क्रिया भ्रष्ट ईक ग्यान मत, छेदे क्रिया अजान ॥ ९९ ॥

ते दोनूं थे दूरि शव, जो निज बल अनुसार ।
मारग रुचि मारग रहि, सो शिव साधणहार ॥ १०० ॥

निवृत्ति ललनाको सहज, अचरजकारी कोई ।
जो नर याकुं रुचत है, याकुं देखे सोइ ॥ १०१ ॥

मन पारद मुरछित भयो, समता औषधि आई ।
सहिज (सहस्त्र) वेधि रस परमगुन, सोवन सिद्धि कमाइ ॥ १०२ ॥

बहुत ग्रंथ नय देखिके, महापुरुष कृत सार ।
विजयसिंहसूरि किओ, समताशतको हार ॥ १०३ ॥

भावत याको तत्त्व मन, हो समता रस लीन ।
ज्युं प्रकटे तुझ सहज सुख, अनुभौ गम्य अहीन ॥ १०४ ॥

कवि जसविजय सुसीख ए, आप आपकुं देत ।
साम्यशतक उद्धार करि हेमविजय मुनि हेत ॥ १०५ ॥

महोपाध्यायश्रीयशोविजयजीविरचितम्

# ॥ समाधिशतक ॥

समरी भगवंती भारती, प्रणमी जिन जग बंधु।
केवल आतम बोधको, करशुं सरस प्रबंध ॥ १ ॥

केवल आतम-बोध हे, परमारथ शिव-पंथ।
तामे जिनकुं मगनता, सोई-भाव निर्ग्रंथ ॥ २ ॥

भोग ज्ञान ज्युं बालको, बाह्य ज्ञानकी दोर।
तरुण भोग अनुभव जिस्यो, मगन-भाव कछु ओर ॥ ३ ॥

आतम-ज्ञाने मगन जो, सो सब पुद्गल खेल।
इंद्रजाल करि लेखवे, मिले न तिहा मन-मेल ॥ ४ ॥

ज्ञान बिना व्यवहार को, कहा बनावत नाच ?।
रत्न कहो कोउ काचकुं, अंत काच सो काच ॥ ५ ॥

राचे साचे ध्यनमें, याचे विषय न कोई।
नाचे माचे मुगति - रस, 'आतम-ज्ञानी' सोइ ॥ ६ ॥

बहिर अंतर परम ए, आतम-परिणति तीन।
देहादिक आतम-भरम, बहिरातम बहु दीन ॥ ७ ॥

चित्तदोष आतम-भरम, अंतर आतम खेल।
अतिनिर्मल परमात्मा, नहि कर्म को भेल ॥ ८ ॥

नरदेहादिक देख के, आतम-ज्ञाने हीन।
इंद्रिय बल बहिरातमा, अहंकार मन लीन ॥ ९ ॥

अलख निरंजन अकल गति; व्यापि रह्यो शरीर।
लख सुज्ञाने आतमा, खीर लीन ज्युं नीर ॥ १० ॥

अरि मित्रादिक कल्पना, देहातम अभिमान।
निज पर तनु संबंध मति, ताको होत निदान ॥ ११ ॥

देहादिक आतम-भ्रमें, कल्पे निज पर भाव।
आतम-ज्ञानी जग लहे, केवल शुद्ध स्वभाव ॥ १२ ॥

स्व-पर विकल्पे वासना, होत अविद्यारुप।
ताते बहुरी विकल्पमय, भरम-जाल अंधकूप ॥ १३ ॥

पुत्रादिककी कल्पना, देहातम-भ्रम भूल।
ताकुं जड संपत्ति कहे, हहा मोह प्रतिकूल ॥ १४ ॥

या भ्रम-मति अब छांडि दो, देखो अंतर-दृष्टि।
मोह-दृष्टि जो छोडिअे, प्रगटे निज-गुण-सृष्टि ॥ १५ ॥

रुपादिकको देखवो, कहन कहावन कूट।
इंद्रिय योगादिक बले, ए सब लूटलूट ॥ १६ ॥

परपद आतम द्रव्यकुं, कहन सुनन कछुं नांहि।
चिदानंद-घन खेल ही, निजपद तो निजमांहि ॥ १७ ॥

ग्रहण अयोग्य ग्रहे नहि, ग्रह्यो न छोडे जेह।
जाणे सर्व स्वभावतें, स्वपर-प्रकाशक तेह ॥ १८ ॥

रूपेके भ्रम सीपमें, ज्युं जड करे प्रयास।
देहातम-भ्रमतें भयो, त्युं तुज कूट अभ्यास ॥ १९ ॥

मिटे रजत भ्रम सीपमें, जन-प्रवृत्ति जिम नाहि।
न रमे आतम-भ्रम मिटे, त्युं देहादिकमांहि ॥ २० ॥

फिरे अबोधे कंठगत, चामीकरके न्याय।
ज्ञान-प्रकाशे मुगति तुज, सहज सिद्धि निरुपाय ॥ २१ ॥

या बिन तु सूतो सदा, योगे भोगे जेण।
रूप अतींद्रिय तुझ ते, कही शके कहो केण ? ॥ २२ ॥

देखे भाखे ओर करे, ज्ञानी सबहि अचंभ।
व्यवहारे व्यवहारस्युं, निश्चयमें थिर थंभ ॥ २३ ॥

जग जाणे उन्मत्त ओ, ओ जाणे जग अंध ।
ज्ञानीकुं जगमें रह्यो, यु नहि कोइ संबंध ॥ २४ ॥

या पर छांहि ज्ञानकी व्यवहारे ज्युं कहाई ।
निर्विकल्प तुज रूपमें, द्विधा भाव न सुहाइ ॥ २५ ॥

युं बहिरातम छांडिके, अंतर-आतम होई ।
परमातम मति भाविअे, जिहां विकल्प न कोइ ॥ २६ ॥

सो में या द्रढ वासना, परमातम पद हेत ।
इलिका भ्रमरी ध्यान गति, जिनमति जिनपद देत ॥ २७ ॥

भारे भय पद सोई हे, जिहां जडको विश्वास ।
जिनसुं ओ डरतो फिरे, सोई अभयपद तास ॥ २८ ॥

इंद्रिय-वृत्ति निरोध करी, जो खिनु गलित विभाव ।
देखे अंतर आतमा, सो परमातमभाव ॥ २९ ॥

देहादिकतें भिन्न में, मोथें न्यारे तेहु ।
परमातम-पथ दीपिका, शुद्ध भावना एहु ॥ ३० ॥

क्रिया कष्ट भी नहु लहे, भेद-ज्ञान-सुखवंत ।
या बिन बहुविध तप करे, तो भी नहि भव अंत ॥ ३१ ॥

अभिनिवेश पुद्गल विषय, ज्ञानीकुं कहां होत ? ।
गुणको भी मद मिट गयो, प्रकटत सहज उद्योत ॥ ३२ ॥

धर्म क्षमादिक भी मिटै, प्रगटत धर्मसंन्यास ।
ते कल्पित भव-भावमें, क्युं नहि होत उदास ? ॥ ३३ ॥

रज्जु अविद्या-जनित अहि, मिटे रज्जु के ज्ञान ।
आतमज्ञाने त्युं मिटे, भाव-अबोध निदान ॥ ३४ ॥

धर्म अरूपी द्रव्यके, नहि रूपी परहेत ।
अपरम गुन राचे नहि, युं ज्ञानी मति देत ॥ ३५ ॥

नैगमनयकी कल्पना, अपरम-भाव विशेष।
परम-भावमें मगनता, अति विशुद्ध नयरेख ॥ ३६ ॥

रागादिक जब परिहरी करे सहज गुण खोज।
घटमें भी प्रगटे तदा, चिदानंदकी मोज ॥ ३७ ॥

रागादिक परिणाम-युत, मनहि अनंत संसार।
तेहिज रागादिक रहित, जाने परमपद सार ॥ ३८ ॥

भव-प्रपंच मन-जालकी, बाजी जूठी मूल।
चार पांच दिन खुश लगे, अंत धूलकी धूल ॥ ३९ ॥

मोह बागुरी जाल मन, तामें मृग मत होउं।
यामें जे मुनि नहि परे, ताकु असुख न कोउं ॥ ४० ॥

जब निजमन सन्मुख हुअे, चितै न पर गुण दोष।
तब बहुराई लगाईए, ज्ञान ध्यान रस पोंष ॥ ४१ ॥

अहंकार परमें धरत, न लहे निज गुण गंध।
अहंज्ञान निज गुण लगे, छुटे परहि संबंध ॥ ४२ ॥

अर्थ त्रिलिंगी पद लहे, सो नहि आतमरूप।
तो पद करी क्युं पाइअे ? अनुभवगम्य स्वरूप ॥ ४३ ॥

दिसि दाखी नवि डग भरे, नय प्रमाण पद कोडि।
संग चले शिवपुर लगें, अनुभव आतम जोडी ॥ ४४ ॥

आतम-गुण अनुभवत भी, देहादिकतें भिन्न।
भूले विभ्रम-वासना, जोरें फिरे न खिन्न ॥ ४५ ॥

देखे सो चेतन नाहि, चेतन नाहि दिखाय।
रोष तोष किनसु करे ? आप हि आप बुझाय ॥ ४६ ॥

त्याग ग्रहण बाहिर करे, मूढ कुशल अंतरंग।
बाहिर अंतर सिद्धकुं, नहि त्याग अरू संग ॥ ४७ ॥

आतमज्ञाने मन धरे, वचन-काय-रति छोड।
तो प्रकटे शुभ वासना, गुण अनुभवकी जोड ॥ ४८ ॥

योगारंभीकुं असुख, अंतर बाहिर सुख।
सिद्धयोगकुं सुख हे, अंतर बाहिर दुःख ॥ ४९ ॥

सो कहीअे सो पूछीअे, तामें धरीये रंग।
यातें मिटे अबोधता, बोधरूप हुइ चंग ॥ ५० ॥

नहि कछु इंद्रिय विषयमें चेतनकुं हितकार।
तो भी जन तामें रमें, अंधो मोह अंधार ॥ ५१ ॥

मूढातमशुं ते प्रबल, मोहे छांडि शुद्ध।
जागते हे ममता भरे, पुद्गलमें निज बुद्धि ॥ ५२ ॥

ताकुं बोधन-श्रम अफल, जाकुं नहि शुभ योग।
आप आपकुं बूझवे निश्चय अनुभव भोग ॥ ५३ ॥

परको किस्यो बुझावनो, तुं पर-ग्रहण न लाग।
चाहे जेमें बुझनो, सो नहि तुझ गुण भाग ॥ ५४ ॥

जबलों प्रानी निजमतें, ग्रहे वचन मन काय।
तबलों हि संसार थिर, भेद-ज्ञान मिटी जाय ॥ ५५ ॥

सूक्ष्म धन जीरन नवे, ज्युं कपरे त्युं देह।
तातें बुध मानें नहि, आपनी परिणति तेह ॥ ५६ ॥

हानि वृद्धि उज्ज्वल मलिन, ज्युं कपरे त्युं देह।
तातें बुध माने नहि; अपनी परिणति तेह ॥ ५७ ॥

जैसे नाश न आपको, होत वस्त्रको नाश।
तैसे तनुके नाशतें, चेतन अचल अनाश ॥ ५८ ॥

जंगम जग थावर परे, जाकुं भासे नित्त।
सो चाखे समता-सुधा, अवर नहि जड-चित्त ॥ ५९ ॥

मुगति दूर ताकुं नहि, जाकुं स्थिर संतोष।
दूर मुगति ताकुं सदा, जाकु अविरति पोष ॥ ६० ॥

होत वंचन मन चपलता, जनके संग निमित्त।
जन-संगी होवे नहि, तातें मुनि जग-मित्त ॥ ६१ ॥

वास नगर वन के विषे; माने दुविध अबुद्ध।
आतम-दर्शीकुं वसति, केवल आतम शुद्ध ॥ ६२ ॥

आप भावना देहमें, देहांतर गति हेत।
आप-बुद्धि जो आपमें, सो 'विदेह' पद देत ॥ ६३ ॥

भवि शिवपद दिइ आपकुं, आपही सन्मुख होई।
ताते गुरु हे आतमा, अपनो और न कोई ॥ ६४ ॥

सोवत हे निज भावमें, जागे ते व्यवहार।
सुतो आतम-भावमें, सदा स्वरूपाधार ॥ ६५ ॥

अंतर चेतन देखके, बाहिर देह स्वभाव।
ताके अंतर ज्ञानतें, होइ अचल द्रढभाव ॥ ६६ ॥

भासे आतमज्ञान धुरि, जग उन्मत्त समान।
आगे द्दढ अभ्यासतें, पथ्थर तृण अनुमान ॥ ६७ ॥

भिन्न देहतें भाविये, त्युं आपहीमें आप।
ज्युं स्वप्नहीमें नहि हुअे, देहातम भ्रमताप ॥ ६८ ॥

पुण्य पाप व्रत अव्रत, युगति दोउके त्याग।
अव्रत परे व्रत भी त्यजे, तातें धरि शिवराग ॥ ६९ ॥

परमभाव प्राप्ति लगे, व्रत धरि अव्रत छोडि।
परमभाव रति पाय के, व्रत भी इन में जोडि ॥ ७० ॥

दहन समें ज्युं तृण दहे, त्युं व्रत अव्रत छेदि।
क्रिया शक्ति इनमें नहि, या गति निश्चय भेद ॥ ७१ ॥

व्रत गुण धारत अव्रति, व्रतिज्ञान गुण होई ।
परमातमके ज्ञानतें, परम-आतमा होई ॥ ७२ ॥

लिंग देह आश्रित रहे, भवको कारण देह ।
तातें भाव छेदे नहि, लिंग-पक्ष-रत जेह ॥ ७३ ॥

जाति देह आश्रित रहे, भवको कारण देह ।
तातें भव छेदे नहि, जाति-पक्ष-रत जेह ॥ ७४ ॥

जाति-लिंग के पक्षमें, जिनकुं है द्रढराग ।
मोह-जालमें सो परें, न लहे शिवसुख भाग ॥ ७५ ॥

लिंग द्रव्य गुन आदरे, निश्चय सुख व्यवहार ।
बाह्य लिंग हठ नय मति, करे मूढ अविचार ॥ ७६ ॥

भाव लिंग जातें भये, सिद्ध पनरस भेद ।
तातें आतमकुं नहि, लिंग न जाति न वेद ॥ ७७ ॥

पंगु द्दष्टि ज्युं अंधमे, द्रष्टि-भेद नहु देत ।
आतमद्दष्टि शरीरमें त्युं न धरे गुन हेत ॥ ७८ ॥

स्वप्न विकलतादिक दशा, भ्रम माने व्यवहार ।
निश्चयनयमें दोषक्षय, विना सदा भ्रमचार ॥ ७९ ॥

छूटे नहि बहिरातमा, जागतभी पढि ग्रंथ ।
छूटे भवथें अनुभवी, सुपन-विकल निर्ग्रंथ ॥ ८० ॥

पढि पार कहां पावनो ? मिट्यो न मनको चार ।
ज्युं कोल्हुके बेलकुं, घरही कोस हजार ॥ ८१ ॥

तिहां बुद्धि थिर पुरुषकी, जिहां रुचि तिहां मनलीन ।
आतम-मति-आतम-रुचि, काहु कोन आधीन ? ॥ ८२ ॥

सेवत परम परमात्मा, लहे भविक तस रूप ।
बतियां सेवत ज्योतिकुं, होवत ज्योति-सरूप ॥ ८३ ॥

आप आपमें स्थित हुए, तरुथे अग्नि-उद्योत।
सेवत आपहि आपकुं, त्युं परमातम होत ॥ ८४ ॥

याहि परमपद भाविये, वचन अगोचर सार।
सहज ज्योति तो पाइये, फिर नहि भव-अवतार ॥ ८५ ॥

ज्ञानीकुं दुःख कछु नहि, सहज सिद्ध निर्वाण।
सुख प्रकाश अनुभव भए, सबहि ठोर कल्याण ॥ ८६ ॥

सुपन-दृष्टि सुख नाशतें, ज्युं दुःख न लहे लोक।
जागर-दृष्टि विनष्टमें, त्युं बुधकुं नहि शोक ॥ ८७ ॥

सुख-भावित दुःख पाय के, क्षय पावे जगज्ञान।
न रहे सो बहु तापमें, कोमल फूल समान ॥ ८८ ॥

दुःख - परितापे नवि गले, दुःख-भावित मुनि ज्ञान।
वज्रगले नवि दहनमें, कंचनके अनुमान ॥ ८९ ॥

तातें दुःखसुं भाविए, आप शक्ति अनुसार।
तो दृढतर हुइ उल्लसे, ज्ञान-चरण-आचार ॥ ९० ॥

रनमें लरते सुभट ज्युं, गिने न बान-प्रहार।
प्रभु-रंजन के हेत त्युं, ज्ञानी असुख-प्रचार ॥ ९१ ॥

व्यापारी व्यापारमें, सुख करि माने दुःख।
क्रिया कष्ट सुखमें गिने, त्युं वांछित मुनि-मुख्य ॥ ९२ ॥

क्रिया योग अभ्यास हे, फल हे ज्ञान अबंध।
दोनुंकुं ज्ञानी भजे, अेक-मति मति - अंध ॥ ९३ ॥

इच्छा शास्त्र समर्थता, त्रिविध योग हे सार।
इच्छा निज शकते करी, विकल योग व्यवहार ॥ ९४ ॥

शास्त्र-योग गुनठाणको, पुरन विधि आचार।
पद अतीत अनुभव कह्यो, योग तृतीय विचार ॥ ९५ ॥

रहे यथा बल योग में, ग्रहे सकल नय सार।
भावजैनता सो लहे, वहे न मिथ्याचार ॥ ९६ ॥

मारग-अनुसारी क्रिया, छेदे सो मतिहीन।
कपट-क्रिया-बल जग ठगे, सो भी भवजल मीन ॥ ९७ ॥

निज निज मतमें लरि परे, नयवादी बहु रंग।
उदासीनता परिणमे, ज्ञानीकुं सरवंग ॥ ९८ ॥

दोउ लरे तिहां इक परे, देखनमें दुःख नांहि।
उदासीनता सुखसदन, पर प्रवृत्ति दुःख छांहि ॥ ९९ ॥

उदासीनता सुरलता, समतारस फल चाख।
परपेखनमें मत परे, निजगुण निजमें राख ॥ १०० ॥

उदासीनता ज्ञानफल, पर-प्रवृत्ति है मोह।
शुभ जानो सो आदरो, उदित विवेकप्ररोह ॥ १०१ ॥

दोधक शतके उद्धर्युं, तंत्र समाधि विचार।
धरो एह बुध ! कंठमें भावरतनको हार ॥ १०२ ॥

ज्ञान विमान चारित्र पवि, नंदन सहज समाधि।
मुनि सुरपति समता शची, रंगे रमे अगाधि ॥ १०३ ॥

कवि जशविजये रच्यो, दोधक शतक-प्रमाण।
अेह भाव जो मन धरे, सो पावे कल्याण ॥ १०४ ॥

पू.आ.श्रीजिनवल्लभसूरिविरचितम्

# ।। प्रश्नशतकम् ।।

क्रमनखदशकोटीदीप्रदीप्तिप्रतानै-
र्दशविधतनुभाजामुज्ज्वलं मोक्षमार्गम् ।
पृथगिव विदिशन्तं पार्श्वमानम्य सम्यक्,
कतिचिदबुधबुद्ध्यै वच्म्यहं प्रश्नभेदान् ॥ १ ॥

कीदृग्वपुस्तनृभृताम्?अथशिल्पिशिक्य देहानुदाहरति काध्वनिरत्रकीदृक्
काश्चारुचन् समवसृत्यवनौ भवाम्बु मध्यप्रपातिजनतोद्धृतिरज्जुरूपाः ?

सश्रीकं यः कुरुते स कीदृगित्याह जलचरविशेषः ? ।
अप्सु ब्रुडन् किमिच्छति कीदृक्कामी च किं वाञ्छेत् ? ॥ ३ ॥

कीदृक् पुष्पमलिव्रजो न भजते ? वर्षासु केषां गति-
र्न स्यादध्वनि ? कं श्रितश्च कुरुते कोकं सशोकं रविः ? ।
लङ्केशस्य किल स्वसारमकरोद्रामानुजःकीदृशीं ?,
केषां वा न मनो मुदे मृगदृशः श्रृङ्गारलीलास्पृशः ? ॥ ४ ॥

प्रभविष्णुविष्णुजिष्णुनि, युद्धे कर्णस्य कीदृगभिसन्धिः ? ।
नकुलकुलसंकुलभुवि, प्रायः स्यात्कीदृगहिनिवहः ? ॥ ५ ॥

ब्रूतो ब्रह्मस्मरौ के रणशिरसि जिताः ? केन जेत्राह विद्वा-?
नुद्यानं स्यान्न कीदृग्जलधिजलमहो कीदृशं स्यान्न गम्यम् ? ।
को मां वक्त्याह कृष्णः ? क्व सति पटु वचः ? स्यादुतः केन वृद्धि-
स्त्याज्यं कीदृक् तडागं नतिमति लघुका किं करोत्युत्कटं किम् ? ६

दृष्ट्वा राहुमुखग्रस्य-मानमिन्दुं किमाह तद्दयिता ? ।
असुमेतिपदं कीदृ-क्कामं लक्ष्मीं च बोधयति ? ॥ ७ ॥

कमभिसरति लक्ष्मीः ? किं सरागैरजय्यं ?,
सकलमलविमुक्तं कीदृशं ज्ञानमुक्तम् ? ।

सततरतविमर्दे निर्दये बद्धबुद्धिः,
किमभिलषति कान्ता ? किं च चक्रे हनूमान् ? ॥ ८ ॥

भूरपृच्छति किल चक्रवाकमेषोऽपि भूमिमप्राक्षीत् ।
पीतांशुकं किमकरोत्कुत्र ? क्व नु मादृशां वासः ? ॥ ९ ॥

हरिरितिरमा यूयं कान् किं कुरुध्वमदोऽक्षरं ?,
किमपि वदति भ्रेजे गीतश्रियापि च कीदृशा ? ।
जिनमतजुषां का स्यादस्मिन् कियच्चिरमङ्गिनां ?,
गतशुभधियां का स्यात् कुत्राभियोगविधायिनाम् ? ॥ १० ॥

प्रतिवादिद्विरदभिदे गुरुणेह किमक्रियन्त के कस्य ? ।
उरशब्दः कल्याणदबलहिमश्रृङ्गान् वदति कीदृक् ? ॥ ११ ॥

हरति क इह कीदृक् कामिनीनां मनांसि ?,
व्यरचि सचिवभावः केन धूमध्वजस्य ? ।
क्षयमुपगमिता रुक् कीदृशेनातुरेण ?,
प्रसरति च विबाधा कीदृशीहार्शसानाम् ? ॥ १२ ॥

वाजिबलिवर्दविनाशसुष्ठुनिष्ठुरमुरद्विषो यमिह ।
प्रश्नं विदधुर्वपुषस्तस्मिन्नेवोत्तरमवापुः ॥ १३ ॥

क्रव्यादां केन तुष्टिर्जगदनभिमता का रिपुः ? कीदृगुग्रः ?,
कं नेच्छन्तीह लोकाः ? प्रणिगदति गिरिर्वृश्चिकानां विषं क्व ।
कुत्र क्रीडन्ति मत्स्याः प्रवदति मुरजित्कापिले भोगभाक्कः ?,
कीदृक्का कीदृशेन प्रणयभृदपि चालिङ्ग्यते न प्रियेण ? ॥ १४ ॥

कीदृश्यो नाव इष्यन्ते, तरीतुं वारि वारिधेः ? ।
अशिवध्वनिराख्याति, तिर्यग्भेदं च कीदृशः ? ॥ १५ ॥

पीनकुचकुम्भलुभ्यन्, किमाह भगिनीं स्मरातुरः कौलः ? ।
हरनिकरपथस्वः-सृष्टिवाचि नर्नगपदं कीदृग् ? ॥ १६ ॥

नाभ्यम्भोजभुवः स्मरस्य च रुचो विस्तारयेति श्रियः,
पत्युः पत्युपदेशनं कथमथो पत्नीष्यते कीदृशी ? ।
इत्याख्यत् कमला तथाकलियुगे कीदृक्कुराज्यस्थितिः,
कीदृश्याऽहनि चण्डभास्करकरेनक्षत्रराज्याऽजनि ? ॥ १७ ॥

प्रभुमाश्रित्य श्रीदं, किमकुर्वन् के कया समं लक्ष्मि ! ? ।
कह केरिसया के मरण-मुवगया लुद्धयनिरुद्धा ? ॥ १८ ॥

वसुदेवेन मुररिपुर्यैर्हिंसाहेतुतां श्रियां पृष्टः ।
तेणं तेहिं चिय अक्खरेहिँ से उत्तरं सिट्ठं ॥ १९ ॥

किं प्राहुः परमार्थतः कमृषयः ? किं दुर्गमं वारिधे
र्विद्याःकं न भजन्ति ? रागिमिथुनं कीदृक्किमर्धं स्मृतम् ? ।
रक्षांसि स्पृहयन्ति किं ?, तनुमतां कीदृक् सुखार्थादिकं ?,
कीदृक्कर्षुकलोकहर्षजनकं न व्योम वर्षास्वपि ? ॥ २० ॥

अभिसारिकाह कांश्चित्तरुणाःकिं कुर्वतेऽत्र कं कस्याः ? ।
रतिसागरे मृगदृशः, किं किमकार्षीत्कथं कामी ? ॥ २१ ॥

कामाः प्राहुरुमापते ! तव रुषः प्रागत्र कीदृग् सती,
का केषां किमकारि वारितनुदे रत्या स्वचेतो मुदे ।
पश्चादुद्भवजानुसंभवनरान् दैत्यान्त्यदंष्ट्राङ्गजान्,
मन्दं च क्रमशो मुजध्वनिरगात् कीदृक् क्वकस्मिन्सति ॥ २२ ॥

जलस्य जारजातस्य, हरितालस्य च प्रभुः ।
मुनिर्यं प्रश्नमाचष्टे, तत्रैव प्रापदुत्तरम् ॥ २३ ॥

ब्रूते पुमांस्तन्वि ! तवाधरं कः ?, क्षिणोति को वा मनुजव्रजच्छित् ? ।
प्रिये ! स्वसान्निध्यमनभ्युपेते, किमुत्तरं यच्छति पृच्छतः श्रीः ? २४

किमिष्टं चक्राणां वदति बलमर्कः किमतनोत् ?,
जिनैः को दध्वंसे ? विरहिषु सदा कः प्रसरति ? ।

भरं धौरेयाणां निरुपहतमूर्तिर्वहति कः ?,
सुरेन्द्राणां कीदृग् भवति जिनकल्याणकमहः ? ॥ २५ ॥

प्राह द्विजो गजपतेरुपनीयते का ?,
पात्री प्रभुश्च जिनपङ्क्तिरवाचि कीदृक् ? ।
कीदृग्विधेह वनिता नृपतेरदृश्या ?,
प्रस्थास्नुविष्णुतनुरैक्षत कीदृशी च ? ॥ २६ ॥

वदति विहगहन्ता कः प्रियो निर्धनानां ?,
भणति नभसि भूतः कीदृशः स्याद्विसर्गः ? ।
वदति जविनशब्दः कीदृशः सत्कवीन्द्राः ?,
कथयत जनशून्यं कज्जलं भर्त्सनं च ? ॥ २७ ॥

वीतस्मरः पृच्छति कुत्र चापलं स्वभावजं ? कः सुरते श्रियः प्रियः ?
सदोन्मुदो विन्ध्यवसुन्धरासु क्रीडन्ति काः कोमलकन्दलासु ?॥ २८ ॥

मूषकनिकरः कीदृक्, खलधान्यादिधामसु ? ।
भीरुः संभ्रमकारी च, कीदृगम्भोनिधिर्भवेत् ? ॥ २९ ॥

किं लोहाकरकारिणामभिमतं ? सोत्कर्षतर्षातुराः,
किं वाञ्छन्ति हरन्ति के च हृदयं दारिद्र्यमुद्राभृताम् ? ।
स्पर्धावद्भिरथाहवेषु सुभटैः कोऽन्योऽन्यमन्विष्यते ?
जैनाज्ञारतशान्तदान्तमनसः स्युःकीदृशा साधवः ? ॥ ३० ॥

पापं पृच्छति विरतौ, को धातुः ? कीदृशः कृतकपक्षी ? ।
उत्कण्ठयन्ति के वा, विलसन्तो विरहिणीहृदयम् ? ॥ ३१ ॥

केनोद्वहन्ति दयितं विरहे तरुण्यः ?,
प्राणैः श्रिया च सहितः परिपृच्छतीदम् ।
तार्क्ष्यस्य का नतिपदं ? सुखमत्र कीदृक् ?,
किं कुर्वताऽन्यवनितां किमकारि कान्ता ? ॥ ३२ ॥

भवति चतुर्वर्गस्य, प्रसाधने क इह पटुतरः प्रकटः ? ।
पृच्छत्यङ्गावयवः कः, पूज्यतमस्त्रिजगतोऽपि ? ॥ ३३ ॥

वैदिकविधिविशस्तबस्तामिषमदतां स्वर्गदं द्विजं,
जैनादिः किमाह साक्षेपं सासूयं सकाकु च ? कीदृक् ।
पूतवातपरितापम्लेच्छोपास्तिनुतिगृहक्रीडा-
होमविश्ववेगवतो जल्पति पवदनदंपदम् ? ॥ ३४ ॥

औषधं प्राह रोगाणां, मया कः प्रविधीयते ।
जामातरं समाख्याति, कीदृशो बठरध्वनिः ? ॥ ३५ ॥

अग्रे गम्येत केन ? प्रविरलमसृणं किं प्रशंसन्ति सन्तः ?,
पाणिर्ब्रूते जटी कं प्रणमति ? विधवा स्त्री न कीदृक् प्रशस्या ? ।
वक्ति स्तेनः क्व वेगो ? रणभुवि कुरुतः किं मिथः शत्रुपक्षा-
वुद्वेगावेगजातारतिरथ वदति स्त्री सखीं किं सुषुप्सुः ? ॥ ३६ ॥

व्यथितः किमाह सदयः, क्षितकं क्षुत्क्षामकुक्षिमुद्वीक्ष्य ? ।
दारुणधन्वनि समरे, कीदृक्कातरनरश्रेणिः ? ॥ ३७ ॥

चन्द्रः प्राह वियोगवानकरवं किं रोहिणीं प्रत्यहं ?,
शम्भोः केन जवाददाहि सरुषा कस्याङ्गयष्टिः किल ? ।
शीघ्रं कैः पथि गम्यते?ऽथ कमला ब्रूते मुहुर्वल्लभं,
ध्यानावेशवशादलाभि पुरतः कैर्वैश्वरूपं मम ? ॥ ३८ ॥

गुरुरहमिह सर्वस्याग्रजन्मेति भट्टं,
समदममदयिष्यन् कोऽपि कुप्यन् किमाह ? ।
त्वमलदयपदं वा आश्रयाभावमूर्छा-
कटकनगविशेषान् कीदृगामन्त्रयेत ? ॥ ३९ ॥

कीदृग्मया सह रणे, दैत्यचमूरभवदिति हरिः प्राह ? ।
लोको वदति किमर्थं ?, का विदिता दशमुखादीनाम् ? ॥ ४० ॥

दृष्ट्वाग्रतः किल कमप्यवसादवन्तं,
स्वामी पुरः स्थितनरं किमभाषतैकम् ? ।
कश्चिद् ब्रवीत्ययि जिगीषुनृपा अकार्षीत्,
किं कीदृशो वदत राजगणोऽत्र केषाम् ? ॥ ४१ ॥

सीरी पाणिं क्व धत्ते ? क्रतुरथ मुदगात्स्यात्कया देहिनां भी-
र्ब्रूतेऽश्वः क्वारि विष्णुर्व्यधृत सविधगं हन्तुकामः किमाह ? ।
शम्भुं घ्नन्तं गजं द्राक् सदय ऋषिरगात् किं तु काक्वा तथास्मिन्,
हारं किं नापिधत्से ? विरहिणि नभसीत्यूचुर्षी सा वदेत् किम् ? ४२

मधुरिपुणा निहते सति, दनुजविशेषे तदनुगताः किमगुः ? ।
अभिदधते च विदग्धाः, सत्कवयः कीदृशीर्वाचः ? ॥ ४३ ॥

ब्रूते पुमान् मुरजिता रतिकेलिकोपे,
सप्रश्रयं प्रणमता किमकारि का कम् ? ।
दुःखी सुखाय पतिमीप्सति कीदृशं वा ?,
कामी कमिच्छति सदा रतये प्रयोगम् ? ॥ ४४ ॥

यूयं किं कुरुत जनाः, स्वपूज्यमिति शिल्पिसुतखगौ ब्रूतः ।
स्मरविमुखचित्तजैनः, कथमाशास्ते जनविशेषम् ॥ ४५ ॥
सुभटोऽहं वच्मि रणे, रिपुगलनालानि केन किमकार्षम् ? ।
चेटीप्रियो ब्रुवेऽहं, किमकरवं काः स्वगुणपाशैः ? ॥ ४६ ॥

भूषा कस्मिन् सति ? स्यात्कुचभुवि मदिरा वक्ति ? कुत्रेष्टिकाः स्युः ?,
कस्मिन् योधे जयश्रीर्युधि ? सरति रतिः प्रांजने कुत्र नोक्ष्णः ? ।
कामद्वेषी तथोडुर्वदति दधि भवेत् कुत्र ? किं वा वियोगे,
दीर्घाक्ष्याः ? कोऽपि पीनस्तनघनघटितप्रीतिरन्यं ब्रवीति ॥ ४७ ॥

किं कुर्याः ? कीदृक्षौ, रागद्वेषौ समाधिना त्वमृषे ! ।
कीदृक्षः कक्षे स्यात्, किल भीष्मग्रीष्मदवदहनः ॥ ४८ ॥

शुभगोरसभूमीरभि, किमाह तज्ज्ञः स्मरश्रीपृष्टः ? ।
विरहोद्विग्नः कामी, निन्दन् दयितां किमभिधत्ते ? ॥ ४९ ॥

इह के मृषाप्रसक्ता, नरनिकराः ? इति कृते सति प्रश्ने ।
यत्समवर्णं तूर्णं, तदुत्तरं त्वं वद विभाव्य ॥ ५० ॥

बभ्रुः प्रभूततुरगान् स्वजनास्तवेति,
राज्ञोदितः कृपणकोऽपलपन् किमाह ? ।
पीत्वा छलेन दशनच्छदमुग्रमानां,
भर्ता किमाह दयितां किमपि ब्रुवाणाम् ? ॥ ५१ ॥

श्रीराख्यदहं प्रियमभि, किमकरवं ? का च कस्य जनयित्री ? ।
अदिवारीशब्दो वा, कैस्त्यक्तः प्राह गृहदेशम् ॥ ५२ ॥

कीदृक् सरः प्रसरदम्भसि भाति काले ?,
भुक्त्यर्थतेह विहिता कतमस्य धातोः ? ।
उत्कण्ठयेद्विरहिणं (र्णीं) क इह प्रसर्पन्,
ब्रूते शिफाध्वनिरथ श्रियमत्र कीदृक् ? ॥ ५३ ॥

वदति मुरजित् कुत्राता च प्रिया वरुणस्य का ?,
स च भणति यः क्रुद्धो नैव द्विषः परिरक्षति ।
दशमुखचमूः काकुत्स्थेन व्यधीयत कीदृशी ?,
खरवककवर्णाली कीदृग्ब्रवीति गतारतिः ? ॥ ५४ ॥

निःस्वःप्राह लसद्विवेककुलजैःसम्यग्विधीयेत को ?,
मुग्धे ! स्निग्धदृशं प्रिये किमकरोः ? किं वातदोष्ठं व्यधाः ? ।
लोकैःकोऽत्र निगद्यते बलिवधूवैधव्यदीक्षागुरुः ?,
कीदृग्भूमिशुभासशब्द इह भो विश्रम्भवाची भवेत् ? ॥ ५५ ॥

शशिना प्रमदपरवशः, पृच्छति कः स्वर्गवासमधिवसति ? ।
च्युतसत्पथाःकिमाहुर्लौकिकसन्तो विषादपराः ॥ ५६ ॥

उष्ट्रः पृच्छति किं चकार मदते कस्मिन् शमीवृक्षकः ?,
कीदृक् सन्नधिकं स्वभक्ष्यविरहे दुःखी किलाहं ब्रुवे ? ।
यूनः प्राह सरोजचारुनयना सम्भोगभङ्गि(गी)क्रमे,
प्रारब्धेऽधरचुम्बने मम मुखं यूयं कुरुध्वे किमु ? ॥ ५७ ॥

चक्री चक्रं क्व धत्ते ? क्व सजति कुलटा ? प्रीतिरोतोः क्व? कस्मै,
कूपः खन्येत राज्ञां ? क्व च नयनिपुणैर्नेत्रकृत्यं निरुक्तम् ? ।
कन्दर्पापत्यमूचे रणशिरसि रुषा ताम्रवर्णः क्व कर्ण-
श्चक्षुश्चिक्षेप ? विष्णुर्वदति वसु पुरस्तेन किं त्वं करोषि ? ॥ ५८ ॥

युज्यन्ते कुत्र मुक्ताः ? क्व च गिरिसुतयाऽसञ्जि ? कस्मिन्महान्तो,
यत्नं कुर्वन्ति ? चौर्यं निगदति विदिता क्वैकदिक् तिग्मधारा ? ।
कस्मिन्दृष्टे रटन्ति क्व च सति करभाः ? पक्ष्मलाक्ष्या किलोक्तः,
कश्चित्किं वा ब्रवीति स्मरशरनिकराकीर्णकायः सदेश्यान् ? ॥ ५९ ॥

जलनिधिमध्ये गिरिमभिवीक्ष्य, क्षितिरिति वदन् किमाह विवादे ? ।
स्निग्धस्मितमधुरं पश्यन्ती, हरति मनांसि मुनीनामपि का ? ॥ ६० ॥

धर्मेण किं कुरुत काः क्व नु यूयमार्याः ?,
कीदृश्यहिंसनफलेन तनुः सदा स्यात् ? ।
पुंसां कलौ प्रतिकलं किल केन हानिः ?,
कीदृग्व्यधायि युधि कार्जुनचापनादैः ? ॥ ६१ ॥

कीदृशः स्यादविश्वास्यः ?, स्निग्धबन्धुरपीह सन् ।
न स्थातव्यं चशब्दोऽयं, प्रदोषं प्राह कीदृशः ? ॥ ६२ ॥

नृणां का कीदृगिष्टा वद ? सरसि बभुः के ? स्मरक्रीडितोष्ट्राः,
साधुः श्रीशश्च सर्वे पृथगभिदधतो बोधनीयाः क्रमेण ।
कुर्वेऽहं ब्रह्मणे किं ? वदति मुनिविशेषोऽथ कीदृक् समग्रः ?,
स्यात्किंवा पङ्कजाक्षीसुखविमुखमना भुक्तभोगोऽभिदध्यात् ॥ ६३ ॥

स्वजनः पृच्छति जैनैरघस्य कः कुत्र कीदृशे कथितः ? ।
कथयत वैयाकरणाः, सूत्रं कात्यायनीयं किम् ? ॥ ६४ ॥

ब्रवीत्यविद्वान् गुरुरागतः कौ ?, सावित्र्युमे किं कुरुतः सदैव ? ।
आशैशवात् कीदृग्गुरभ्रपोतः ?, पुष्टिं च तुष्टिं च किलाप्नुवीत॥ ६५ ॥

तन्वि ! त्वं नेत्रतूणोद्गतमदनशराकारचञ्चत्कटाक्षै-
र्लक्ष्यीकृत्य स्मरार्तान् सपदि किमकरोः सुभ्रु ! तीक्ष्णैरभीक्ष्णम् ? ।
किं कुर्वाते भवाब्धिं सुमुनिवितरणाद्दायकश्रावकौ द्राक् ? ।
श्रद्धालुः प्राप्तमन्त्राद्युचितविधिपरः प्रायशः कीदृशः स्यात् ? ॥ ६६ ॥

कीदृगनिष्टमदृष्टं नुः, स्यादित्यक्षकीलिका ब्रूते ।
भणइ पिया ते पिययम, कए कहिं अभिरमइ दिट्ठी ॥ ६७ ॥

कीदृग्जलधरसमयजरजनी ?, पथिकमनांसि किमकरोत्कस्मिन् ? ।
मधुरस्निग्धविदग्धालोकं, स्त्रैणं कीदृग् भ्रमयति लोकम् ? ॥ ६८ ॥

पद्मस्तोमो वदति कपिसैन्येन भोः कीदृशा प्राक् ?,
सिन्धौ सेतुर्व्यरचि ? रुचिरा का सतां वृत्तजातिः ? ।
को वा दिक्षु प्रसरति सदा कण्ठकाण्डात् पुरारेः ?,
किं कुर्याः कं रह इति सखीं पृच्छतीं स्त्री किमाह ॥ ६९ ॥

पथि विषमे महति भरे, धुर्याः किं स्म कुरुथ कां कस्य ? ।
अत्यम्लतामुपगतं, किं वा के नाभिकाङ्क्षन्ति ? ॥ ७० ॥

भानोः केष्येत पद्मैरुडु वदति पदं ? पप्रथे किं सहार्थे ?,
कामो वक्ति व्यवायोऽपि च पदनिपुणैः पञ्चमी केन वाच्या ? ।
सप्राणः प्राह पुंसि क्व सजति जनता ? भाषतेऽथार्द्रभावः,
कुर्वेऽहं क्लेदनं किं ? क्व च न खलु मुखं राजति व्यञ्जतायाम् ? ।
सत्यासक्तं च सेर्ष्याः किमथ मुररिपुं रुक्मिणीसख्य आख्यन् ? ७१

तरुणेषु कीदृशं स्यात्, किं कुर्वत्कीदृगक्षि तरलाक्ष्याः ? ।
सा जोव्वणं भयंती, भण मयणं केरिसं कुणइ ? ॥ ७२ ॥

सत्यक्षमार्तिहर आह जयद्रथाजौ,
पार्थ ! त्वद्रीयरथवाजिषु का किमाधात् ? ।
अप्पोवमाइ किर मच्छरिणो मुणंति,
किंरूवमिच्छ(त्थ)सुअणं भण केरिसंति ? ॥ ७३ ॥

कीदृक्षः कथयत दौषिकापणः स्यान् ?,
त्रा केन व्यरचि च पट्टसूत्ररागः ? ।
क्षुद्रारिर्वदति किमुत्कटं जिगीषोः ?,
किं जघ्ने शकरिपुणेति वक्ति रङ्कः ? ॥ ७४ ॥

ब्रह्मास्त्रगर्वितमरिं रणसीम्नि शत्रुखड्गाक्षमं हरवितीर्णवरः किमाह ? ।
कामी प्रियां भणति किं त्वरितं रतार्थी ? वस्त्रं परास्यसहसादयितेभवाधः

प्रत्याहारविशेषा वदन्ति नन्दी निगद्यते कीदृक् ? ।
आपृच्छे गणकोऽहं, किमकार्षं ग्रहगणान् वदत ? ॥ ७६ ॥

कीदृक्षे कुत्र कान्ता रतिमनुभवति ? ब्रूत वर्ल्ली क्व मे मुत् ?,
प्राहर्षिः कोऽत्र कस्याः स्मरति गतधनः श्रीतया पृच्छ्यतेऽदः ? ।
क्वस्यात्प्रीतिस्तृतीयं वदति युगमिह ? क्वोद्यमी कामशत्रुः ?,
कामी रज्येत् प्रियायाः क्व च ? नयविनयी कुत्र पुत्रः प्रतुष्येत् ? ७७

स्पृहयति जनः कस्मै नास्मिन् सुखे वद कीदृशे ?,
प्रसजति सुधीः स्यात्कीदृक्षे क्व वा वपुरव्यथम् ? ।
सुदृशमभितः पश्यन् कामी किमाह सुखी युवा ?,
तरलनयना मामत्रेयं स्मितास्यमितीक्षते ॥ ७८ ॥

राजन् ! कः समरभरे, किमकारयदाशु किं रिपुभटानाम् ? ।
कुच्छिअविलास पभणइ, केरिसं पिसुणजणहिययं ? ॥ ७९ ॥

अयि सुमुखि ! सुनेत्रे ! सुभ्रु ! सुश्रोणि ! मुग्धे !,
वरतनु ! कलकण्ठि ! स्वोष्ठि ! पीनस्तनि ! त्वम् ।
वद निजगुणपाशैः किं करोषीह केषां ?,
सुगुरुरपि च दद्यात्कीदृशां मन्त्रविद्याम् ? ॥ ८० ॥

पृच्छामि जलनिधिरहं, किमकरवं सपदि शशधराभ्युदये ? ।
अलमुद्यमैः सुकृतिना-मित्युक्ते कीदृशः कः स्यात् ? ॥ ८१ ॥

वदति हरिरम्भोधिं पाणिं श्रियः करवाणि किं ?,
किमकुरुत भो यूयं लोकाः सदा निशि निद्रया ? ।
मुनिरिह सतां वन्द्यः कीदृक् तथास्मि गुरुर्ब्रुवे ?,
तव जडमते ! तत्त्वं भूयोऽप्यहं किमचीकरम् ? ॥ ८२ ॥

रतये किमकुर्वातां, परस्परं दम्पती चिरान्मिलितौ ।
मोक्षपथप्रस्थितमतिः परिहरति च कीदृशीं जनताम् ? ॥ ८३ ॥

हे नार्यः ! किमकार्षुरुद्गतमुदो युष्मद्वराः काः किल ?,
क्रुद्धः कामरिपुः स्मरं किमकरोदित्याह कामप्रिया ? ।
इच्छुर्लाभमहं मनोगृहगतं रक्षामि शम्भुं सदा-
ऽपीति स्वं मतमूचुषे किल मुनिः कामाशिषं यच्छति ? ॥ ८४ ॥

सरभसमभिपश्यन्ती, किमकार्षीः कं मम त्वमिन्दुमुखि ! ? ।
नयनगतिपदं कीदृक्, पूजयतीत्यर्थमभिधत्ते ? ॥ ८५ ॥

विधुन्तुदः प्राह रविं ग्रहीतुं, कीदृक्षमाहुः स्मृतिवादिनो माम् ? ।
का वा न दैवज्ञवरै स्तुतेह, प्रायेण कार्येषु शुभावहेषु ? ॥ ८६ ॥

अग्निज्वालादिसाम्याय, यं प्रश्नं श्रीरुदीरयेत् ।
तेनैव समवर्णेन, प्रापदुत्तममुत्तरम् ॥ ८७ ॥

कीदृक्षोऽहमिति ब्रवीति वरुणः ? काप्याह देवाङ्गना,
हंहो लुब्धक ! को निहन्ति हरिणश्रेणीं वनान्याश्रिताम् ? ।

कान्तन्यस्तपदं स्तने रमयति स्त्रीं किं विधिर्वक्त्यदः,
किं अन्नोन्नविरोहवारणकए जंपंति धम्मत्थिणो ॥ ८८ ॥

खड्गश्रियोर्यमब्रवीत्, प्रश्नं मुनिः किल स्वकम् ।
उत्तरं प्राप तत्रैव, कामेसिसेविषायते ॥ ८९ ॥

कीदृग्भवेत्करजकर्तनकारि शस्त्रं ?,
क्वाकारि किं रहसि केलिकलौ भवान्या ? ।
कश्चित्तरुः प्रवणयश्च पृथग्विबोध्यौ,
किं वा मुनिर्वदति बुद्धभवस्वभावः ? ॥ ९० ॥

कुमुदैः श्रीमान् कश्चि-दृगदपात्रं प्रश्नमाह यं भूमेः ।
तत्रैवोत्तरमलभत्, कैरवनिवहैरमामत्र ॥ ९१ ॥

सदाहिताग्नेः क्व विभाव्यते का ?, प्रावृष्युपास्ते शयितं क्व का कम् ? ।
दीर्घेक्षणा वक्ति पुरःस्थिताऽप्यहमवीक्ष्यमाणा प्रिय ! किं करोमि कम् ?

लक्ष्मीर्वदति बलिजितं, त्वमीश ! किं पीतमंशुकं कुरुषे ? ।
अपरं पृच्छामि प्रिय !, किं कुर्वेऽहं भवच्चरणौ ? ॥ ९३ ॥

प्रवीरवरशू(सू)दकं किल जगुर्जनाः कीदृशं ?,
पयो वदति कीदृशीं नृपततिं श्रयन्त्यर्थिनः ? ।
चकार किमगं हरिर्वदत विस्मये किं पदं ?,
निनीषुरमृतास्पदं कथमिहाह जैनो जनान् ? ॥ ९४ ॥

का दुरितासद्दूषण-सान्त्वक्षतिभूमिरिति कृते प्रश्ने ।
यत्तत्समानवर्णं त-दुत्तरं कथयत विभाव्य ॥ ९५ ॥

हंहो शरीर कुर्याः, किमनुकलं त्वं वयोबलविभाद्यैः ? ।
मदनरिपोर्द्दक्कीदृ-ग्जैनः कथमुपदिशति धर्मम् ? ॥ ९६ ॥

विधत्से किं शत्रून् युधि नरपते ! वक्ति कमला ?,
वराश्वीयं कीदृक् ? क्व च सति नृपाः स्युः सुमनसः ? ।

विहङ्गः स्यात्कीदृक् ? क्व रजति रमा पृच्छति हर-
प्रतीहारी ? भीरो किमिह कुरुषे ब्रूत मदनम् ? ॥ ९७ ॥

कीदृग्भाति नभो ? न के च सरुजां भक्ष्या ? नृपः पाति कं ?,
वादी पाशुपतो विवाद उदयद्दुःखः शिवं वक्ति किम् ? ।
निर्दम्भेति यदर्थतः प्रणिगदेद्रूपं विपूर्वाच्च तत्,
मीनातेः कमपेक्ष्य जायत इति क्त्वाप्रत्ययः पृच्छति ? ॥ ९८ ॥

स्मृत्वा पक्षिविशेषेण जग्धं कमपि पक्षिणम् ।
वृष्णिवंशोद्भवो लक्ष्मी-मप्राक्षीत् किं समोत्तरम् ? ॥ ९९ ॥

प्रपञ्चवञ्चनचणं, ध्यात्वा कमपि देहिनम् ।
विश्वम्भरा यदप्राक्षी-त्ततः प्राप तदुत्तरम् ॥ १०० ॥

जात्यतुरगाहितमतिर्लक्ष्मीपतिमप्सरो विशेषपतिः ।
यैर्वर्णैर्यदपृच्छत्तैरेव तदुत्तरं प्रापत् ॥ १०१ ॥

केन केषां प्रमोदः स्या-दिति पृच्छन्ति केकिनः ।
संगीतके च कीदृक्षाः, प्राह शम्भुर्न भान्ति के ॥ १०२ ॥

कश्चिद्दैत्यो वदति दनुजान् घ्नन् हरे ! किं किमाधाः ?,
शक्रात्प्राहुः पृथगुदधिजाकान्तवैवस्वतान्ताः ।
क्षिप्तः कश्चित् किल ललनया मन्मथोन्माथदुःस्थः,
सख्या चख्ये कथमथ मनःखेदविच्छेदहेतोः ॥ १०३ ॥

जननीरहितनरोद्भवलक्ष्मीः सितकुसुमभेदगतबुद्धिः ।
सध्रीचीं यदपृच्छत्तदुत्तरं प्राप तत एव ॥ १०४ ॥

देवीं कमलासीना-मन्तकचिरनगररक्षकः स्मृत्वा ।
यदपृच्छत्तत्रोत्तर-मवाप कालीयमानवपुरत्र ॥ १०५ ॥

सैन्याधिभूरभिषिषेणयिषुस्त्वदीयः,
किं किं करोति विजयी नृपते ! हठेन ? ।

कीदृक् च मन्मथवतः प्रतिभाति कान्ता,
पत्नीहितो वदति चेतसि कस्य पुंसः ? ॥ १०६ ॥

कीदृक्षा किं कुरुते, रतिसमये कुत्र गोत्रभिदि भामा ? ।
कस्मै च न रोचन्ते, रामा यौवनमदोद्दामाः ? ॥ १०७ ॥

सिन्धुः काचिद्वदति विदधे किं त्वया कर्म जन्तो ?,
यज्वा कस्मिन् सजति ? हरिणाः क्वोल्लसत्युद्विजन्ति ? ।
ब्रूते वज्रं पदमुपमितौ किं रविः पृच्छतीदं ?,
देहिन् ! बाधाभरविधुरितः कुत्र त्वं किं करोषि ? ॥ १०८ ॥

सन्तो कम्मि परम्मुहा ? घरमुहे सोहा कहिं कीरए ?,
रूढे कम्मि रसंति दुट्ठकरहा ? कम्मिं बहुत्तं ठियं ? ।
दिट्ठे कत्थ य दूरओ नियमणे कत्थुल्लसंते दुअं,
के मुंचंति धणुद्धर त्ति भणिरं मज्जायमामंतसु ॥ १०९ ॥

मिथ्याज्ञानग्रहग्रस्तैः, किं चक्रे क्व किलाङ्गिभिः ? ।
क्वाभीष्टे का भवेत्कीदृ-गिति जैन ! वद क्षितेः ॥ ११० ॥

भाद्रपदवारिबद्धं, सितशकुनिविराजितं वियद्वीक्ष्य ।
कं प्रश्नं सदृशोत्तर-मकष्टमाचष्ट विस्पष्टम् ॥ १११ ॥
भूरभिदधाति शरदिन्दुदीधितिः केह भाति पुष्पभिदा ? ।
प्रथमप्रावृषि वर्षति जलदे कः कुत्र संभवति ? ॥ ११२ ॥

*कीदृक्षः सन्निहपरभवे कीदृशः स्याद्धितैषी ?,*
कीदृक्का स्याद्वद गदवतामत्र दोषत्रयच्छित् ? ।
का कीदृक्षा पुरि न भवतीत्याहतुर्वारिभृङ्गौ ?,
कीदृश्यो वा कुवलयदृशः कामिनः कीदृश स्युः ? ॥ ११३ ॥

मुदा श्रयति कं ब्रूते, वर्णः कोऽपि सदैव का ? ।
ध्वान्तेऽन्ययाऽन्वितं वीक्ष्य, प्राहोमा किं हरं रुषा ? ॥ ११४ ॥

भूमी कत्थ ठिया भणेइ गणिया ? रन्नो पहुत्तं कहिं ?,
केली कत्थ करेसि किं हरिणहे दिट्ठे ? कहिं तक्खणं ? ।
आमंतेसु करेणुअं पभणए नक्खत्तलच्छी कहिं ?,
लोआ बिंति कयत्तणं ? भण कहिं मुद्धे धरेमो मणं ॥ ११५ ॥

किं कुरुषे कौ जन्तो ?, विष्णुः प्राह क्व कर्मविवशस्त्वम् ? ।
का क्रियमाणा कीदृक् ?, कुत्र भवेद्वक्ति करवालः ? ॥ ११६ ॥

कपटपटुदेवतार्चां, बुद्धिप्रभुतोद्भवो नरःस्मृत्वा ।
समवर्णवितीर्णोत्तर-मकष्टमाचष्ट कं प्रश्नम् ? ॥ ११७ ॥

भृङ्गः प्राह नृपः क्व रज्यति बत ? स्थैर्यं न कस्मिन् जने ?,
युद्धं वक्ति दुरोदरव्यसनिता कुत्र ? क्व भूम्ना गुणाः ? ।
कस्मिन् वातविधूनिते तरलता ब्रूते सखी कापि मे ?,
क्वोद्गच्छत्यभि वल्लभं विलसतोऽसङ्कोचने लोचने ? ॥ ११८ ॥

कीदृक्षमन्तरिक्षं स्या-न्नवग्रहविराजितम् ? ।
हनूमता दह्यमानं, लङ्कायाः कीदृशं वनम् ? ॥ ११९ ॥

श्रुतिसुखगीतगतमनाः, श्रीसुतबन्धनवितर्कणैकरुचिः ।
प्रश्नं चकार यं किल, तदुत्तरं प्राप तत एव ॥ १२० ॥

स्मरगुहराधेयान् किल, दृष्ट्वाऽग्रेऽङ्गारशकटिकाऽपृच्छत् ।
किं शत्रुश्रुतिमूलं, प्रश्नाक्षरदत्तनिर्वचनम् ॥ १२१ ॥

जन्तुः कश्चन वक्तिका क्व रमते ? प्रोचुः कचान् कीदृशान्,
ब्रह्मादित्रयमत्र कः कृशयति ? क्वेडागमः स्याज्जनैः ? ।
किं वाऽनुक्तसमुच्चये पदमथो धातुश्च को भर्त्सने ?,
किं सूत्रं सुधियोऽध्यगीषत बुधा विश्रान्तविद्याधराः ? ॥ १२२ ॥

याञ्चार्थविततपाणिं, द्रमकं स्मृत्वा सदर्थलोभेन ।
यैर्वर्णैर्यदपृच्छत्तैरेव तदुत्तरं लेभे ॥ १२३ ॥

मानं कुत्र ? क्व भाण्डे नयति ? लघु(सु)धामासिरहानुकम्पा ?,
शैत्यं कुत्र ? क्व लोको न सजति ? तुरगः क्वार्च्यते ? क्व व्यवस्था ? ।
श्रीर्ब्रूते मुत् क्व पुंसां ? क्व च कमलतुला ? मूलतः क्वाशुचित्वं,
कस्मै सर्वोऽपि लोकः स्पृहयति पथिकैः सत्पथे किं प्रचक्रे ? १२४

किं चक्रे रेणुभिः खे ? क्व सति निगदति स्त्री रतिः क्वानुरक्ता ?,
क्वाक्रोधः ? कूरताऽत्र क्व च वदति ? जिनः कोऽपि लक्ष्मीश्च भूश्च ।
विष्णुस्थाण्वोः प्रिये के ? परिरमति मतिः कुत्र नित्यं मुनीनां ?,
किं चक्रे ज्ञानदृष्ट्या ? त्रिजगदपि मयेत्याह कश्चिज्जिनेन्द्रः॥ १२५ ॥

किमकृत कुतोऽचलक्रमविक्रमनृप आह सुभगतामानी कश्चिदलं स्वम् ।
कस्मै स्त्रीणां किं चक्रे का कस्मात्कस्य वद मत्कुण मम त्वम् ?

पाता वः कृतवानहं किमु ? मृगत्रासाय कः स्याद्वने ?,
कोऽध्यास्ते पितृवेश्म ? कः प्रमदवान् ? कः प्रीतये योषिताम् ? ।
हृद्यः कः किल कोकिलासु ? करणेषूक्तः स्थिरार्थश्च को ?,
दृष्टे क्व प्रतिभाति को लिपिवशाद्वर्णः ? पुराणश्च कः ? १२७

लङ्केश्वरवैरिवैष्णवाः केऽप्याहुः प्रीतिरकारि केन केषाम् ? ।
किमकृत कं विक्रमासिकालः ? क्ष्माधरवारुणबीजगाव आख्यन्१२८

प्राहरविर्मद्विरहे, कैस्तेजःश्रीः क्रमेण किं चक्रे ? ।
कीदृशि च नदीतीर्थे, नावतितीर्षन्ति हितकामाः ? ॥ १२९ ॥

स्थिरसुरभितया ग्रीष्मे, ये रागिष्ठा विचिन्त्य तान्प्रश्नम् ।
यं चक्रे करिपुरुष-स्तदुत्तरं प्राप तत्रैव ॥ १३० ॥

प्रणतजनितरक्षं कीदृगर्हत्पदाब्जं ?,
वदति विगलितश्रीः कीदृशं कामिवृन्दम् ? ।
प्रणिगदति निषेधार्थं पदं तन्त्रयुक्त्या,
कृतिभिरभिनियुक्तं किं किलाहं करोमि ? ॥ १३१ ॥

दम्पत्योः का कीदृक्के कं भेजुरिति सुनृपते ! ब्रूहि ? ।
मुक्ताः कयाद्रियन्ते, वदत्यापाच्यश्च मदनध्रुक् कीदृक् ? ॥ १३२ ॥

ते (के) कीदृशाः क्व कृतिनो ? व्यञ्जनमाह रिपवोऽनमन् कस्मै ? ।
कां पातीन्द्रः पट्टो ब्रवीति ? कीदृक् क्व भूः प्रायः ? ॥ १३३ ॥

वर्षाः शिखण्डिकलनादवतीर्विचिन्त्य, शैलाश्चवक्त्रदहनाक्षरवावदूकान्
लक्ष्मीश्च नष्टमदनश्च समानवर्णदत्तोत्तरं कथय किं पृथगुक्तवन्तौ ?१३४

संबोधयार्धमहिमांशुकरैः स्वभावं,
कुर्वे कि(क)मित्यभिदधाति किलार्द्रभावः ? ।
क्षान्तिं वद प्रहरमाह्वय पृच्छ पुच्छं,
ब्रूयास्तनूरुहमुदाहर मातुलं च ॥ १३५ ॥

किं कुर्यां हरिभक्तिमाह कमला कुत्र च्युते चाटुभिः ?,
कीदृक्षे किल शुक्लशुक्लवचसी कश्चित्खगं प्राहतुः ? ।
ज्ञानं कीदृशि मोहभूरुहि भवेदिभ्यैः क्व चारुह्यते ?,
वक्त्यार्किः क्व चुरा चकास्ति विमले कस्मिन्सरोजावली ?॥ १३६ ॥

किं कुरुथः के कीदृशकौ, वामलसौ पृच्छति तनूरुहरोगः ।
छेत्तुमवाञ्छन् वरभारामं, केनाप्युक्तः कोऽपि किमाह ॥ १३७ ॥

का कीदृक्षा जगति भविनां वक्ति मृत्यूग्ररोगः ?,
शोचत्यन्तः किल विधिवशात्कीदृगित्युत्तमा स्त्री ? ।
गम्भीराम्भःसविधजनता कीदृशी स्याद्भयार्ता ?,
ब्रूते कोऽपि स्मरपरिगतोऽरक्षि का भूरिभूपैः ? ॥ १३८ ॥

सान्त्वं निषेधयितुमाह किमुग्रदण्डः ?,
स्वामश्रियं वदति किं रिपुसाच्चिकीर्षन् ? ।
नम्रःस्थिरो गुरुरिहेति वदन् किमाह ?,
ये घ्नन्ति शत्रुकमलां किल ते किमूचुः ? ॥ १३९ ॥

का स्त्री ताम्यति कीदृशा स्वपतिना ? विद्या सदा किंविधा ?,
सिध्येद्भक्तिमतोऽथ लोकविदिता का कीदृगम्बा च का । ?
किम्भूतेन भवेद्धनेन धनवान् सांख्येन पुंसेष्यते ?,
कीदृक्षा प्रकृतिर्वसन्तमरुतोत्कण्ठा भवेत् कीदृशा ? ॥ १४० ॥

केष्टा विष्णोर्निगदति गदः प्राह सव्येतरोऽथ,
श्रीरुद्राण्योः कथयत समाहारसंबोधनं किम् ? ।
प्राहर्जुः किं जिगमिषुमिनं वक्ति कान्ताऽनुरक्ता,
सान्त्वं धूम्रं प्रहरमपि संबोधयानुक्रमेण ॥ १४१ ॥

भण केन किं प्रचक्रे, नयेन भुवि कीदृशेन का नृपते ? ।
काः पृच्छति तरलतरः, के यूयं किं कुरुत सततम् ? ॥ १४२ ॥

लोके केन किलाऽऽपि कान्तकविता ? कीदृग्महावंशजा,
श्रेणिः ? श्रीसुरयाज्ञिकेन्द्रियजया बोध्याः समाहारतः ।
हे दुष्प्रव्रजितप्रदानक कुतः का पात्रदात्रोर्भवेत् ?,
कीर्तिर्यस्य किलोत्तरं तमखिलं प्रश्नं सुरायै वद ॥ १४३ ॥

तमालव्यालमलिने, कः क्व प्रावृषि सम्भवी ? ।
आख्याति मूढः क्वारूढै-निस्तीर्णस्तूर्णमर्णवः ? ॥ १४४ ॥

ध्वान्तं ब्रूतेऽर्हतां का ? तृणमणिषु खगः कश्चिदाख्याति केन ?,
प्रीतिर्मेऽथाह कर्म प्रसभकृतमहो दुर्बलः केन पुष्येत् ? ।
कामधुग्वक्ति कात्र प्रजनयति शुनो युद्धहृत्पूर्वलक्ष्मीः ?,
सत्तासन्दिग्धबुद्धिः कथमथ कृतिभिः शश्वदाश्वासनीयः ॥ १४५ ॥

किमभिदधौ करभोरुं, सततगतिं किल पतिः स्थिरीकर्तुम् ? ।
जननी पृच्छति विकचे, कस्मिन् सन्तुष्यते भ्रमरः ? ॥ १४६ ॥

प्राधान्यं धान्यभेदे क्व ? कथयति वयः कीदृशी वायुपत्नी ?,
नक्षत्रं वक्ति कुर्वे किमहमिनमिति प्राह शस्त्रोपजीवी ? ।

ब्रूहि ब्रह्मस्वरं च क्षितकमभिगद प्रोल्लसल्लीलमञ्जू-
ल्लापामामन्त्रय स्त्रीं, क्व सजति न जनः प्राह कोऽप्यम्बुपक्षी॥ १४७ ॥

कीदृक्षं लक्ष्मीपतिहृदयं ? कीदृग्युगं रतिप्रीत्योः ? ।
कः स्तूयतेऽत्र शैवैर्गुणवृद्धी वाऽञ्झलौ कस्य ? ॥ १४८ ॥

कुत्र प्रेम ममेति पृच्छति हरिः ? श्रीराह कुर्यां प्रियं,
किं प्रेम्णोहमहो गुणाः कुरुत किं यूयं गुणिन्याश्रये ? ।
किं कुर्वेऽर्च्यमहं ? प्रगायति किमुद्गाताह सीरायुधः ?,
किं प्रेयः प्रणयास्पदं स्मरभवः पर्यन्वयुङ्क्तमयम् ? ॥ १४९ ॥

विकरुण ! भण केन किमाधेया ?, का रज्यते च केन जनोऽयम् ? ।
कार्या च का वाणिज्या ?, का धर्मे नेष्यते ? कयाऽरञ्जि हरिः ?१५०

काः कीदृशीःकुरुध्वे किं ?, तोषाग्निनिर्षयो यूयम् ।
किमहं करवै मदनभयविधुरितः कान् कया कथय ? ॥ १५१ ॥

कृषीवलः पृच्छति कीदृगार्हतः ?, क्व केन विद्वानुपयाति हास्यताम् ? ।
सुरालयक्रीडनचञ्चुरुच्चकैश्च्युतिक्षणे शोचति निर्जरः कथम् ? ॥ १५२

कं कीदृक्षं स्पृहयति जनः शीतवाताभिभूतः ?,
कश्चिद्वृक्षो वदति पलभुग्मांससक्ते क्व रज्येत् ? ।
हेतुर्ब्रूते परिवहति का स्थूलमुक्ताफलाभां ?,
यव्यक्षेत्रक्षितिरिह भवेत्कीदृगित्याह काकः ? ॥ १५३ ॥

श्रीचित्ते प्रियविप्रयोगदहनोऽहं कीदृशे किं दधे ?
प्रेम्णा किं करवाण्यहं हरिपदोः पप्रच्छ लक्ष्मीरिति ? ।
कस्मै चिक्लिशुरङ्गदादिकपयः ? क्वानोकहे नम्रता ?,
कस्मै किं विदधीत भक्तविषयत्यागादिकर्माऽर्हतः ? ॥ १५४ ॥

हिमवत्पत्नी परिपृच्छति कः, कीदृक् कीदृशि कस्याः कस्मिन् ? ।
केन न लभ्या नृसुरशिवश्रीरित्याख्यत्किल कोऽपि जिनेन्द्रः ? १५५

तणजलतरुपुन्नं वाहसुन्नं पि रन्नं, भण हरिणकुलाणं केरिसं केरिसं नो ?
प्रलयपवनवेगप्रेरणात् कीदृशेऽब्धौ, सततततदधिवासं व्यूढमैक्षं तकं वा?

को धर्मः स्मृतिवादिनां ? दधति के द्विःसप्तसंख्यामिह ?,
प्रार्थ्यन्ते च जनेन के भवभवाः? पुंसां श्रियः कीदृशः ? ।
के वाऽभ्रङ्कषकोटयः शिखरिणां रेजुस्तथा कांश्चन,
श्रीरस्मानजनिष्ट नाङ्गजमिति प्रोक्तान् वदेत्किं स्मरः ? ॥ १५७ ॥

पाके धातुरवाचि कः ? क्व भवतो भीरो ! मनः प्रीतये ?,
सालङ्कारविदग्धया वद कया रज्यन्ति विद्वज्जनाः ? ।
पाणौ किं मुरजिद्बिभर्ति ? भुवि तं ध्यायन्ति वा के सदा ?,
के वा सद्गुरवोऽत्र चारुचरणश्रीसुश्रुता विश्रुताः ? ॥ १५८ ॥

कः स्यादम्भसि वारिवायसवति ? क्व द्वीपिनं हन्त्ययं ?,
लोकः (कं) ? प्राह हयः प्रयोगनिपुणैः कः शब्दधातुः स्मृतः ? ।
ब्रूते पालयिताऽत्र ? दुर्धरतरः कः क्षुभ्यतोऽम्भोनिधे- ?
ब्रूहि श्रीजिनवल्लभस्तुतिपदं कीदृग्विधाः के सताम् ? ॥ १५९ ॥

प्रत्येकं हरिधान्यभेदशशिनः पृच्छन्ति किं लुब्धक ?,
त्वं प्रासं कुरुषे मृगव्रजमथो खादद्गृहीताऽवदत् ।
कीदृग्भाति सरोऽर्हतश्च सदनं ? किं चाल्पधीर्नाप्नुवन्,
पृष्टः प्राह ? तथा च केन मुनिना प्रश्नावलीयं कृता ? ॥ १६० ॥

किमपि यदिहाश्लिष्टं क्लिष्टं तथा विरसं क्वचित्,
प्रकटितमथाऽनिष्टं शिष्टं मया मतिदोषतः ।
तदमलधिया बोध्यं शोध्यं सुबुद्धिधनैर्मनः,
प्रणयविशदं कृत्वा धृत्वा प्रसादलवं मयि ॥ १६१ ॥

अज्ञातकर्तृकम्

# ॥ दृष्टान्तशतकम् -१ ॥

तेजोऽत्युग्रमपि द्रव्या-भावे पुंसां प्रणश्यति ।
वह्निश्चण्डप्रतापोऽपि भस्म स्यादिन्धनक्षये ॥ १ ॥

वृद्धानामथावज्ञा स्यादत्यासन्नापदामिह ।
पूर्णोऽथारात्कलपा(पे)तो राकेन्दुः केन वन्द्यते ॥ २ ॥

सापवादः समृद्धोऽपि प्रायोऽवज्ञायते जने ।
पूर्णेन्दुः किं तथा वन्द्यो निकलङ्को यथा कृशः ॥ ३ ॥

सत्कृत्यस्तोकमस्तोकं प्रार्थ्यतेऽतिनवः प्रभुः ।
नवेन्दुः पोतभक्तानि तन्तुनाभ्यर्च्य याच्यते ॥ ४ ॥

सर्वस्य मुष्यतेऽवश्यं परपीडाकृतोऽर्जितम् ।
मन्थान्म्रक्षणमुद्घृष्य गृह्यते दधिमन्थकात् ॥ ५ ॥

श्रीमतां दम्पतीधर्मे नेर्ष्या कापि परस्परम् ।
श्रीपतिर्यो पिकासक्तो मूर्षासक्ता हरिप्रिया ॥ ६ ॥

श्रीमतादृतमश्रेष्ठमपि श्रेष्ठं न दुःस्थितैः ।
शङ्खोर्व्यः श्रीपतेः पाणौ कपालं न कपालिनः ॥ ७ ॥

छद्मात्तं महतां वित्तं याति प्राणैः समन्वितम् ।
विदार्योदरमाकृष्टा वेदाः शङ्खस्य विष्णुना ॥ ८ ॥

केचित्पिबन्ति पानीयमपि नारीनिरूपितम् ।
दशामुखार्पितं पश्य प्रदीपः स्नेहमश्नुते ॥ ९ ॥

कस्याप्यशर(सदृ)शोऽपि स्याद्रामासौभाग्यमद्भुतम् ।
स्वाङ्गे निवेश्यते स्त्रीभिरातन्यतेऽन्यकञ्चुकः ॥ १० ॥

वीरस्यापि वणिक्सार्थे क्षुद्रात् भवति गञ्जना ।
शूरोऽपि सोमपार्श्वस्थो राहुणा गिलितो न किम् ॥ ११ ॥

अशस्त्रोऽपि वणिग्विप्रौ विद्रवेत् क्षत्रियः क्षमः ।
अबाहुरपि राहुः स्यात् चन्द्रार्कग्रसनप्रभुः ॥ १२ ॥

वीरे शस्त्रं न वा मूर्त्तिः स्फूर्त्तिरिव समीक्ष्यते ।
पश्य पुष्पैरनङ्गेन निर्जिता जगतां त्रयी ॥ १३ ॥

निष्फलं बलमङ्गानां प्रायेण क्रूरसङ्गरे ।
न नाशाय न युद्धाय बाहोः(?) पादाः करा रवेः ॥ १४ ॥

गीयन्ते वीर्यवन्तस्ते ये रणे न पराङ्मुखाः ।
भुजा एव बलख्याताः पतद्वतो(द्वन्तो)ऽभिसम्मुखाः ॥ १५ ॥

अद्भुताभ्युदयं दद्युर्वृत्तवन्तः पुरस्कृताः ।
बिन्दुरग्रे कृतोऽङ्कानां दत्ते दशगुणोन्नतिम् ॥ १६ ॥

अन्तःशून्यानुगैः स्वामी जीवन्नपि मृतायते ।
सकलोऽथ प्रमाणाङ्को बिन्दुना पृष्ठगामिना ॥ १७ ॥

उद्वेजितोऽपि सद्वृत्तः कालमुख्यं बिभर्त्ति न ।
वर्णोज्ज्वलधरो नित्यं भुज्यमानोऽपि पर्प्पटः ॥ १८ ॥

सद्वृत्तो दण्ड्यतेऽथाऽऽरात् छिद्रीप्राप्तोऽपि मुच्यते ।
वारिहारिघटीं त्यक्त्वा ताड्यते तटझल्लरी ॥ १९ ॥

कृतेऽपि दोषे सद्वृत्तः सारमादाय मुच्यते ।
रिक्तीकृत्य घटी वारिहारिणी स्थाप्यते पुनः ॥ २० ॥

छिन्ने मूर्धनि वीराणां धावत्यारभटं धटम् ।
रुद्रनेत्राग्निदग्धाङ्गोऽथ(था)नङ्गोऽद्यापि जृम्भते ॥ २१ ॥

आसक्तिं कुरुते नीचेऽलं पाकमिलितः प्रभुः ।
रसमिश्रं लगत्याशु किं न स्वर्णमुदम्बरे ॥ २२ ॥

दद्यान्मानं प्रभुर्भृत्ये व्यापारभारमर्प्पयन् ।
सूर्यः कुर्यात्कलान्यासं तमोनाशकृतेऽनले ॥ २३ ॥

राजसंसदि न द्वेष आजन्मद्वेषिणामपि ।
एकवासो भवेत् राजमुद्रायामक्षर-श्रियोः ॥ २४ ॥

परस्वाम्ये(म्य)पि तेजस्वी क्षुद्रात् रक्षत्युपद्रवात् ।
ब्रध्नो विध्वंसते ध्वान्तमन्यवारदिनेन किम् ॥ २५ ॥

अलीकोक्त्या महान्तोऽपि विमुच्यन्ते प्रतिष्ठया ।
मिथ्योक्ते स शिरःस्पर्शादपूज्यो भुवि पद्मभूः ॥ २६ ॥

महतां नामतोऽपि स्यात् क्षुद्रोपद्रवविद्रवः ।
किमगस्तिस्मृतेरेव नाहारार्त्तिः प्रणश्यति ॥ २७ ॥

लक्ष्मीः पीडासहिष्णूनाम् ........................ ॥ २८ ॥

मानम्लानमपीच्छन्ति केचन स्वार्थपूरिताः ।
सहेतास्यरजःक्षेपं कुतपो रससंभृतः ॥ २९ ॥

रिणमत्यर्थमप्यङ्गीकुर्यात्सर्वोऽपि दुर्बलः ।
क्षीणेन्दुरीहते पोतभक्तवृद्ध्या दशाञ्जनात् ॥ ३० ॥

महतामप्यवज्ञा स्यात् वेषस्याडम्बरं विना ।
अब्धिमन्थेऽर्धचन्द्रोऽभूदीशेऽपि कृत्तिवाससि ॥ ३१ ॥

*स्फूर्जयन्त्युद्भूतस्फूर्तिं विना* मृत्युं न केचन ।
कोटिवेधी भवेत् सर्व-धातूनां पारदोऽमृतः ॥ ३२ ॥

परप्राणपरित्राणं स्वप्राणैः केऽपि कुर्वते ।
लवणं क्षिप्यते वह्नौ परदोषोपशान्तये ॥ ३३ ॥

दुष्टसंचेष्टिते शिष्टे शिष्टः स्याददतिदुःखितः ।
सविषाणीक्ष्य भक्ष्याणि चकोरः किं न रोदिति ॥ ३४ ॥

स्त्रीणामपि सशास्त्राणां परचर्चाकृतौ रतिः ।
साक्षरा सर्ववस्तूनां मानमुन्मानयेत्तुला ॥ ३५ ॥

स्वार्थसंसिद्धये देया महत्ताऽतिलघोरपि ।
तृणाय पाणी युज्येते भक्तान्ते दन्तशुद्धये ॥ ३६ ॥

कुटिलस्य श्रियः प्रायो जायन्ते कष्टवेष्टिताः ।
विना वेधव्यथां कर्णैः स्वर्णांशोऽपि न लभ्यते ॥ ३७ ॥

उद्वेगकारिणः क्रूराः सह संवासिनामपि ।
एकास्यस्थाः समीहन्ते दशना रसनाग्रहम् ॥ ३८ ॥

मलिनान्निर्मले नाशो निर्मलात् मलिने गुणः ।
पूणिकागुणकृत्तर्कोस्तर्कुस्तस्याः क्षयङ्करी ॥ ३९ ॥

अकर्म्मण्यपि मर्मज्ञे विफलो विक्रमश्रमः ।
लब्धच्छिद्राणि सिक्थानि चर्व्यन्ते न रदैरपि ॥ ४० ॥

नीचोऽपि स्फूर्तिविख्यातः सेव्यः श्रेष्ठोऽपि नापरः ।
तोषरोषक्षमाः ख्याताः पादा वन्द्यास्तु नो शिरः ॥ ४१ ॥

दुष्टपुत्राचरणतः पितुः स्यान्मानमर्दना ।
कस्य न क्षालयत्यंह्रीन् पङ्कविच्छुरितान् पयः ॥ ४२ ॥

समारचयति प्रायो पिता पुत्रविनाशितम् ।
जलेन क्षाल्यते सर्वं पङ्केन मलिनीकृतम् ॥ ४३ ॥

दुष्टः प्रविष्टमात्रोऽपि विपाटयति शिष्टहृत् ।
सौवीरान्तर्गते क्षीरे विशीर्यंत सहस्रधा ॥ ४४ ॥

परि(र)वित्तव्ययं वीक्ष्य खिद्यन्ते नीचजातिकाः ।
न शुष्यति यवासः किं वारि व्ययति वारिदे ॥ ४५ ॥

महान्तो ये महान्तस्ते परैश्चेदपमानिताः ।
अहो मुखे मिखी(सी)दानादपि दृष्टिः प्रसीदति ॥ ४६ ॥

आस्तां सचेतने रागो दुःखं निश्चेतनेऽपि तत् ।
खण्डनक्षारनिक्षेपपदक्षोदैः कुसुम्भवत् ॥ ४७ ॥

गुणी श्लाघ्यः सरागोऽपि पर्यन्ते यदि रागमुक् ।
श्वेताञ्चलं हि कौसुम्भोत्तरीयवसनं श्रिये ॥ ४८ ॥

विना पुंसः स्त्रिया कर्म्म साध्यते साधु न क्वचित् ।
रसना दशनाभावे किं जल्पति किमत्ति च ॥ ४९ ॥

कार्याकार्याय कस्मैचिद्वक्रता सरलैरपि ।
जह्रुतां वस्तुनो वेत्ति किं चक्रुः कोणनां विना ॥ ५० ॥

वरं सा निर्गुणावस्था यस्यां कोऽपि न मत्सरः ।
गुणयोगेऽपि वैमुख्यं विश्वस्यापि प्रसूनवत् ॥ ५१ ॥

हृदयान्तर्गुणान् धत्ते कोऽपि केसरपुष्पवत् ।
बहिः कृतगुणो भूयान् दृश्यतेऽथ प्रसूनवत् ॥ ५२ ॥

सन्ततौ लक्षसङ्ख्यायामेक एव विराजते ।
तद्विहीनस्थितैरङ्कैः शून्यता प्राप्यतें ध्रुवम् ॥ ५३ ॥

लब्धे सहायमात्रेऽपि विक्रामन्ति महौजसः ।
विघ्नाली दलयत्याखुवाहनोऽप्याखुवाहनः ॥ ५४ ॥

गुणी लघुरपि स्तुत्यः सुमहानपि नागुणी ।
यथेक्षुपर्वणः श्लाघा लघोः स्यान्नालघोस्तथा ॥ ५५ ॥

स्थानं सर्वस्य दातव्यमेक ........................... ॥ ५६ ॥

धटमप्यङ्गवगूहन्ति रङ्गतस्त्यागिनः(?) स्त्रियः ।
अमूर्द्धापि न किं श्रीदः(द-) कञ्चुकः स्त्रीहृदा धृतः ॥ ५७ ॥

यावन्न स्वार्थसंसिद्धिस्तावदेव सुहृज्जनः ।
फलमारामिकः प्राप्य पश्य रम्भा निशुम्भति ॥ ५८ ॥

सुवृत्तः सुगुणः सोढा परार्थेऽनर्थमात्मनि ।
अन्तर्भूय पुयः स्फारघातादवति देहिनम् ॥ ५९ ॥

गुणिनोऽपि गुणाधानं कदापि स्यादवस्तुतः ।
विनाम्लतक्रनिक्षेपान्न दुग्धं दधि जायते ॥ ६० ॥

दृश्यते महतां पङ्क्तौ जनैस्तुच्छोऽपि कार्यतः ।
किं न विन्यस्यते दक्षैर्नाणकान्तः कपर्दिका ॥ ६१ ॥

षण्ढेऽप्यर्थप्रदे पुंसि ध्रुवं रज्यन्ति योषितः ।
नपुंसकमिदं श्रीदं दृष्ट्या कज्जलमादृतम् ॥ ६२ ॥

समं भर्त्रा कुलीनस्त्री सुखदुःखे विगाहते ।
वृद्धिं वित्प(प)दमप्येति नदेन सह पद्मिनी ॥ ६३ ॥

दुर्जनैर्दूषिता राजत्यधिकं काव्यपद्धतिः ।
लूकाझलकितं चूतं युज्यते पाकसम्पदा ॥ ६४ ॥

प्रथमं स एव साध्यो यद्बलतो रिपुरुपद्रवं कुरुते ।
दशवदननिधनमतिना रघुपतिना जलनिधिरबन्धि ॥ ६५ ॥

ईषल्लघुप्रवेशोऽपि स्नेहविच्छ(च्छि)त्ति पण्डितः ।
कृतक्षोभो नरीनर्ति खलो मन्थानदण्डवत् ॥ ६६ ॥

........रसायनं यस्याः प्रयोगे पूर्वपुरुषाः ।
मृता जीवन्ति जीवन्तः पुनः स्युः कीर्तिपीवराः ॥ ६७ ॥

महानर्थाय महतामप्यसाधुसमागमः ।
पश्य रावणसंसर्गात् बन्धमाप पयोनिधिः ॥ ६८ ॥

स्वान्ययोरुपकारी स्याद् ध्रुवं नीचः सदाश्रयः ।
वर्णाश्रया सखी स्वं च पत्रं च कुरुतेऽर्चितम् ॥ ६९ ॥

लक्ष्मीरसायनाभावे ये मृताः खलु ते मृताः ।
ये जीवन्ति पुनस्ते स्युर्जीवन्मृतसहोदराः ॥ ७० ॥

सदलाभे कलौ काले श्रीः खेलति खलेषु यत् ।
ततो मन्ये निराधारा न नारी वर्तितुं क्षमा ॥ ७१ ॥

कठोरमपि सौख्याय प्रस्तावोच्चरितं वचः ।
याने वामखराराव: शिवायारतिकार्यपि ॥ ७२ ॥

सदा सौख्यकरं क्वापि माधुर्यमपि वर्ज्यते ।
अरतिं कुरुते वीणा रणरङ्गाङ्गणे न किम् ॥ ७३ ॥

विना भाग्यं वरं वस्तु वृद्धत्वे नोपलभ्यते ।
अब्धिमन्थोत्थरत्नेषु भिक्षैवासीत् पितामहे ॥ ७४ ॥

प्रायः श्रिया वृतं वस्तु लभते भुवि गौरवम् ।
श्रीवृक्षपर्णमालेव तोरणे मङ्गलप्रदा ॥ ७५ ॥

प्रायः पुसां धनोन्मानात् हृदयोष्मा प्रवर्तते ।
धूमरेखाप्रस्तरः स्यात् वह्नेरिन्धनमानतः ॥ ७६ ॥

साकारोऽपि सुवृत्तोऽपि निर्द्रव्यः क्वापि नार्घति ।
व्यक्ताक्षरः सुवृत्तोऽपि द्रम्मः कूटो विवर्ज्यते ॥ ७७ ॥

इन्दिरानादृते यान्ति विदा एव कलङ्कताम् ।
अश्रीदृष्टो भवेद् द्रम्मः साक्षरो बाह्यटङ्कितः ॥ ७८ ॥

समाश्रयन्ति सर्वेऽपि .................................. ॥ ७९ ॥

अत्यासक्तस्य मूर्द्धानमधि .............................. ॥ ८० ॥

सदोषपत्यसंयोगे मोदते ............................ ॥ ८१ ॥

सदा सर्वस्वदा शक्ता स्थानस्थेऽपि प्रिये प्रिया ।
किं न प्रावृषि वृक्षस्थं बकी भोजयते बकम् ॥ ८२ ॥

बाह्यानुरागिणां रागो नाम चापदि नश्यति ।
मुशलो(ले) खण्डनाच्छालिरामशालित्वमुज्झति ॥ ८३ ॥

अनुरक्तं स्त्रियामाग्र्यं सदा देयं शिवार्थिनाम् ।
भानुरभ्युदयाकाङ्क्षी कुर्यादग्रेसरीं प्रभाम् ॥ ८४ ॥

पुरुषेण न मोक्तव्या निराशीकृत्य योषितः ।
त्यजेत्प्रकृतिमात्मापि क्षिप्त्वास्ये रत्नपञ्चकम् ॥ ८५ ॥

तेजस्विनोऽपि नारीभ्यः क्षतिः पुंस्त्वस्य जायते ।
कणिक्काश्रितदीपस्य दीपिकेति किल श्रुतिः ॥ ८६ ॥

आत्मानं प्रकाशयेत् विद्वान् मा निष्पन्नप्रयोजनः ।
राहुर्गृहीतचन्द्रार्को दृश्यते दिवि नान्यदा ॥ ८७ ॥

भ्रष्टप्रतिष्ठः किल साधुलोकः प्राप्तप्रतिष्ठस्तु कलौ खलौघः ।
ततः खलौघैः खलु खेलति श्रीः कालोचितं केऽपि विचारयन्ति ८८

गुरुः सुवृत्तः पूर्णोऽपि स्याददानादधो घटः ।
लघुः काणोऽपि कुब्जोऽपि दानादुपरि कर्करी ॥ ८९ ॥

महोत्सवोऽथ पुण्यानां विपदे न मुदे भवेत् ।
सर्वानन्ददीपाल्यां सूर्प्पकं ताडयेज्जनः ॥ ९० ॥

मार्यमाणः सुवृत्तोऽपि परमर्माणि भाषते ।
वारिहारिघटीदोषताडिताऽऽख्याति झल्लरी ॥ ९१ ॥

आपद्गतोऽपि संदृष्टः कुलीनः परसौख्यदः ।
मृन्मङ्गलाय मार्गे स्यात् खरारूढापि सम्मुखी ॥ ९२ ॥

अकार्यकार्यपि त्यागी महामहिमभूर्भवेत् ।
स्तुत्यो भागेऽपि कन्याया वर्षन् हस्तेन भानुमान् ॥ ९३ ॥

निर्लक्षणः क्षणाल्लक्ष्मीमाश्रयस्यापि लुम्पति ।
पतन्कपोतः कुरुते शाखाशेषं हि शाखिनम् ॥ ९४ ॥

लक्ष्मीभवानि तेजांसि ............................ ॥ ९५ ॥

विशीर्यन्ते कदर्यस्य श्रियः पातालपक्त्रिमाः ।
अगाधमन्धकूपस्य पश्य शैवलितं पयः ॥ ९६ ॥

परे पाण्डुरितं हन्तुम् ................................ ॥ ९७ ॥

मूर्खस्य मुखमीक्षन्ते क्वापि कार्ये विचक्षणाः ।
विना निकषपाषाणं को वेत्ति स्वर्णवर्णिकाम् ॥ ९८ ॥

विभवे विभवभ्रंशे सैव मुद्रा महात्मनाम् ।
अब्धौ सुरात्तसारेऽपि न मर्यादाविपर्ययः ॥ ९९ ॥

सेवितोऽपि चिरं स्वामी विना भाग्यं न तुष्यति ।
भानोराजन्मभक्तोऽपि पश्य निश्चरणोऽरुणः ॥ १०० ॥

# ॥ दृष्टान्तशतकम्–२ ॥

देवा भाग्यवतां पक्षे प्रायो धार्मिकलोकतः ।
चक्रे कोणिकसान्निध्यं चेटकस्य न कौशिकः ॥ १ ॥

रक्षकेष्वपि देवेषु क्रूरकर्म्म विजृम्भते ।
श्रुत्योः कीलव्यथाः वीरः सेहे किं न सुरार्चितः ॥ २ ॥

स्पर्द्धया धर्मकृत्यानि महान्तोऽपि प्रकुर्वते ।
दृष्ट्वा दशार्णभद्रर्द्धिमिन्द्रोऽप्यागात् तथा जिनम् ॥ ३ ॥

व्यापत्तापे कृपास्नेहौ महतामपि नश्यतः ।
कान्तां तथा हि कान्तारे राज्यभ्रंशे नलोऽत्यजत् ॥ ४ ॥

महतामप्यहो राज्यतृष्णा मुष्णाति सन्मतिम् ।
स्वभ्रातुर्भरतोऽप्युच्चैश्चक्रं चिक्षेप सन्मुखम् ॥ ५ ॥

वैराग्यं जनयत्याशु बन्धुजा विक्रिया सताम् ।
बुद्धो बाहुबलिर्बुद्ध्वा भ्रातरं भ्रान्तसन्मतिम् ॥ ६ ॥

दृष्ट्वा बलवती पुष्टिमल्पोऽप्यारभते महत् ।
ययौ किं चमरो नेन्द्रसभां श्रीवीरनिश्रया ॥ ७ ॥

कोपाटोपात्कृतेऽप्यार्थे विमृशन्ति महाधियः ।
संजहार पविं शक्रो सुरं ज्ञात्वा जिनाद् दृढम् ॥ ८ ॥

अदत्तेऽपि फलं भावाद्विफलं भाववर्जितम् ।
नवश्रेष्ठि(ष्ठी) ददौ दानं जीर्णस्तु फलभागभूत् ॥ ९ ॥

क्षान्त्या तुष्यन्ति तत्त्वज्ञास्तपसापि न तां विना ।
हित्वा सेर्ष्यान् मुनीन् देव्या नेमे क्षान्तिधनो मुनिः ॥ १० ॥

गिरां दूरेऽस्तु चित्तस्याप्यत्याज्यो निश्चयः सताम् ।
व्युत्सर्गं नामुचत् दीप्रे दीपे चन्द्रावतंसकः ॥ ११ ॥

दृढशीलसमृद्धीनां स्वयं तुष्यति देवता ।
पश्य जम्बूगुणैर्देव्याः प्रभावः प्रा(प्र)भवो हृतः ॥ १२ ॥

त्यजन्त्यनार्यकर्म्म द्राक् कुलीनाः प्रेक्ष्य बोधिदम् ।
बुद्धो जम्बूप्रभोर्वाचा प्रभवः किं न चौरराट् ॥ १३ ॥

विना यत्नं महापुण्यप्राप्तिः कस्याप्यहो भवेत् ।
पायसं संगमः क्वाप संगमः क्व मुनेरभूत् ॥ १४ ॥

सत्कृतं सुकृतं कुर्यादल्पस्यापि महत्फलम् ।
किं नासं(सः) शालिभद्रेण शालिभद्रेण वैभवम्(वः) ॥ १५ ॥

दानं देवैरपि श्लाघ्यं वेलादत्तं विशेषतः ।
स्मृत्वा दानं ददौ राज्यं मूलदेवाय देवता ॥ १६ ॥

न त्यजन्ति दुरात्मानः स्वभावं भाषिता अपि ।
कालसूकरिकः कूपे क्षिप्तोऽप्यौज्झंत्कथं वधम् ॥ १७ ॥

स्वयं(स्वं) कष्टे पातयित्वापि प्राज्ञः पापान्निवर्तते ।
कुठारेणांह्रिमाजघ्ने किं नोज्झन् सुलसो वधम् ॥ १८ ॥

स्फुरन्ति मोहराजस्य मुनीन्द्रेष्वपि केलयः ।
मुञ्चत्यश्रूणि दिष्ट्यान्ते सूनोः शय्यम्भवोऽपि यत् ॥ १९ ॥

दूषयन्ति निजां सन्धां कलयापि न सात्त्विकाः ।
मोदकान् कृष्णलब्ध्याऽऽप्तान् पर्यस्थापयदाच्युतिः ॥ २० ॥

सर्वस्यापि समो धर्मो नान्वयं सन्तमीक्ष्यते ।
तत्कुलं नन्दिषेणस्य पुण्योत्कर्षश्च तादृशः ॥ २१ ॥

कुलीना व्रतभङ्गेऽपि हितमेवाचरन्त्यहो ।
दश बोधितवान्नित्यं नन्दिषेणोऽवकीर्ण्यपि ॥ २२ ॥

सुचिरं परिपाल्यापि विफलं व्रतमुज्झितम् ।
पश्याधः कण्डरीकोऽगात्ततो दीर्घतपा अपि ॥ २३ ॥

महद्भिस्तुलनामिच्छन्ननात्मज्ञो विनश्यति ।
स्पर्द्धया स्थूलभद्रस्य पश्य यन्मुनिरन्वभूत् ॥ २४ ॥

वृथा वाग्विहितो यत्नः कर्म्म भुक्तं विलीयते ।
भेजे तथात्तदीक्षोऽपि भामिनीं मुनिरार्द्रकः ॥ २५ ॥

बलिष्ठैरपि दुर्लङ्घ्या तुच्छापि स्नेहशृङ्खला ।
तस्थौ किं नार्द्रको नद्धः श(शि)शुना तर्कुतन्तुभिः ॥ २६ ॥

निःसङ्गैरपि नोपेक्ष्या शासनस्य तिरस्क्रिया ।
वज्रस्वाम्यपि पुष्पौघमानिनायाऽन्यथा कथम् ॥ २७ ॥

यन्न बुद्ध्यापि सम्भाव्यं धर्मात्तदपि जायते ।
प्रोद्धृतं पश्य चालिन्या कूपादम्भः सुभद्रया ॥ २८ ॥

किं पुत्रैरर्थितैरेकैः श्रिये साध्व्यः सुता अपि ।
सतीमतल्लिकाः पुत्र्यः पुपुवुश्चेटकान्वयम् ॥ २९ ॥

अयत्नात्तत् कदापि स्यात् यत्कष्टैरपि नो भवेत् ।
गौतमानुगमादेव दिन्नाद्यैः प्राप्ति केवलम् ॥ ३० ॥

दर्शनादपि पूज्यानां जायते पुण्यसन्ततिः ।
हालिको गौतमालोकादभवत् बोधिबीजभाक् ॥ ३१ ॥

यत्र कुत्राप्यसम्भूतं दैवात्तदपि जायते ।
क्षिप्ता स्रक् कृष्णया जिष्णौ-वव्रे पञ्चाऽपि पाण्डवान् ॥ ३२ ॥

प्रायः पापैर्न लिप्यन्ते सदाचाराः कृतैरपि ।
तद्भवेऽपि स्म सिध्यन्ति बन्धुघातेऽपि पाण्डवाः ॥ ३३ ॥

न लङ्घन्ते सदाचाराः स्वाम्यर्थेऽपि स्वकं वचः ।
कृत्वा कौरवसाद्राज्यं प्रावात्सुः पाण्डवाः स्युः (वने) ॥ ३४ ॥

अवाक्प्रतिष्ठाशीलानां ध्रुवं नाशो धनायुषोः ।
काले राज्यममुञ्चन्तो विलीनाः किं न कौरवाः ॥ ३५ ॥

को बलस्यावकाशोऽस्ति दैवे प्रत्यर्थितां गते ।
तटस्थस्यैव दैत्यारेर्दग्धा द्वारवती पुरा ॥ ३६ ॥

पितॄन् बाल्येऽनुवर्तन्ते शि(श)लाकापुरुषा अपि ।
जरासिन्धुभये नष्टौ हरिनीलाम्बरावपि ॥ ३७ ॥

दुस्त्यजो विषयासङ्गस्तपस्यपि चिरं स्थितैः ।
दृष्ट्वा राजीमतीरूपं विचक्रे रथनेम्यपि ॥ ३८ ॥

कुरुध्वं किमकृत्यानि प्रभुत्वश्रीबलोद्धताः ।
हृत्वा सीतां दशास्योऽपि ययौ नाशं न किं श्रुतम् ॥ ३९ ॥

भेकी यत्स्याच्छिरस्ता(तो)ऽहेस्तन्मान्त्रिकविजृम्भितम् ।
यन्मुनेर्बोधकृत्कोशा स्थूलभद्रप्रभैव सा ॥ ४० ॥

यद्यस्मादत्यसम्भाव्यं कदापि स्यात्ततोऽपि तत् ।
पश्य पण्याङ्गना कोशा मुनिं मार्गे न्यवेशयत् ॥ ४१ ॥

घोरमप्यघमुग्रेण तपसा श्वेव नश्यति ।
प्राप्तं चिलातीपुत्रेण स्त्रीवधेऽपि त्रिविष्टपम् ॥ ४२ ॥

अपि बुद्धिमतां धुर्यैर्धर्मदम्भो न भिद्यते ।
नीतोऽभयकुमारोऽपि श्रावकीभूय वेश्यया ॥ ४३ ॥

भवेत् दुश्चारिणां यत्नः सुमहानपि निष्फलः ।
प्रद्योतोऽकारयद्वप्रं न तु प्राप मृगावतीम् ॥ ४४ ॥

पश्चात्तापे सति प्रायो हिते प्रज्ञा प्रवर्तते ।
श्रीवीरप्रतिमां कृत्वाऽपूजयत्स्वर्णकृत्सुरः ॥ ४५ ॥

विवेकिनां परद्रव्यं तृणादपि न किञ्चन ।
दृष्ट्वाऽगात् कुण्डलं भ्रष्टं नागदत्तोऽन्यवर्त्मना ॥ ४६ ॥

जीवा दुःखेन मोच्यन्ते विषयाद् विबुधैरपि ।
गन्धर्वनागदत्तस्य कियद् बोधे सुरोऽक्लिशत् ॥ ४७ ॥

सुराः कुर्वन्ति सान्निध्यं सङ्कटे शीलशालिनाम् ।
जाता सुदर्शनस्याहो शूलिकापि सुखासनम् ॥ ४८ ॥

इष्टप्राप्तौ महेच्छानां चेदिच्छैव विलम्बते ।
अवन्तीसुकुमालस्य को लग्नः स्वर्गतौ क्षणः ॥ ४९ ॥

सर्वासामपि शक्तीनां तपःशक्तिर्विशिष्यते ।
लङ्केन्द्रस्यास्खलद् यानमूर्ध्वं वालिमुनेर्गतम् ॥ ५० ॥

यस्तारुण्येऽपि दुःसाध्यः सोऽर्थो बाल्येऽतिचित्रकृत् ।
अन्त्यस्य देवकीसूनोः सत्त्वे को नाधुनच्छिरः ॥ ५१ ॥

अप्रकम्प्या स्थितिर्ज्ञाततत्त्वामां(नां) त्रिदशैरपि ।
यक्ष एव विलक्षोऽभूत् न विलक्षस्त्रिविक्रमः ॥ ५२ ॥

गुणिनां गौरवं कार्यं वयोपेक्षा न युज्यते ।
वज्रं किं वाचनाचार्यं न बाल्येऽप्यकरोद् गुरुः ॥ ५३ ॥

गौरवाय गुणा एव वयस्तत्र न कारणम् ।
वज्रः शावोऽपि पूज्योऽभूत् नैव वृद्धोऽपि तत्पिता ॥ ५४ ॥

श्रेयः सर्वस्वहा क्रोधः कृतः प्रान्ते विशेषतः ।
निरार्यापि(निर्याम्यापि) परान् दुष्टं जन्माप स्कन्दकः स्वयम् ५५

पूर्वं किं न कृतं पुण्यं मा रोदीर्दुर्गतौ गतः ।
दुःखान्मोक्षः शुचा चेत् स्यात् ही शुशोच शशी न किम्॥ ५६ ॥

दुष्कृतानुपदं श्रेयः कृतं सद्योऽघमर्षणम् ।
जगामानशनात् स्वर्गं वीरं दृष्ट्वापि कौशिकः ॥ ५७ ॥

स्वाङ्गकष्टं विषह्यापि विधत्तेऽथ हितं महान् ।
अहिदंशव्यथां सेहे वीरस्तद्बोधनोद्यतः ॥ ५८ ॥

वल्लभाविप्रलम्भेण धीरोऽपि विधुरो भवेत् ।
श्रीरामः किं न बभ्राम शंसन् सीतां लता अपि ॥ ५९ ॥

शस्त्रघातव्यथाभ्योऽपि मानस्यो दुस्सहा रुजः ।
रामस्तथा न चक्लाम युद्धेर्यद्वत् हृतप्रियः ॥ ६० ॥

शनैः स्यात् सम्पदां वृद्धिः क्षणादपि पुनः क्षयः ।
सगरस्याङ्गजातानां का वेला विलयेऽलगत् ॥ ६१ ॥

सर्वपापाण्यधः कुर्युः शुद्धधीः क्षणमप्यहो ।
निन्दित्वा प्रान्तकाले स्वं गोशालोऽपि दिवं ययौ ॥ ६२ ॥

यद्विधेरपि चित्राय रचयन्ति तदङ्गनाः ।
प्रत्युत श्वसुरं चौरं चक्रे नूप(पु)रपण्डिता ॥ ६३ ॥

तिष्ठन्तु प्रचुरा दूरे श्रोतव्या कापि वाक् सताम् ।
गाथां श्रुत्वार्हतीमेकां रौहिणेयोऽपि सुख्यभूत् ॥ ६४ ॥

प्राणेभ्योऽपि प्रियं धर्मं गणयन्ति यतीश्वराः ।
नाऽऽचरव्यौ कालिकाचार्यो दत्तभीत्याऽनृता गिरः ॥ ६५ ॥

अहो मन्ये विडम्ब्येत महर्षिरपि मायिभिः ।
कूटाच्चिटकयोः कीदृग् जमदग्निरजायत ॥ ६६ ॥

शक्यते महिमा केन परिच्छेत्तुं महात्मनाम् ।
वृद्धिं विष्णुकुमारस्य वीक्ष्य शक्रोऽपि विस्मितः ॥ ६७ ॥

वाग्देहे सुदमे स्वान्तं दुर्दमं महतामपि ।
गतः प्रसन्नचन्द्रोऽपि दुर्ध्यानं दुर्मुखोदितैः ॥ ६८ ॥

कारणेऽपि कृतः क्रोधो दीर्घदुःखकृते भवेत् ।
निदानात्पारणाभङ्गेऽग्निशर्माऽभूच्चिरं भवी ॥ ६९ ॥

अपराध्यपि शुद्धात्मा स्वं निन्दन् स्यादनिन्दितः ।
असिध्यद् गुणसेनात्मा मुनेर्हेतुरपि क्रुधः ॥ ७० ॥

दाक्षिण्यादपि नालीकं ब्रूयादण्वपि बुद्धिमान् ।
कूटसाक्षिकमात्रेण न्यपतन्नरकं वसुः ॥ ७१ ॥

कदर्याणां धनं प्रायो नान्येषामपि शर्मणे ।
गतो नन्दनिधीन् दृष्ट्वा कल्की कल्कपरः क्षयम् ॥ ७२ ॥

गुणैर्नायो(र्योऽ)प्यसामान्यैः पूज्याः स्युर्महतामपि ।
श्रीवीराभिग्रहे पूर्णे स्तुतेन्द्रेणापि चन्दना ॥ ७३ ॥

ऋद्धावपि विचारेण प्रवर्तन्ते विचक्षणाः ।
राज्ञीत्वेऽपि गतोत्सेकं न चित्रकरदारिका ॥ ७४ ॥

सम्प्राप्तामपि पापात्मा भोक्तुं न लभते श्रियम् ।
स्वर्गमत्याजयच्छक्रः सङ्गमं वीरवैरिणम् ॥ ७५ ॥

हिता(त)बुद्धया कृता पीडाऽप्यहो पुण्यप्रदा भवेत् ।
वैद्यौ स्वर्गं गतौ कृष्ट्वा वीरस्य श्रुतिकीलकौ ॥ ७६ ॥

यादृक् तादृगवस्थोऽपि गुरुर्गौरवमर्हति ।
शयालुं शेलकाचार्यं पन्थकोऽक्षामयन्न किम् ॥ ७७ ॥

परां कोटिगतं सत्त्वं निपुणानां मुदे भवेत् ।
स्तुतो देवैर्हरिश्चन्द्रश्चीराकर्षी मृताङ्गजात् ॥ ७८ ॥

प्राणान् दत्त्वापि रक्षन्ति सात्त्विकाः शरणागतम् ।
वज्रायुधस्तुलां श्रित्वा श्येनात् पारापतं पपौ ॥ ७९ ॥

सुबह्वपि तपस्तुच्छफलमज्ञानतः कृतम् ।
अन्येषां मोक्षदात्कष्टादीशाने तामलिर्ययौ ॥ ८० ॥

निष्कलङ्कः कृतो धर्मः स्यादल्पोऽपि महर्द्धये ।
इन्द्रोऽभूत् कार्तिकश्रेष्ठी सम्यक् श्रद्धानशुद्धितः ॥ ८१ ॥

दुष्कराण्यपि कुर्वन्ति कामिनः कान्तयाऽर्थिताः ।
एकस्तम्भं व्यधात्सौधं श्रेणिकश्चेल्लणाकृते ॥ ८२ ॥

नर्ते प्राप्यं महत्पुण्यं लोभः स्यात्सहसा महान् ।
यज्जिनो बोद्धुमेत्यश्वं जिनार्चाफलमेव तत् ॥ ८३ ॥

अप्राज्ञेनापि मोक्तव्यः श्रुताभ्यासः कदापि न ।
पश्य माषतुषोऽऽप्यासीदनिर्वेदाद् गुणोत्तरः ॥ ८४ ॥

पशोरपि पदस्पर्शैर्भूर्विशुद्धस्य पूयते ।
जातमश्वावबोधाख्यं जातमश्वान्न किं वद ॥ ८५ ॥

सामान्यस्यापि सत्कर्म्म श्लाघ्यमेवोत्तमैरपि ।
प्रशशंस न किं वीरः कामदेवं दृढव्रतम् ॥ ८६ ॥

स्मरेन्मन्त्रं न कः पञ्चपरमेष्ठिनमादरात् ।
शकुन्तिकापि यं श्रुत्वा पश्य जाता सुदर्शना ॥ ८७ ॥

ऋतमप्यप्रियं प्रोक्तं शुद्धानामपि दोषकृत् ।
श्रीवीरः शतकस्यापि प्रायश्चित्तमदापयत् ॥ ८८ ॥

आर्जवं नाम मर्त्यानां ध्रुवं सर्वोत्तमो गुणः ।
यत्करीन्द्राधिरूढापि मरुदेव्याप केवलम् ॥ ८९ ॥

आत्मशुद्धौ गुणा हेतुर्न दीक्षा नैव काननम् ।
प्रापाऽऽदर्शगृहस्थोऽपि केवलं भरतेश्वरः ॥ ९० ॥

साधूनां दर्शनेनापि स्यात् सरागोऽपि निर्मलः ।
नाभूदिलातीपुत्रः किं वंशाग्रस्थोऽपि केवली ॥ ९१ ॥

कृतातिशायि केषाञ्चित् सच्चरित्रं कलावपि ।
वेश्यावासे रसानश्नन् स्थूलभद्रो जयेत्स्मरम् ॥ ९२ ॥

महद्भिश्चरितं वर्त्म गौरव्यं स्यात् श्रुतादपि ।
कालिकाद् वार्षिकं पर्व चतुर्थ्यां कस्य नो मतम् ॥ ९३ ॥

असाध्यं साधयन्त्यर्थमुपायेन विचक्षणाः ।
बोधितोऽनार्यलोकोऽपि धर्मं संप्रतिभूभुजा ॥ ९४ ॥

पुंसां कालौचितीज्ञानं प्रकर्षाय विशेषतः ।
विजिग्ये रासकान् दत्त्वा विवादी वृद्धवादिना ॥ ९५ ॥

यथातथापि स्वावर्णं व्यस्यन्त्येव विपश्चितः ।
मृत्युदम्भादृतं वेश्या पादलिप्तेन भाणिता ॥ ९६ ॥

बहुश्रुतत्वं केषाञ्चित्तत्त्वविघ्नाय प्रत्युतः(त) ।
बोधितोऽतिचिरात् क्लेशैरामराड् बप्पभट्टिना ॥ ९७ ॥

सद्बुद्ध्या पश्यतां बोधः स्यादल्पादपि हेतुतः ।
धनपालेऽभवद् बोधो दध्नि निध्याय देहिनः ॥ ९८ ॥

सन्तस्तत्प्रेक्ष्य कुर्वन्ति शुभं सर्वातिशायि यत् ।
ऋते कुमारपालात् को रुदत्याः स्वं पुराऽत्यजत् ॥ ९९ ॥

प्रमाणमुदयः पुंसां कालाकालधिया कृतम् ।
एकच्छत्रं कृतं जैनं श्रीहेमेन कलावपि ॥ १०० ॥

श्रीमद्धनविजयगणिविरचितम्

# ।। आभाणशतकम् ।।

प्रणम्य गुरुपादाब्जं, स्मृत्वा च श्रुतदेवताम् ।
आभाणकानि वक्ष्यन्ते, पुण्यहेतूनि हेतुभिः ॥ १ ॥

सर्वजनपूजनीयो, जिनधर्मतो जनः सुकुलजातः ।
स्वर्णं सहजसुगन्धं, नादेयं कस्य लोके स्यात् ? ॥ २ ॥

चराचराणां सर्वेषां प्राणिनां प्रीतिकारणम् ।
तुष्टिपुष्टिकरः श्रेष्ठो, जिनधर्मो गुडो यथा ॥ ३ ॥

विधिनाऽऽराधितो जैनधर्मः शर्मकरो यथा ।
शङ्खः प्रदक्षिणावर्त्तः, पयसा भूयसा भृतः ॥ ४ ॥

जिनधर्मफलाकाङ्क्षा, पूर्यते नान्यशासनैः ।
सहकारफलाकाङ्क्षा, सा यथा नाम्लिकाफलैः ॥ ५ ॥

ज्ञानदर्शनचारित्रसम्यग्भावितमानसः ।
क्षीरखण्डाघृतास्वादादधिकं लभते सुखम् ॥ ६ ॥

धर्मं विना मन्त्रतन्त्रयन्त्रौषधनिषेवणम् ।
सुधीभिर्मनसा ध्येयं, सर्वं जलविलोडनम् ॥ ७ ॥

धर्मोपदेशसमये, धर्मं न शृणोति यश्च निद्राति ।
स्वर्णनिधिलब्धिसमये, चक्षुर्विकलत्वमाप्नोति ॥ ८ ॥

जिनधर्मं सुधास्वादं, परित्यज्य सुखावहम् ।
गृह्णन्ति ते विषं मिथ्यावादं निर्भाग्यशेखराः ॥ ९ ॥

जैनं मतं परित्यज्य, गृहीतं परशासनम् ।
अन्धकारं कृतं तेन निमील्य नयने निजे ॥ १० ॥

धर्मोपदेशे दाने च, श्रमो वित्तव्ययोऽपि च ।
निन्द्यो न केनचिद्दन्तपातः कर्पूरभक्षणे ॥ ११ ॥

श्रीजैनशासने सम्यग्गुणगौरवसज्जिते ।
तत्र यद्दूषणाख्यानं, दुग्धे पूरककर्षणम् ॥ १२ ॥

प्रमत्तस्यातिमत्तस्य, चित्ते नो धर्मवासना ।
निर्भाग्यस्य यथा प्रायो, गृहे तिष्ठति नो निधिः ॥ १३ ॥

जीवितान्ते च संप्राप्ते, धर्मकर्ममनोरथः ।
सरसीव विशाले स्यात्सेतुबन्धो गतोदके ॥ १४ ॥

पुण्याधिकैः सह स्पर्धा, पुण्यहीनस्य किं भवेत् ? ।
इक्षवो भक्षणीयाः स्युरिभैः सह यथा नरैः ॥ १५ ॥

रन्ध्रेण सहिते कुम्भे, यथा नीरं न तिष्ठति ।
पापेन मलिने पुंसि, तथा सद्धर्मवासना ॥ १६ ॥

पृथिव्यां रत्नबाहुल्ये, प्राप्तिः पुण्यानुसारिणी ।
जलधौ जलबाहुल्ये, प्राप्तिः पात्रानुसारिणी ॥ १७ ॥

देवगुर्वादिसामग्र्यां यः प्रमादपरायणः ।
नीरेण भरितेऽभ्यर्णे तटाके तृषितः स्थितः ॥ १८ ॥

तीर्थयात्राकरः सङ्घपतिर्भवति भूतले ।
ततः सत्यमिदं जज्ञे, यतो धर्मस्ततो जयः ॥ १९ ॥

दया सर्वजनाभीष्टोपदिष्टा च जिनैर्यथा ।
इष्टं वैद्योपदिष्टं च, पयःपानं सशर्करम् ॥ २० ॥

गता तिथिर्यथा पूर्वं, ब्राह्मणैर्न च वाच्यते ।
तथा पुराकृतं पापं, धर्मिभिर्नानुमन्यते ॥ २१ ॥

यथा पानीयमार्गेण, पानीयं याति सत्वरम् ।
तथा स्वभावतो धीरा, उत्तमा उत्तमाध्वना ॥ २२ ॥

पानीयस्य गतिर्नीचैरुच्चैर्गतिरुपायतः ।
तथा पापस्वभावस्योपदेशात्सद्गतिर्भवेत् ॥ २३ ॥

दयादानादिकं धर्मं, जिनोक्तमपरे तथा ।
दूरतो वृष्टिवार्त्तां हि, वदन्ति पथिका यथा ॥ २४ ॥

परम्परागतं धर्मं, विना सर्वं न शोभते ।
कलाकलापकलितं, केकिनृत्यं कृतं यथा ॥ २५ ॥

क्रमागतं गणं मुक्त्वा, मूढा यान्ति गणान्तरम् ।
पल्वलं दर्दुरा यद्वद्विहाय सरितां पतिम् ॥ २६ ॥

स्वकीयाशुद्धधर्मस्य, मिथ्यात्वं वक्ति को जनः ? ।
दुष्टायाः को निजाम्बायाः, शाकिनीत्वं प्रकाशयेत् ? ॥ २७ ॥

बहुरक्षितबहुशिक्षितनीचजनो भजति नैव सन्मार्गम् ।
पुच्छमिव शुनो नलिकाधृतमपि सरलं यथा न स्यात् ॥ २८ ॥

ज्ञानदर्शनचारित्राशातना बहुधा कृतौ ।
मिथ्यादुष्कृतदानं तत्समुद्रे सक्तुमुष्टिंवत् ॥ २९ ॥

परस्त्रीरमणासक्तः, परद्रव्यापहारकः ।
संयाति निधनं प्रायो, यतः पापस्ततः क्षयः ॥ ३० ॥

स याति वचनीयत्वं, पापी पापेन पच्यते ।
मुख्यमार्गं परित्यज्य, स्वमार्गं कुरुते यकः ॥ ३१ ॥

स्वयं पापी परं निन्दन्, कथं शुद्धो भविष्यति ? ।
यथा काकः स्वयं कृष्णो, नीलीकुण्डे वसन् सदा ॥ ३२ ॥

यत्र तत्र गतो जन्तुः, पीडामाप्नोति पापवान् ।
कर्पास इव सर्वत्र, मध्यग्रन्थिकदर्थितः ॥ ३३ ॥

दुग्धधौतोऽपि किं काको, राजहंसत्वमाप्नुयात् ? ।
तपःकृशस्तथा मिथ्यादृग् नो सुगतिभाग् भवेत् ॥ ३४ ॥

मेधाविवर्जितः पूर्वं, मानेन च कदर्थितः ।
अतीव चपलो यद्वद्वानरो वृश्चिकाशितः ॥ ३५ ॥

पूर्वं जातिविहीनस्तदनु क्रोधान्धतां च संप्राप्तः ।
उष्ट्र इवावकरस्थो नीचो नालोकितः केन ? ॥ ३६ ॥

ये वदन्ति दयाधर्मं, हिंसाधर्मं स्वशास्त्रतः ।
तेषां स्वमातृवन्ध्यात्ववाक्यवद् वचनं वृथा ॥ ३७ ॥

भूपतिः कुरुतेऽनीतिं, प्रजायाः का गतिस्तदा ? ।
आचार्यः कुरुतेऽकार्यं, तदा शिष्यस्य का गतिः ? ॥ ३८ ॥

आराधितः शिवाय स्यात्, भवाय च विराधितः ।
श्रीजिनस्तेन सत्योक्ती, राजा मित्रं न कस्यचित् ॥ ३९ ॥

तपोभरे कृते नैव, सिद्धिरज्ञानिनां भवेत् ।
नवनीतस्य संप्राप्तिरन्धेन दधिघोलने ॥ ४० ॥

औषधेन विना व्याधिर्गतो भाग्यानुभावतः ।
कुपुत्रस्तु विनाऽऽयासं, यथा यातो गृहाद् बहिः ॥ ४१ ॥

सूर्यं प्रति रजः क्षिप्तं, स्वचक्षुषि पतिष्यति ।
गुरुं प्रति कृताऽवज्ञा, सा तथा तस्य भाविनी ॥ ४२ ॥

सद्गुरुं ये परित्यज्य, भजन्ते कुगिरं गुरुम् ।
चिन्तामणिं परित्यज्य, काचमाददते जडाः ॥ ४३ ॥

यद्वचो धर्मनाशाय, तद्वचो वक्ति कः सुधीः ? ।
यत्स्वर्णं कर्णनाशाय, यथा तत्को निषेधते ? ॥ ४४ ॥

लोकहास्यभयात् किं स्यात्, स्वकीयाचारमोचनम् ? ।
षट्पदीभयतो यद्वच्चीवरस्य विमोचनम् ॥ ४५ ॥

सम्यग्दृशां गता शङ्का, परेषां वदतां मिथः।
शृङ्गेण शृङ्खलोत्तारोऽपरेषां युध्यतां मिथः ॥ ४६ ॥

मिथ्यादृशां क्रिया नैव, श्लाघ्या सम्यक्त्वधारिणाम् ।
गृहयोग्या न यात्रा सा, यथा सन्मार्गगामिनाम् ॥ ४७ ॥

मर्दयित्वोदरं तेन, शूलमुत्पादितं स्वतः ।
विधाय संगतिं मूढैः, सम्यक्त्वं मलिनीकृतम् ॥ ४८ ॥

क्षायिकसम्यग्दृष्टेर्निर्मलवृत्तेश्च मनसि न कदापि ।
संदेहो जिनवचने भवति श्यामत्वमिव हेम्नि ॥ ४९ ॥

कुग्रहान्मार्गमुत्सृज्योन्मार्गगामिनिबोधनम् ।
मृत्तिकाया घटे पक्वे, भग्ने कण्ठाधिरोपणम् ॥ ५० ॥

यथा नृपसुताः क्रीडायोग्याः कार्या न दुःखिताः ।
जैनवेषधरा वन्द्या नैव निन्द्या बुधैस्तथा ॥ ५१ ॥

औत्सुक्येन यथा नाम्रफलपाकः क्वचिद्भवेत् ।
चारित्राराधनेनाशु, मोक्षः साक्षात्तथैव च ॥ ५२ ॥

संयतासंयतानां च, संयोगो गुणवर्जितः ।
वेश्यादिक्पटयोः सार्थ इव शोभावहः कथम् ? ॥ ५३ ॥

संयमेन वियुक्तस्य, यद्वत्साधोः क्रियाविधिः ।
अधो नग्नस्य मर्त्यस्य, मस्तके मौलिबन्धनम् ॥ ५४ ॥

थूत्कृतेन यथाऽपूपकरणं न हि संमतम् ।
विना भावेन वेषस्य, धरणं तद्वदेव हि ॥ ५५ ॥

सूपपूपे यथाऽऽरब्धे, तैलपानस्पृहा पुरा ।
दीक्षायां गृह्यमाणायां, विशिष्या विषयस्पृहा ॥ ५६ ॥

भावहीने क्रिया पुंसि, पुण्यहीने सुखस्पृहा ।
चन्द्रज्योत्स्ना दिने यद्वच्चूडा मुण्डितमस्तके ॥ ५७ ॥

कषायविषयैर्येन, संयमः शिथिलीकृतः ।
तेन मुक्ताफलं विद्धं, स्थूलेन मुशलेन किम् ? ॥ ५८ ॥

ऐहिकं समतासौख्यं, त्यक्त्वा कः पारलौकिकम् ।
कटिस्थं तनुजं यद्वदुदरस्थं समीहते ॥ ५९ ॥

साधुत्वं येन संप्राप्य, निन्द्याचारः कृतः स्वयम् ।
धूलिक्षेपः स्वहस्तेन, हस्तिनेव स्वमस्तके ॥ ६० ॥

यत्र पद्मं तत्र हंसा वसंन्ति मुदिताशयाः ।
तथैव यत्र कल्याणं, तत्र तिष्ठन्ति साधवः ॥ ६१ ॥

कर्मवैरिविनाशाय, यतते यतिपुङ्गवः ।
ज्ञानवान् तपसा शूरः, सिंहः सन्नाहसंयुतः ॥ ६२ ॥

कामं शरीरसत्कारो, न्यत्कारः शिववर्त्मनाम् ।
विहितो यतिना तेन, सुप्तः सिंहः प्रबोधितः ॥ ६३ ॥

स्वयं पठनशीलानां, शिष्याणां प्रेरणं तथा ।
यथा स्वयं सुजात्यानां, भारमुद्वहतां गवाम् ॥ ६४ ॥

मुमुक्षूणां हिरण्यादिरक्षणं विषभक्षणम् ।
न शोभते यथाऽतीवजीर्णगोर्गलघण्टिका ॥ ६५ ॥

सम्यग्गृहीते चारित्रे, लज्जायाः करणं तथा ।
नृत्ये नट्याः प्रवृत्ताया, वदनाच्छादनं यथा ॥ ६६ ॥

मुनयो यदि कुर्वन्ति, मार्गलोपं यथा तथा ।
वृत्तिश्चिर्भटिकानत्ति, पुरतः कस्य कथ्यते ? ॥ ६७ ॥

चारित्रं पृष्ठतः कृत्वा, लज्जया मोक्षकामना ।
पात्रं तु पृष्ठतः कृत्वा, तक्रार्थं गमनं तथा ॥ ६८ ॥

मरौ सुरतरुप्राप्तिर्दारिद्र्ये निधिदर्शनम् ।
कलौ च बोधिबीजाप्तिर्दुर्भिक्षे पायसाशनम् ॥ ६९ ॥

सिद्धान्तवाचनं पूर्वं, व्याख्याता यत्र पण्डितः ।
तस्योपमानमास्थेयं, शर्करा दुग्धमिश्रिता ॥ ७० ॥

सिद्धान्तवाचनं टीकां, विना चारुतरं न हि ।
तस्योपमानं जानीहि, बालकाङ्गुष्ठधावनम् ॥ ७१ ॥

कुग्रहग्रहदुष्टस्य, सिद्धान्तश्रावणं तथा ।
अन्धस्य पुरतो दीप्रप्रदीपकरणं यथा ॥ ७२ ॥

अङ्गोपाङ्गादयो ग्रन्था, द्वादशाङ्ग्यां प्रतिष्ठिताः ।
गवादीनां यथा पादा, हस्तिपादे महत्तरे ॥ ७३ ॥

यत्र नीरं तत्र पङ्को, यथाऽस्ति कमलाकरे ।
अपवादोऽपि तत्रास्ति, यत्रोत्सर्गः, प्रवर्त्तते ॥ ७४ ॥

स्वयं यः सुमतिः पूर्वं, परं सिद्धान्तपारगः ।
नर्त्तकः किङ्किणीयुक्तचरणः शोभते यथा ॥ ७५ ॥

उत्सूत्रभाषकः सूत्रभाषकं बाधते तथा ।
विपरीतपथः प्रायस्तस्करः पुररक्षकम् ॥ ७६ ॥

छेदग्रन्थार्थविस्तारो, न तिष्ठति हृदन्तरे ।
तुच्छसत्त्ववतां यद्वत्पायसं कुर्कुरोदरे ॥ ७७ ॥

अभव्यदूरभव्यानां, चेतः स्पृशति नागमः ।
स्निग्धं घटं यथा तोयपूरस्तोयदसंभवः ॥ ७८ ॥

करण्डिकावृतो भानुश्छादितः किं क्वचिद्भवेत् ।
तथा परोक्तयुक्त्या किं, छादितः स्याज्जिनागमः ? ॥ ७९ ॥

पानीयं को निबध्नीयात्, ग्रन्थौ वस्त्रेण कोविदः ।
तथा शास्त्रेषु सर्वेषु, संपूर्णं जिनभाषितम् ॥ ८० ॥

यथा कुठारघातेन, धौतं वस्त्रं न चार्थकृत् ।
तथा स्वहठवादेन, दूषितं जिनभाषितम् ॥ ८१ ॥

कुधियां बधिराणां च, सभासु भगवद्वचः ।
व्याख्यातं निष्फलं ज्ञेयमरण्ये गीतगानवत् ॥ ८२ ॥

बालास्तु तक्रपानं जानन्ति विलोडनं न दध्नश्च ।
तद्वन्मूढाः सूत्रं जानन्ति न सूत्रपरमार्थम् ॥ ८३ ॥

युगेऽस्मिन् केवलज्ञानवर्जिते वरमल्पवित् ।
राणकः काणको यद्वच्चक्षुर्विकलपर्षदि ॥ ८४ ॥

करणे कथने भिन्ना, आदेशाः परवादिनाम् ।
दर्शने भक्षणे यद्वद्दन्तिदन्ताः पृथक् पृथग् ॥ ८५ ॥

उत्सूत्रभाषणं पूर्वं, पुनः क्रोधेन मिश्रितम् ।
सर्वथा परिहर्त्तव्यं, लशुनं हिङ्गुसंस्कृतम् ॥ ८६ ॥

तृणैराच्छादितो वह्निरवश्यं प्रकटीभवेत् ।
माययाऽऽच्छादितं तद्वदुत्सूत्रं मनसि स्थितम् ॥ ८७ ॥

मधुरवचनेन युक्तं सर्वं हितमेव वेत्ति न त्वहितम् ।
सकलं धवलं दुग्धं पश्यति बालस्तु नो तक्रम् ॥ ८८ ॥

सहसा विहिते कार्ये, पृच्छया किं विवेकिनाम् ? ।
विवाहे विहिते लग्नपृच्छया किं प्रयोजनम् ? ॥ ८९ ॥

यथोप्तमूषरे क्षेत्रे, धान्यं धान्यधनेच्छया ।
धर्मबुद्ध्या तथा दानं, कुपात्रे निष्प्रयोजनम् ॥ ९० ॥

दातुर्दानं यथा स्वल्पमनल्पं न विचार्यते ।
धर्मधनोस्तथा दन्ता न विलोक्या हि धीधनैः ॥ ९१ ॥

भवितव्यं भवत्येव, परं सततमुद्यमः ।
कर्त्तव्योऽपरथा सर्वेऽलसाः स्युः सर्वकर्मसु ॥ ९२ ॥

वशा सुशीला सुकुला, शीलं धरति दुर्धरम् ।
दृढपाढा यथा भित्तिर्भारं वहति सद्मनः ॥ ९३ ॥

पयः पश्यति मार्जारश्चण्डं दण्डं न पश्यति ।
तथा पराङ्गनारङ्गं, मूढः पश्यति नायतिम् ॥ ९४ ॥

न याति सद्गतौ जन्तुः, कुतो विषयसंयुतः ? ।
उन्दुरुर्न बिले माति, कुतः सन्मार्जिनीयुतः ? ॥ ९५ ॥

उप्यते यादृशं धान्यं, लूयते तादृशं जनैः ।
यादृशं दीयते दानं, तादृशं प्राप्यते फलैः ॥ ९६ ॥

एकः संसारतो भीतो, द्वितीयो वक्ति मां भज ।
तदिदं कूर्चदाहेन, प्रदीपकरणोपमम् ॥ ९७ ॥

अमेध्यं वनितासङ्गस्त्याज्यो दुर्गतिदुःखदः ।
कण्टकाश्रितविष्ठायाः, प्रकृत्यस्वादसोदरः ॥ ९८ ॥

क्षणिकैकसुखायात्मन्!, मोक्षमार्गविमोचनम् ।
एकपूपकृते कूपजलयन्त्रस्य विक्रयः ॥ ९९ ॥

विना दानादिकं धर्मं, मनुष्यायुरतिक्रमः ।
शून्ये ग्रामेऽङ्गनारीणां शाटकस्फाटनोपमः ॥ १०० ॥

भवस्वरूपे विज्ञाते, विदुषां किं बहूभिक्तिः ? ।
करस्थकङ्कणालोके, दर्पणग्रहणेन किम् ? ॥ १०१ ॥

स्पृहा हि तावती कार्या, सत्ता भाग्यस्य यावती ।
पादप्रसारणं कार्यं, यावत्प्रच्छादनांशुकम् ॥ १०२ ॥

यथेहोदूखले रिक्ते, मुशलद्वयमोचनम् ।
मोक्षमार्गक्रियाहीने,, मोक्षैहिकसुखस्पृहा ॥ १०३ ॥

अधमाधमजन्तूनां, गिरिरेखेव शाश्वती ।
सतां पानीयरेखेव, क्वचिदीर्ष्या भवेत्पुनः ॥ १०४ ॥

धर्मोपदेशलेशाख्यां, सभ्यामाभाणमालिकाम् ।
कण्ठपीठे करिष्यन्ति, ते ये श्रेयस्विनः जना ॥ १०५ ॥

निधिनिधिरसशशि १६९९ वर्षे पौषे मासे च पुष्यनक्षत्रे ।
राजनगरोपकण्ठे ऊष्मापुरनाम्नि वरनगरे ॥ १०६ ॥

श्रीतपगणगगनाङ्गणदिनमणिकिरणोपमानपरिकरिते ।
श्रीविजयदेवसूरीश्वरराज्ये प्राज्यपुण्यभरे ॥ १०७ ॥

चातुर्विद्यविशारदवाचककल्याणविजयशिष्येण ।
एतच्छतकं निबद्धं वाचकधनविजयवरगणिना ॥ १०८ ॥

कविवरश्रीपद्मानन्दप्रणीतम्

## ॥ पद्मानन्दशतकम् ॥

त्रैलोक्यं युगपत्कराम्बुजलुठन्मुक्तावदालोकते,
जन्तूनां निजया गिरा परिणमद्यः सूक्तमाभाषते ।
स श्रीमान् भगवान् विचित्रविधिभिर्देवासुरैरर्चितो,
वीतत्रासविलासहासरभसः पायाज्जिनानां पतिः ॥ १ ॥

यैः क्षुण्णाः प्रसरद्विवेकपविना कोपादिभूमिभृतो,
योगाभ्यासपरश्वधेन कषितो यैर्मोहधात्रीरुहः ।
बद्धः संयमसिद्धमन्त्रविधिना यैः प्रौढकामज्वर-
स्तान्मोक्षैकसुखानुषङ्गरसिकान्वन्दामहे योगिनः ॥ २ ॥

यैस्त्यक्ता किल शाकिनीवदसमप्रेमाश्रिता प्रेयसी,
लक्ष्मीः प्राणसमाऽपि पन्नगवधूवत्प्रोज्झिता दूरतः ।
मुक्तं चित्रगवाक्षराजिरुचिरं वल्मीकवन्मन्दिरं,
निस्सङ्गत्वविराजिताः क्षितितले नन्दन्तु ते साधवः ॥ ३ ॥

यः परवादे मूकः, परनारीवक्त्रवीक्षणेऽप्यन्धः ।
पङ्गुः परधनहरणे, स जयति लोके महापुरुषः ॥ ४ ॥

आक्रोशेन न दूयते न च चटुप्रोक्त्या समानन्द्यते,
दुर्गन्धेन न बाध्यते न च सदामोदेन सम्प्रीयते ।
स्त्रीरूपेण न रज्यते न च मृतश्वानेन विद्वेष्यते,
माध्यस्थ्येन विराजितो विजयते कोऽप्येष योगीश्वरः ॥ ५ ॥

मित्रे नन्दति नैव नैव पिशुने वैरातुरो जायते,
भोगे लुभ्यति नैव नैव तपसि क्लेशं समालम्बते ।
रत्ने रज्यति नैव नैव दृषदि प्रद्वेषमापद्यते,
येषां शुद्धहृदां सदैव हृदयं ते योगिनो योगिनः ॥ ६ ॥

सौन्दर्यैकनिधेः कलाकुलविधेर्लावण्यपाथोनिधेः,
पीनोत्तुङ्गपयोधरालसगतेः पातालकन्याकृतेः ।
कान्ताया नवयौवनाञ्चिततनोर्यैरुज्झितः सङ्गमः,
सम्यङ्मानसगोचरे चरति ? किं तेषां हताशः स्मरः ॥ ७ ॥

शृङ्गारामृतसेकशाड्वलरुचिर्वक्रोक्तिपत्रान्विता,
प्रोद्गच्छत्सुमनोऽभिषङ्गसुभगा स्त्रीणां कथावल्लरी ।
यैर्ब्रह्मव्रतपावकेन परितो भस्मावशेषीकृता,
किं तेषां विषमायुधः प्रकुरुते ? रोषप्रकर्षेऽपि रे ! ॥ ८ ॥

आताम्रायतलोचनाभिरनिशं सन्तर्ज्य सन्तर्ज्य च,
क्षिप्तस्तीक्ष्णकटाक्षमार्गणगणो मत्ताङ्गनाभिर्भृशम् ।
तेषां किं नु विधास्यति ? प्रशमितप्रद्युम्नलीलात्मनां,
येषां शुद्धविवेकवज्रफलकं पार्श्वे परिभ्राम्यति ॥ ९ ॥

अग्रे सा गजगामिनी प्रियतमा पृष्ठेऽपि सा दृश्यते,
धात्र्यां सा गगनेऽपि सा किमपरं सर्वत्र सा सर्वदा ।
आसीद्यावदनङ्गसङ्गतिरसस्तावत्तवेयं स्थितिः,
सम्प्रत्यास्यपुरस्सरामपि न तां द्रष्टाऽसि कोऽयं लयः ? ॥ १० ॥

योगे पीनपयोधराञ्चिततनोर्विच्छेदने बिभ्यतां,
मानस्यावसरे चटूक्तिविधुरं दीनं मुखं बिभ्रताम् ।
विश्लेषे स्मरवह्निनाऽनुसमयं दन्दह्यमानात्मनां,
भ्रातः ! सर्वदशासु दुःखगहनं धिक्कामिनां जीवितम् ॥ ११ ॥

मध्येऽस्याः कृशतां कुरङ्गकदृशो भ्रूनेत्रयोर्वक्रतां,
कौटिल्यं चिकुरेषु रागमधरे मान्द्यं गतिप्रक्रमे ।
काठिन्यं कुचमण्डले तरलतामक्ष्णोर्निरीक्ष्य स्फुटं,
वैराग्यं न भजन्ति मन्दमतयः कामातुरा ही !! नराः ॥ १२ ॥

पाण्डुत्वं गमितान्कचान्प्रतिहतां तारुण्यपुण्यश्रियं,
चक्षुः क्षीणबलं कृतं श्रवणयोर्बाधिर्यमुत्पादितम् ।
स्थानभ्रंशमवापिताश्च जरया दन्तास्थिमांसत्वचः,
पश्यन्तोऽपि जडा हहा !! हृदि सदा ध्यायन्ति तां प्रेयसीम् ॥ १३ ॥

अन्यायार्जितवित्तवत्क्वचिदपि भ्रष्टं समस्तै रदै-
स्तापक्लान्ततमालपत्रवदभूदङ्गं वलीभङ्गुरम् ।
केशेषु क्षणचन्द्रवद्धवलिमा व्यक्तं श्रितो यद्यपि,
स्वैरं धावति मे तथापि हृदयं भोगेषु मुग्धं हहा !! ॥ १४ ॥

उद्गृणन्ति प्रपञ्चेन, योषितो गद्गदां गिरम् ।
तामामनन्ति प्रेमोक्तिं, कामग्रहिलचेतसः ॥ १५ ॥

यावद्दुष्टरसक्षयाय नितरां नाहारलौल्यं जितं,
सिद्धान्तार्थमहौषधैर्निरुपमश्चूर्णो न जीर्णो हृदि ।
पीतं ज्ञानलघूदकं न विधिना तावत्स्मरोत्थो ज्वरः,
शान्तिं याति न तात्त्विकीं हृदय ! हे शेषैरलं भेषजैः ॥ १६ ॥

शृङ्गारद्रुमनीरदे प्रसृमरक्रीडारसस्रोतसि,
प्रद्युम्नप्रियबान्धवे चतुरवाङ्मुक्ताफलोदन्वति ।
तन्वीनेत्रचकोरपार्वणविधौ सौभाग्यलक्ष्मीनिधौ,
धन्यः कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥ १७ ॥

सम्यक्परिहृता येन, कामिनी गजगामिनी ।
किं करिष्यति ? रुष्टोऽपि, तस्य वीरवरः स्मरः ॥ १८ ॥

लज्जेयं प्रलयं प्रयाति झटिति ब्रह्मव्रतं भ्रश्यति,
ज्ञानं सङ्कुचति स्मरज्वरवशात्पश्यामि यावत्प्रियाम् ।
यावत्तु स्मृतिमेति नारकगतेः पाकक्रमो भीषण-
स्तावत्तत्त्वनिरीक्षणात्प्रियतमाऽप्येषा विषौघायते ॥ १९ ॥

कारुण्येन हता वधव्यसनिता सत्येन दुर्वाच्यता,
सन्तोषेण परार्थचौर्यपटुता शीलेन रागान्धता ।
नैर्ग्रन्थ्येन परिग्रहग्रहिलता यैर्यौवनेऽपि स्फुटं,
पृथ्वीयं सकलाऽपि तैः सुकृतिभिर्मन्ये पवित्रीकृता ॥ २० ॥

यत्राम्रोऽपि विचित्रमञ्जरिभरव्याजेन रोमाञ्चितो,
दोलारूढविलासिनीविलसितं चैत्रे विलोक्याद्भुतम् ।
सिद्धान्तोपनिषन्निषण्णमनसां येषां मनस्सर्वथा,
तस्मिन्मन्मथबाधया न मथितं धन्यास्त एव ध्रुवम् ॥ २१ ॥

स्वाध्यायोत्तमगीतिसङ्गतिजुषः सन्तोषपुष्पाञ्चिताः,
सम्यग्ज्ञानविलासमण्डपगताः सद्ध्यानशय्यां श्रिताः ।
तत्त्वार्थप्रतिबोधदीपकलिकाक्षान्त्यङ्गनासङ्गिनो,
निर्वाणैकसुखाभिलाषिमनसो धन्या नयन्ते निशाम् ॥ २२ ॥

किं ? लोलाक्षि ! कटाक्षलम्पटतया किं ? स्तम्भजृम्भादिभिः,
किं ? प्रत्यङ्गनिदर्शनोत्सुकतया किं ? प्रोल्लसच्चाटुभिः ।
आत्मानं प्रतिबाधसे त्वमधुना व्यर्थं मदर्थं यतः,
शुद्धध्यानमहारसायनरसे लीनं मदीयं मनः ॥ २३ ॥

सज्ज्ञानमूलशाली, दर्शनशाखश्च येन वृत्ततरुः ।
श्रद्धाजलेन सिक्तो, मुक्तिफलं तस्य स ददाति ॥ २४ ॥

क्रोधाद्युग्रचतुष्कषायचरणो व्यामोहहस्तस्सखे !,
रागद्वेषनिशातदीर्घदशनो दुर्वारमारोद्धुरः ।

सज्ज्ञानाङ्कुशकौशलेन स महामिथ्यात्वदुष्टद्विपो,
नीतो येन वशं वशीकृतमिदं तेनैव विश्वत्रयम् ॥ २५ ॥

दृश्यन्ते बहवः कलासु कुशलास्ते च स्फुरत्कीर्त्तये,
सर्वस्वं वितरन्ति ये तृणमिव क्षुद्रैरपि प्रार्थिताः ।
धीरास्तेऽपि च ये त्यजन्ति झटिति प्राणान्कृते स्वामिनो,
द्वित्रास्ते तु नरा मनस्समरसं येषां सुहृद्वैरिणः ॥ २६ ॥

हृदयं सदयं यस्य, भाषितं सत्यभूषितम् ।
कायः परहितोपायः, कलिः कुर्वीत तस्य किम् ? ॥ २७ ॥

नास्त्यसद्भाषितं यस्य, नास्ति भङ्गो रणाङ्गणात् ।
नास्तीति याचके नास्ति, तेन रत्नवती क्षितिः ॥ २८ ॥

आनन्दाय न कस्य मन्मथकथा ? कस्य प्रिया न प्रिया ?,
लक्ष्मीः कस्य न वल्लभा ? मनसि नो कस्याङ्गजः क्रीडति ? ।
ताम्बूलं न सुखाय कस्य ? न मतं कस्यान्नशीतोदकम्,
सर्वाशाद्रुमकर्त्तनैकपरशुर्मृत्युर्न चेत्स्याज्जनाः ! ॥ २९ ॥

भार्येयं मधुराकृतिर्मम मम प्रीत्यन्वितोऽयं सुतः,
स्वर्णस्यैष महानिधिर्मम ममासौ बन्धुरो बान्धवः ।
रम्यं हर्म्यमिदं ममेत्थमनया व्यामोहितो मायया,
मृत्युं पश्यति नैव दैवहतकः क्रुद्धं पुरश्चारिणम् ॥ ३० ॥

कष्टोपार्जितमत्र वित्तमखिलं द्यूते मया योजितं,
विद्या कष्टतरं गुरोरधिगता व्यापारिता कुस्तुतौ ।
पारम्पर्यसमागतश्च विनयो वामेक्षणायां कृतः,
सत्पात्रे किमहं करोमि ? विवशः कालेऽद्य नेदीयसि ॥ ३१ ॥

आत्मा यद्विनियोजितो न विनये नोग्रं तपः प्रापितो,
न क्षान्त्या समलङ्कृतः प्रतिकलं सत्येन न प्रीणितः ।

तत्त्वं निन्दसि नैव कर्महतकं प्राप्ते कृतान्तक्षणे,
दैवायैव ददासि जीव ! नितरां शापं विमूढोऽसि रे ! ॥ ३२ ॥

बालो यौवनसम्पदापरिगतः क्षिप्रं क्षितौ लक्ष्यते,
वृद्धत्वेन युवा जरापरिणतो व्यक्तं समालोक्यते ।
सोऽपि क्वापि गतःकृतान्तवशतो न ज्ञायते सर्वथा,
पश्यैतद्यदि कौतुकं किमपरैस्तैरिन्द्रजालैः सखे ! ॥ ३३ ॥

द्वारं दन्तिमदप्रवाहनिवहैर्येषामभूत्पङ्किलं,
ग्रासाभाववशान्न सञ्चरति यद्रङ्कोऽपि तेषां पुनः ।
येऽभूवन्विमुखाः स्वकुक्षिभरणे तेषामकस्मादहो !!,
यच्च श्रीरिह दृश्यतेऽतिविपुला तत्कर्मलीलायितम् ॥ ३४ ॥

नापत्यानि न वित्तानि, न सौधानि भवन्त्यहो !! ।
मृत्युना नीयमानस्य, पुण्यपापे परं पुरः ॥ ३५ ॥

ब्रूतेऽहङ्कृतिनिग्रहं मृदुतया पश्चात्करिष्याम्यहं,
प्रोद्यन्मारविकारकन्दकदनं पञ्चेन्द्रियाणां जयात् ।
व्यामोहप्रसरावरोधनविधिं सद्ध्यानतो लीलया,
नो जानाति हरिष्यतीह हतकः कालोऽन्तराले किल ॥ ३६ ॥

बद्धा येन दशाननेन नितरां खट्वैकदेशे जरा,
द्रोणाद्रिश्च समुद्धृतो हनुमता येन स्वदोर्लीलया ।
श्रीरामेण च येन राक्षसपतिस्त्रैलोक्यवीरो हतः,
सर्वे तेऽपि गताः क्षयं विधिवशात्काऽन्येषु तद्भोः ! कथा ? ॥ ३७ ॥

सर्वभक्षी कृतान्तोऽयं, सत्यं लोके निगद्यते ।
रामदेवादयो धीराः, सर्वे क्वाप्यन्यथा गताः ॥ ३८ ॥

मिथ्यात्वानुचरैर्विचित्रगतिभिः सञ्चारितस्योद्भटै-
रत्युग्रभ्रममुद्गराहतिवशात्सम्मूर्च्छितस्यानिशम् ।

संसारेऽत्र नियन्त्रितस्य निगडैर्मायामयैश्चौरवत्,
मुक्तिः स्यान्मम सत्वरं कथमतः सद्वृत्तवित्तं विना ॥ ३९ ॥

दुष्प्रापं मकराकरे करतलाद्रत्नं निमग्नं यथा,
संसारेऽत्र तथा नरत्वमथ तत्प्राप्तं मया निर्मलम् ।
भ्रातः! पश्य विमूढतां मम हहा !! नीतं यदेतन्मुधा,
कामक्रोधकुबोधमत्सरकुधीमायामहामोहतः ॥ ४० ॥

येनेह क्षणभङ्गुरेण वपुषा क्लिन्नेन सर्वात्मना,
सद्व्यापारवियोजितेन परमं निर्वाणमप्याप्यते ।
प्रीतिस्तेन हहा !! सखे ! प्रियतमावक्त्रेन्दुरागोद्भवा,
क्रीता स्वल्पसुखाय मूढमनसा कोट्या मया काकिणी ॥ ४१ ॥

क्रीडाकारि परोपहासवचनं तुष्ट्यै परव्यंसनं,
कान्ता काञ्चनसुन्दराङ्गलतिका कान्तैव पृथ्वीतले ।
भव्यो द्रव्यसमर्जने किल महारम्भोद्यमः किन्तु रे !,
भेदच्छेदनताडनादिविधिना रौद्रो महारौरवः ॥ ४२ ॥

कन्दर्पप्रसरप्रशान्तिविधये शीलं न संशीलितं,
लोभोन्मूलनहेतवे स्वविभवो दत्तो न पात्रे मुदा ।
व्यामोहोन्मथनाय सद्गुरुगिरां तत्त्वं न चाङ्गीकृतं,
दुष्प्रापो नृभवो मया हतधिया हा ! हारितो हारितः ॥ ४३ ॥

सौख्यं मित्रकलत्रपुत्रविभवभ्रंशादिभिर्भङ्गुरं,
कासश्वासभगन्दरादिभिरिदं व्याप्तं वपुर्व्याधिभिः ।
भ्रातस्तूर्णमुपैति सन्निधिमसौ कालः करालाननः,
कष्टं किं करवाण्यहं तदपि यच्चित्तस्य पापे रतिः ॥ ४४ ॥

संसारे गहनेऽत्र चित्रगतिषु भ्रान्त्याऽनया सर्वथा,
रे रे जीव ! न सोऽस्ति कश्चन जगन्मध्ये प्रदेशो ध्रुवम् ।

यो नाप्तस्तव भूरिजन्ममरणैस्तत्किं न तेऽद्यापि ही !,
निर्वेदो हृदि विद्यते ? यदनिशं पापक्रियायां रतिः ॥ ४५ ॥

नो स्कन्धेन समुन्नतेन धरसे चारित्रगन्त्र्या धुरं,
पृष्ठेनोपचितेन नैव वहसे प्रोच्चैरहिंसाभरम् ।
मिथ्यात्वान्नचयं पदाहतिवशाद्रो ! गाहसे त्वं यत-
श्चेतस्तद्गतशङ्क ! साङ्कवृषवन्निन्द्यं परिभ्राम्यसि ॥ ४६ ॥

प्राप्ते सत्कुलजन्ममानवभवे निर्दोषरत्नोपमे,
नीरोगादिसमस्तवस्तुनिचये पुण्येन लब्धे सति ।
नोपात्तं किमपि प्रमादवशतस्तत्त्वं त्वया मुक्तये,
रे ! जीवात्र ततोऽतिदुःखविषमे संसारचक्रे भ्रमः ॥ ४७ ॥

क्रोधो न्यक्कृतिभाजनं न विहितो नीतो न मानः क्षयं,
माया नैव हता हताश ! नितरां लोभो न सङ्क्षोभितः ।
रे ! तीव्रोत्कटकूटचित्तवशगस्वान्त ! त्वया हारितं,
हस्ताप्तं फलमांशु मानवभवश्रीकल्पवृक्षोद्भवम् ॥ ४८ ॥

बाल्ये मोहमहान्धकारगहने मग्नेन मूढात्मना,
तारुण्ये तरुणीसमाहृतहृदा भोगैकसङ्गेच्छुना ।
वृद्धत्वेऽपि जराऽभिभूतकरणग्रामेण निःशक्तिना,
मानुष्यं किल दैवतः कथमपि प्राप्तं हतं हा ! मया ॥ ४९ ॥

यस्मै त्वं लघु लङ्घसे जलनिधिं दुष्टाटवीं गाहसे,
मित्रं वञ्चयसे विलुम्पसि निजं वाक्यक्रमं मुञ्चसि ।
तद्वित्तं यदि दृश्यते स्थिरतया कस्यापि पृथ्वीतले,
रे रे !! चञ्चलचित्त ! वित्तहतक ! व्यावर्त्ततां मे तदा ॥ ५० ॥

अज्ञानाद्रितटे क्वचित्क्वचिदपि प्रद्युम्नगर्त्तान्तरे,
मायागुल्मतले क्वचित्क्वचिदहो ! ! निन्दानदीसङ्कटे ।

मोहव्याघ्रभयातुरं हरिणवत्संसारघोराटवी-
मध्ये धावति पश्य सत्वरतरं कष्टं मदीयं मनः ॥ ५१ ॥

सच्चारित्रपवित्रदारुरचितं शीलध्वजालङ्कृतं,
गुर्वाज्ञागुणगुम्फनाद् दृढतरं सद्बोधपोतं श्रितः ।
मोहग्राहभयङ्करं तर महासंसारवारांनिधिं,
यावन्न प्रतिभिद्यते स्तनतटाघातैः कुरङ्गीदृशाम् ॥ ५२ ॥

किं भस्मप्रतिलेपनेन ? वपुषो धूमस्य पानेन ? किं,
वस्त्रत्यागजुगुप्सया किमनया ? किं ? वा त्रिदण्ड्याऽप्यहो !! ।
किं स्कन्धेन नतेन ? कम्बलभराज्जापस्य किं ? मालया,
वामाक्षीमभिधावमानमनिशं चेतो न चेद्रक्षितम् ॥ ५३ ॥

रोद्धुं बालमृणालतन्तुभिरसौ मत्तेभमुज्जृम्भते,
भेत्तुं वज्रमयं शिरीषकुसुमप्रान्तेन सन्नह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते,
नेतुं वाञ्छति यः सतां पथि खलान्सूक्तैस्सुधास्यन्दिभिः ॥ ५४ ॥

मुक्त्वा दुर्मतिमेदिनीं गुरुगिरा संशील्य शीलाचलं,
बद्ध्वा क्रोधपयोनिधिं कुटिलतालङ्कां क्षपित्वा क्षणात् ।
नीत्वा मोहदशाननं निधनतामाराध्य वीरव्रतं,
श्रीमद्राम इव क्व मुक्तिवनितायुक्तो भविष्याम्यहम् ? ॥ ५५ ॥

आहारैर्मधुरैर्मनोहरतरैर्हारैर्विहारैर्वरैः,
केयूरैर्मणिरत्नचारुशिखरैर्दारैरुदारैश्च किम् ? ।
प्राणान्पद्मदलाग्रवारितरलाञ्ज्ञात्वा जवाज्जीव ! रे,
दानं देहि विधेहि शीलतपसी निर्वेदमास्वादय ॥ ५६ ॥

ज्ञात्वा बुद्बुदभङ्गुरं धनमिदं दीपप्रकम्पं वपु-
स्तारुण्यं तरलेक्षणाक्षितरलं विद्युच्चलं दोर्बलम् ।

रे रे जीव ! गुरुप्रसादवशतः किञ्चिद्विधेहि द्रुतं,
दानध्यानतपोविधानविषयं पुण्यं पवित्रोचितम् ॥ ५७ ॥

श्रीखण्डपादपेनेव, कृतं स्वं जन्म निष्फलम् ।
जिह्मगानां द्विजिह्वानां, सम्बन्धमनुरुन्धता ॥ ५८ ॥

किं ? तर्केण वितर्कितेन शतशो ज्ञातेन किं ? छन्दसा,
किं ? पीतेन सुधारसेन बहुधा स्वाध्यायपाठेन किम् ? ।
अभ्यस्तेन च लक्षणेन किमहो ! ! ध्यानं न चेत्सर्वथा,
लोकालोकविलोकनैककुशलं ज्ञानं हृदि ब्रह्मणः ॥ ५९ ॥

मां बाल्यादपि निर्निमित्तनिबिडप्रोद्भूतसख्यश्रियं,
दम्भारम्भ ! विहाय सत्वरतरं दूरान्तरं गम्यताम् ।
पश्योन्मीलति मेऽधुना शुभवशाज्ज्ञानोष्णरश्मिप्रभा,
प्रालेयोत्करवद्भवन्तमनया द्रक्ष्याम्यहं त्वां कथम् ? ॥ ६० ॥

कारुण्यान्न सुधारसोऽस्ति हृदयद्रोहान्न हालाहलं,
वृत्तादस्ति न कल्पपादप इह क्रोधान्न दावानलः ।
सन्तोषादपरोऽस्ति न प्रियसुहृल्लोभान्न चान्यो रिपु-
र्युक्तायुक्तमिदं मया निगदितं यद्रोचते तत्त्यज ॥ ६१ ॥

औचित्यांशुकशालिनीं हृदय ! हे शीलाङ्गरागोज्ज्वलां,
श्रद्धाज्ञानविवेकमण्डनवतीं कारुण्यहाराङ्किताम् ।
सद्बोधाञ्जनरञ्जिनीं परिलसच्चारित्रपत्राङ्कुरां,
निर्वाणं यदि वाञ्छसीह परमक्षान्तिप्रियां तद्भज ॥ ६२ ॥

यत्रार्त्तिर्न मतिभ्रमो न न रतिः ख्यातिर्न नैवोन्नतिः,
न व्याधिर्न विधिर्निधिर्न न वधो ध्यानं न नाध्येषणा ।
नो दास्यं न विलासवाससदनं हास्यं न लास्यं च नो,
तत्सांसारिकपुण्यपापरहितं ध्येयं पदं धीधनाः ! ॥ ६३ ॥

तावद्भानुकराः प्रकाशनपरा यक्षेश्वरोऽप्यर्थवान्,
सम्पूर्णेन्दुमुखी प्रिया प्रियमयी माधुर्यहृद्या सुधा ।
मुक्तादामगुणावलीपरिचितश्चैत्रस्य चित्रोत्सवो,
यावन्नैव विशन्ति हन्त !! हृदये सिद्धान्तवाक्योत्कराः ॥ ६४ ॥

क्षणमपि न यस्य तिष्ठति, गुरूपदेशो नरेन्द्र इव हृदये ।
मन्त्ररहस्योद्‌गारी, मन्त्रीव स दूरतस्त्याज्यः ॥ ६५ ॥

धर्मो यैर्निहतः प्रमादवशतः प्राप्तेऽपि मानुष्यके,
कार्पण्येन विडम्बितौ सति धने यैरर्थकामावपि ।
अत्यन्तं चलचित्तनिग्रहपरैरप्याप्यते वा न वा,
मोक्षः शाश्वतिकः प्रसादसदनं तेषां दवीयान्पुनः ॥ ६६ ॥

आकाशेऽपि चिराय तिष्ठति शिला मन्त्रेण तन्त्रेण वा,
बाहुभ्यामपि तीर्यते जलनिधिर्वेधाः प्रसन्नो यदा ।
दृश्यन्ते ग्रहयोगतः सुरपथे प्राह्णेऽपि ताराः स्फुटं,
हिंसायां पुनरस्ति नियतं गन्धोऽपि न श्रेयसः ॥ ६७ ॥

निशानां च दिनानां च, यथा ज्योतिर्विभूषणम् ।
सतीनां च यतीनां च, तथा शीलमखण्डितम् ॥ ६८ ॥

मायया राजते वेश्या, शीलेन कुलबालिका ।
न्यायेन मेदिनीनाथः, सदाचारतया यतिः ॥ ६९ ॥

यावद्व्याधिविबाधया विधुरतामङ्गं न संसेवते,
यावच्चेन्द्रियपाटवं न हरति क्रूरा जराराक्षसी ।
तावन्निष्कलनिश्चलामलपदं कर्मक्षयायाधुना,
ध्येयं ध्यानविचक्षणैः स्फुटतरं हृत्पद्मसद्मोदरे ॥ ७० ॥

अज्ञानावृतचेतसो मम महाव्यामूढतां मोहतां,
कृत्वा धर्मधनं हृतं यदनिशं वाराणसीधूर्त्तवत् ।

युक्तं तद्विहितं त्वयेदमपि ते युक्तं भवेद्धि व्रतं,
मां पुण्याप्तगुरुप्रसादमधुना सन्त्यज्य निर्गच्छ रे ! ॥ ७१ ॥

तन्नो नागपतेर्भुजङ्गवनिताभोगोपचारैः परै-
स्तन्नो श्रीसविलाससङ्गमशतैः सारैर्मुरारेः किल ।
तन्नो वज्रधरस्य देववनिताक्रीडारसैर्निर्भरै-
र्यत्सौख्यं बत वीतकाममनसां तत्त्वार्थतो योगिनाम् ॥ ७२ ॥

मध्यक्षामतया योषित्तपःक्षामतया यतिः ।
मुखक्षामतया चाश्वो, राजते न तु भूषणैः ॥ ७३ ॥

तन्व्या श्रोत्ररसायनेन वचसा सप्रेमसम्भाषितः,
सर्पत्कोपविपाकपाटलरुचा संवीक्षितश्चक्षुषा ।
सद्योगान्न तिलाग्रमात्रमपि यः सङ्क्षोभितुं शक्यते,
रागद्वेषविवर्जितो विजयते कोऽप्येष योगीश्वरः ॥ ७४ ॥

आताम्रायतलोचनातुरमिदं न्यक्कारवाङ्निन्दितं,
बद्धभ्रू कुटिभालभीममधरप्रस्पन्ददुर्दर्शनम् ।
व्यालोलालकसङ्कुलं कृशतनोः कोपेऽपि कान्तं मुखं,
पश्यन्ति स्मरविह्वलीकृतहृदो ही ! कामिनां मूढता ॥ ७५ ॥

कौशल्यं प्रविलीयते विकलता सर्वाङ्गमाश्लिष्यते,
ज्ञानश्रीः प्रलयं प्रयाति कुमतिः प्रागल्भ्यमभ्यस्यति ।
धर्मोऽपि प्रपलायते कलयति स्थेमानमंहः परं,
यस्माच्छोकवशात्कथं स विदुषां संसेवितुं युज्यते ? ॥ ७६ ॥

क्व? कफार्तं मुखं नार्याः, क्व? पीयुषनिधिः शशी ।
आमनन्ति तयोरैक्यं, कामिनो मन्दबुद्धयः ॥ ७७ ॥

पाशे कुरङ्गनिवहो न पतत्यविद्वान्,
दाहात्मतामकलयञ्छलभः प्रदीपे ।

जानन्नहं पुनरमून् करीकर्णलोलान्,
भोगाँस्त्यजामि न तथापि क एष मोहः ? ॥ ७८ ॥

ज्ञानमेव परं मित्रं, काम एव परः परः ।
अहिंसैव परो धर्मो, योषिदेव परा जरा ॥ ७९ ॥

धिक्कन्दर्प ! जगत्त्रयीविजयिनो दोःस्थामविस्फूर्जितं,
विद्वान्कः किल तावकीनमधुना व्यालोकतामाननम् ।
दृष्ट्वा यौवनमित्रमत्रपभवान्सर्पज्जराराक्षसी–
वक्त्रान्तःपतितं विमुञ्चति न यः कोदण्डकेलिक्रमम् ॥ ८० ॥

तृष्णावारितरङ्गभङ्गविलसत्कौटिल्यवल्लीरुह–
स्तिर्यक्प्रेक्षितवाक्प्रपञ्चकबरीपाशभ्रुवः पल्लवाः ।
यस्या मान्ति न तुच्छके हृदि ततः स्थानं बहिः कुर्वते,
कस्ताश्चञ्चलचक्षुषः कुशलधीः संसेवितुं वाञ्छति ? ॥ ८१ ॥

रे रे मोह ! हताश ! तावकमिदं धिक्पौरुषोज्जृम्भितं,
विस्रब्धं भवसागरे किल भवान्संयम्य मां क्षिप्तवान् ।
सम्प्रत्याप्तगुरूपदेशफलकः पारं प्रयातोऽस्म्यहं,
शौण्डीर्यं तव विद्यते यदधुना दोष्णोस्तदा दर्शय ॥ ८२ ॥

रे कन्दर्प ! किमाततज्यमधुना धत्से ? धनुस्त्वं मुधा,
किं भ्रूलास्यकलासु पक्ष्मलदृशः प्रागल्भ्यमभ्यस्यथ ? ।
वैराग्याम्बुजिनीप्रबोधनपटुः प्रध्वस्तदोषाकरः,
खेलत्येष विवेकचण्डकिरणः कस्त्वादृशामुत्सवः ? ॥ ८३ ॥

अन्यं प्रियालापपथं नयन्ते, किञ्चित्कटाक्षैरपरं स्पृशन्ति ।
अन्यं हृदा कञ्चन मन्त्रयन्ते, धिग्योषितां चञ्चलचित्तवृत्तिम् ॥ ८४ ॥

याञ्चायै वचनक्रमं रचयतः पादौ परिभ्रान्तये,
नेत्रे रोषकषायितानि वदनान्यालोकितुं स्वामिनाम् ।

धातश्चेन्न दयालुता तव हृदि स्थानं बबन्ध क्षणं,
तत्किं हन्त ! परिश्रमोऽपि निकटीभूयं न सम्पन्नवान् ? ॥ ८५ ॥

रक्षाकृते धनलवस्य विमूढचेता,
लोकः परं किमपि सन्तनुते प्रयत्नम् ।
तल्लक्षकोटिभिरनाप्यमपीदमायुः,
कालो निकृन्तति न तन्ननु शङ्कतेऽपि ॥ ८६ ॥

बन्धो ! क्रोध ! विधेहि किञ्चिदपरं स्वस्याधिवासास्पदं,
भ्रातर्मान ! भवानपि प्रचलतु त्वं देवि माये ! व्रज ।
हंहो लोभसखे ! यथाऽभिलषितं गच्छ द्रुतं वश्यतां,
नीतः शान्तरसस्य सम्प्रति लसद्वाचा गुरूणामहम् ॥ ८७ ॥

मनो न वैराग्यतरङ्गितं चे-द्वृथा तदा दानतपःप्रयासः ।
लावण्यमङ्गे यदि नाङ्गनानां, मुधा तदा विभ्रमवल्गितानि ॥ ८८ ॥

विश्वाः कलाः परिचिता यदि तास्ततः किं ?,
तप्तं तपो यदि तदुग्रतरं ततः किम् ? ।
कीर्तिः कलङ्कविकला यदि सा ततः कि-
मन्तर्विवेककलिका यदि नोल्ललास ॥ ८९ ॥

स्फूर्जल्लोभकरालवक्त्रकुहरो हुङ्कारगुञ्जारवः,
कामक्रोधविलोललोचनयुगो मायानखश्रेणिभाक् ।
स्वैरं यत्र स बम्भ्रमीति सततं मोहाह्वयः केसरी,
तां संसारमहाऽटवीं प्रतिवसन्को नाम जन्तुः सुखी ? ॥ ९० ॥

एकः स वैवस्वत एव देवः, शौण्डीर्यशाली च महाव्रती च ।
पशौ च गीर्वाणपतौ च यस्या-विभिन्नमुद्रस्य दृशः पतन्ति ॥ ९१ ॥

एतानि तानि मदनज्वलनेन्धनानि,
दूरीकुरुष्व मयि वक्रविलोकितानि ।

उन्मीलति स्म ललिताङ्ग्यधुना स एव,
मन्मानसे शुचिविवेककलाविलासः ॥ ९२ ॥

प्रत्यक्षो नरकः स एष वसुधापीठे परायत्तते-
त्येवं पूत्कुरुते जनः प्रतिकलं सर्वोऽपि विद्वानिह ।
तन्नारीवशवर्त्तिनोऽपि विषयान्कण्डूतिकल्पानयं,
रोमाञ्चाङ्कुरचर्चिताङ्गलतिकः किं नाम नैवोज्झति ? ॥ ९३ ॥

ता एवैताः कुवलयदृशः सैष कालो वसन्त-
स्ता एवान्तःशुचिवनभुवस्ते वयं ते वयस्याः ।
किन्तूद्भूतः स खलु हृदये तत्त्वदीपप्रकाशो,
येनेदानीं हसति हृदयं यौवनोन्माददलीला ॥ ९४ ॥

को देवो ? वीततमाः, कः सुगुरुः शुद्धमार्गसम्भाषी ।
किं परमं विज्ञानं ?, स्वकीयगुणदोषविज्ञानम् ॥ ९५ ॥

यत्कारुण्यहिरण्यजं न न च यत्सन्मार्गताम्रोद्भवं,
नो यत्संयमलोहजन्म न च यत्संतोषमृत्स्नामयम् ।
यद्योग्यं न तपोविधानदहनज्वालावलीतेजसां,
सिद्धिं याति ? कथं नृधान्यनिकरस्तस्मिन् कुपात्रे श्रितः ॥ ९६ ॥

हे मोहाहतजीव ! हुं शृणु वचः श्रद्धाऽस्ति चेत्कथ्यतां,
प्राप्तं किञ्चन सत्फलं भवमहाऽटव्यां त्वया भ्राम्यता ।
भ्रातर्नैव तथाविधं किमपि तन्निर्वाणदं तर्हि किं,
शून्यं पश्यसि ? पङ्गुवन्ननु गतं नोपक्रमे तिष्ठति ॥ ९७ ॥

शौक्ल्ये हंसबकोटयोः सति समे यद्वद्गतावन्तरं,
कार्ष्ण्ये कोकिलकाकयोः किल यथा भेदो भृशं भाषिते ।
पैत्ये हेमहरिद्रयोरपि यथा मूल्ये विभिन्नार्धता,
मानुष्ये सदृशे तथाऽऽर्यखलयोर्दूरं विभेदो गुणैः ॥ ९८ ॥

त्वद्दृष्टिपातनिहताः खलु तेऽन्य एव,
धैर्यव्रतं सुतनु ! ये परिमार्जयन्ति ।
अन्ये त्वमी शुचिविवेकपवित्रचित्ता-
स्तत्किं विडम्बयसि ? मन्मथविभ्रमैः स्वम् ॥ ९९ ॥

सम्पत्स्यते ? मम कदाचन तद्दिनं किं,
सद्ध्यानरूढमनसः सततं भवेयुः ।
आनन्दबिन्दुविशदानि सुधामयानि,
यत्रेक्षितानि मयि मुक्तिमृगेक्षणायाः ॥ १०० ॥

ललितं सत्यसंयुक्तं, सुव्यक्तं सततं मितम् ।
ये वदन्ति सदा तेषां, स्वयं सिद्धैव भारती ॥ १०१ ॥

सिक्तः श्रीजिनवल्लभस्य सुगुरोः शान्तोपदेशामृतैः,
श्रीमन्नागपुरे चकार सदनं श्रीनेमिनाथस्य यः ।
श्रेष्ठी श्रीधनदेव इत्यभिधया ख्यातश्च तस्याङ्गजः,
पद्मानन्दशतं व्यधत्त सुधियामानन्दसम्पत्तये ॥ १०२ ॥

सम्पूर्णेन्दुमुखीमुखे न च न च श्वेतांशुबिम्बोदये,
श्रीखण्डद्रवलेपने न च न च द्राक्षारसास्वादने ।
आनन्दः स सखे ! न च क्वचिदसौ किं भूरिभिर्भाषितैः ?,
पद्मानन्दशते श्रुते किल मया यः स्वादितः स्वेच्छया ॥ १०३ ॥

गणिश्रीदर्शनविजयविरचितम्

# ॥ अन्योक्तिशतकम् ॥

वाग्देवीस्फुरदैङ्कृतिश्रितनमोमन्त्रापनिद्रस्मृति-
प्रोद्भूतप्रबलप्रभावपटलप्रौढीभवत्सत्सखः ।
कुर्वेऽन्योक्तिलसत्कवित्वशतकं विद्वत्सभारञ्जनं,
नत्वा सत्त्वशिवङ्करं विनयतः श्रीपार्श्वतीर्थङ्करम् ॥ १ ॥

रत्नाकरोऽसि कमलाजनकोऽस्यमान-
मानोऽसि निर्मलसुधारसपेशलोऽसि ।
दत्सेम्बुबिन्दुमपि नो तृषितस्य तत्किं,
सन्दर्शयन् वदनमर्णव ! लज्जसे न ॥ २ ॥

संवर्धमानकमलोदयशालिनस्ते
व्रीडापि किं जलनिधे ! हृदि नाभ्युदेति ।
धत्से पुरो यदवलोककलोकपङ्क्ते-
र्डिण्डीरदारुतृणकाणवराटकानि ॥ ३ ॥

सितच्छदं विकस्वरस्फुरदनेकपङ्केरुहं
सरोवरमनाविलोज्ज्वलजलं विलासोचितम् ।
अहारि विधिना परं सलिलदुग्धयोर्व्यक्तिकृ-
द्गुणस्तु तव सुस्थितस्तदिह सम्पदः पुष्कलाः ॥ ४ ॥

विश्वं लोकमहर्मणे स्वकिरणैरुद्योतयस्यन्वहं
बिभ्राणः सकलग्रहाधिपतितां तेजस्विनामग्रणीः ।
त्वं चेत्कोमलकेलिकाननमथो बब्बूलवृक्षादिकान्
कामं तुल्यतयैव तापयसि ते कामौचितीं ब्रूमहे ॥ ५ ॥

श्रीचन्दनद्रुम ! शिवानि भवन्तु तुभ्यं
निम्बोऽपि यन्निजसमो विहितोन्तिकस्थः ।

ये प्रोन्नता गुणभृतः किल निन्दनीयं
ते कुर्वते निजसमं ह्यविलम्बितेन ॥ ६ ॥

अपसर भ्रमर ! त्वमितो यदा-यतिशुभाय न ते सुरभिग्रहः ।
कुटिलकण्टककोटिभिरावृता मृतिमियं खलु केतकी दास्यति ॥ ७ ॥

तारस्वरेण परभृत निगदसि मध्वेव कारणं तत्र ।
अथ तर्हि तव महिमा विना वसन्तं यदि ब्रूयाः ॥ ८ ॥

परिमलनिलय समुज्ज्वल गुणाढ्य घनसार का प्रकृतिरेषा ।
बाह्याभ्यन्तरमलिनं यत्तिष्ठसि नो विनेङ्गालम् ॥ ९ ॥

तनोति तव विभ्रमं मणिमनोहरा मुद्रिका
त्यजंस्त्वमपि तां कथं करं न लज्जसे साम्प्रतम् ।
इयं तु गुणसुन्दरी यदुपसङ्गिनी भाविनी
तमेव खलु भूषयिष्यति विचारय स्वात्मना ॥ १० ॥

आकारेण सहाभिवर्धिततया वर्णेन रूपेण च
फुल्लच्छालिरसालशालशिखरस्थानासनेनापि च ।
रे काकोल दधासि साम्यमधुना पुंस्कोकिलेन स्मया-
दानेयो मधुरध्वनिः परमहो कस्यैषणाभिस्त्वया ॥ ११ ॥

मृगनाभिसौरभभरै-र्मुदितो न हि मारयति मां हरिः ।
हरिणेति विश्वसितहृद्गतेर्विरमैष येन न भवद्गुणवित् ॥ १२ ॥

किं खिद्यसे कोकिल ! वीक्ष्य काकं रसालशाखां परिशीलयन्तम् ।
तथा सृजैनं कलया कयाचिद्-यथा तया मन्यत एव नैषः ॥ १३ ॥

खिद्यस्व मा चम्पक ! मामुपैति सौरभ्यवन्तं मधुपो न यस्मात् ।
क्षुद्रः कियानेष यतो नरेन्द्रै-स्त्वं मौलिमाल्यं क्रियसे गुणज्ञैः ॥ १४ ॥

यैः शोभां समवापितोऽध्वगजनानन्दी च येभ्योऽभवः
सच्छायश्च विहङ्गयुग्मपटलीलीलानिवासास्पदम् ।

दूरं तान्यपि यद्दलानि विटपिन् ! विक्षेपयस्येष्यतां
पत्राणां स्पृहया दुराशय ! ततो धिक् तेऽधमं चेष्टितम् ॥ १५ ॥

सच्चक्रवाककलहंसकपोतकेकि-द्वन्द्वोपभोग्यविमलोदकपूरपूर्णे।
लोकं पुनात्यपि तृषामपि संहरन्ती धिक्त्वां नदि व्रजसि वक्रपथेन यत्त्वम्

कल्लोलिनीरमण यन्निजमङ्गजातमुत्सङ्गवर्धितमुदारगुणाभिरामम्।
निर्दोषशङ्खमपकर्षसि नैव किञ्चिद्दत्से च तेन महतस्तव नैव युक्तम् ॥१७

सारङ्ग! रागरसिको निजकीयशीर्षं धुन्वन्नमस्यसितरां च दधासि रागम्।
सर्वं वृथैव तव भक्तिमिमां न वेत्ति यल्लुब्धकोऽयमदयश्च गुणानभिज्ञः ॥१८

श्रीचन्दनस्तुविफलोऽपिजगज्जनानांनिष्कारणंस्ववपुषैवभिनत्तितापम्
भिल्लातक त्वमथ यत्पिटकान् विधत्से सम्पर्कतोपि दहसे विपरीतरीतिः ।१९

रक्षापीक्षुरसेन संश्रितवती स्वं स्वस्वरूपीकृता
मिष्टख्यातिमवापिता गुड इति श्रेयान् कनिष्ठोऽप्ययम् ।
निम्ब ! त्वं कटुकं फलं लघु पुरस्कुर्वन् श्रितानां द्विज-
श्रेणीनां तदतोऽधमाधम हि ते धिग्पर्युपास्तेः फलम् ॥ २० ॥

इयत्कालं त्वासीत्सरसकलिकापेशलफलैः
परिक्षीणस्तस्मात्त्वदुचित इति त्वञ्च वसतिम् ।
चकर्षाथान्यत्र द्विक विचर येनैष सफलो
रसालः सञ्जातस्तदिह पिकराजो विलसताम् ॥ २१ ॥

आः क्षुद्रावकराकरातिकठिनोच्चत्वप्रवृद्धस्मयो
निर्मास्युच्चतयातितुङ्गगिरिणा साकं तुलामुद्धतः ।
बीभत्सः क्व भवान् क्व एष बहुलच्छेकालिलीलागृहं
स्फूर्जत्तालतमालसालबकुलादिद्रूल्लसद्विभ्रमः ॥ २२ ॥

उत्तुङ्गशैल! भवतः प्रणिताप आस्तां नन्दन्तु पेशलरसालमुखाश्च वृक्षाः।
आसादितैव सकलाभिमतार्थसिद्धिर्नोपद्रुतं मम यतः किल हिंस्रजीवैः ।२३

अभ्रं समीक्ष्य शरदभ्रमनोहरश्रि याचस्व मा चतुरचातक! चाटुवाचा।
अस्माद् वृथोन्नतिमतस्तव नास्ति सिद्धिर्निस्सार एष भवतो विफल: प्रयास: ।२४

ज्ञात्वा भवन्तममलं परिशीलनाय प्राप्ता: सरोवर! वयं खलु राजहंसा: ।
प्रादुष्कृतं च कलुषं प्रथमं त्वयाम्बु सेव्यं सर: सहजनिर्मलमानसं न: ।२५

येषामङ्कतले चिराय विलुठन् बालोऽपि वृद्धोऽभव:
स्वादंस्वादमुदारपल्लवदलश्रेणीरियद्वासरान् ।
यस्या: स्वादुपय:प्रवाहपटलै: क्रीडामकार्षी: करिन्
मथ्नंस्तानथ पादपांश्च सरित: कूलं न किं लज्जसे ॥ २६ ॥

रे रे बलाहक ! मनोज्ञमरालमालामध्याधिवासकतया बुबुधे जनस्त्वाम् ।
हंसं तत: स्मयभरं ननु मा कृथास्त्वं शोभानिदानमिदमीयगुणानुभाव:

निश्शेषेषु सरस्सु शैवलमिलज्जम्बालजालं जलं
पर्जन्यै: सुकुमारपङ्कजवनं निर्मूलमुन्मूलितं ।
आधारस्त्वमथैव मानससर: संसेव्यमस्मादृशा-
मेकं पङ्कजपेशलं न हि ततो धार्यं त्वया शैवलम् ॥ २८ ॥

बाह्यामम्बरधारिण: परिमलभ्रष्टान् प्रफुल्लानिमा-
नुद्वीक्ष्य प्रसवांश्च शाल्मलितरो: श्रीराजहंसोत्तम ! ।
नीरक्षीरविवेचकोऽपि निपुणप्रष्ठोऽपि पद्माशया
भ्रान्तस्त्वं तमभिव्रजन्नसि तदा शिक्षाथ केषामिह ॥ २९ ॥

अस्मिन् जीवहितावहे जलधरे दानैकनिष्ठे पय:-
पूरै: पूर्णमिलातलं रचयितुं बद्धादरे सत्यपि ।
रे चण्डानिल ! यद्दिशोदिशमयं दूरं त्वया क्षिप्यते
प्राणिप्रौढमनोरथै: सह तदा क्षुद्र ! क्षयं प्राप्नुहि ॥ ३० ॥

तापयसि जगदशेषं तत्ते चरितं न सुन्दरं शूर ! ।
भुवनप्रकाशको य-न्मित्रमसि त्वं जगच्चक्षु: ॥ ३१ ॥

अम्भोधर ! त्वमधुनाम्बु जनाय नो यद्दत्से तदेष भवतावसरो न लभ्यः ।
काले प्रचण्डपवनप्रहतस्य यस्मान्न त्वं न चाम्बुकणिकाप्युपकारकृत्ते

श्रीपुष्करावर्तमुखा विदध्युः–स्त्वत्पूर्वजाः सत्वरमम्बुवृष्टिम् ।
तद्वंशजन्माप्यधुना विलम्ब्य दत्सेऽम्बु धाराधर ! तन्न युक्तम् ॥ ३३ ॥

अयि सितच्छदसुन्दर ! मा कृथाः खलबलाहकपङ्क्तिगतः सखे ।
निजगुणान् प्रकटयन् यदयं गणो न गुणविद्विगुणो गुणमत्सरी ॥ ३४ ॥

नो वारिवाह ! पयसः स्पृहयालुतास्यत्वत्तस्तु तुष्यति परं मधुरोक्तिभिर्यः
कस्ते त्वदेकशरणं शिखिनं वयस्यं यद्गर्जितैरपि विनोदयितुं विलम्बः

रे रे कुरङ्गवर ! निर्झरनीरधारामाकण्ठमापिब सखे ! खलु सम्प्रति त्वम् ।
एषापि दुर्लभतरा पुरतः प्रसर्पत्युष्णे खले मरुति यत् क्व पयोलवोऽपि

पश्यन् वक्रदशां परस्य चरितं धूर्तावलीग्रामणीः
काकस्त्वं कपटी पशून् वृणवतश्चञ्चुप्रहारैस्तुदन् ।
अक्षुद्रप्रकृतील्लघूनपि खगानुद्वासयंश्छद्मना ।
तस्मात्कौशिक एक एव भवतः शिक्षाप्रदानक्षमः ॥ ३७ ॥

रेचञ्चरीक ! तुदतीं कटुकण्टकौघैर्यत्केतकीं भजसि रक्तमनस्क धिक्त्वाम्
प्रख्यापयन् परिमलैकगुणं जनेषु सन्तं घनास्वपि जपादिकगुल्मिनीषु । ३८

किं प्रतारयसि चातकं भवत्कल्पितैकशरणं शरद्घन ! ।
ऊर्जितैरतनुगर्जितैश्च किं बिन्दुमात्रमपि नो ददासि चेत् ॥ ३९ ॥

विन्ध्योर्वीधरसल्लकीकवलनं तां शर्मदां नर्मदां
स्वच्छस्वादुपयःप्रभूतलहरीलीलावतीं च स्मरन् ।
आः किं भद्र ! गजेन्द्र ! दुर्बलतनुस्त्वं चिन्तया जायसे
यद्दैवात्समुपस्थितं तदखिलं धैर्यात्क्षमस्वाधुना ॥ ४० ॥

प्रीणयस्यमृतदीधिते द्युता निर्विशेषमखिलं जनं पुनः ।
किं विनाशितमनेन तत्र–यच्चक्रवाककुलमर्दयस्यदः ॥ ४१ ॥

विदुरैस्तुलितोऽसि वल्ल चेद्-घनसारेण समं स्वकार्यतः ।
युवयोः परमन्तरं मिथो बहुलं मदं तेन प्रयाहि मा ॥ ४२ ॥

किं हस्तिनि द्विरदमङ्गजमात्मनीनं प्रख्यापयस्यनुदिनं बलिनं च शूरम्।
यद्यस्त्ययं बहुबली बहुतस्तथापि किं षोडशीमपि कलां लभतामिभारेः ।४३

रे चक्रवाक! भवतो न वियोगदुःखं सूर्येण भिन्नमथ तस्य किमुक्तिरत्र।
किं निष्फलां स्मृतिमहर्निशमेतदीयां निर्मासि निस्त्रप! तथापि विचारमूढ ।४४

क्षीरोदकव्यक्तिकरोऽसि हंस मा भूरहङ्कारमनास्तथापि।
तद्व्यक्तिकर्त्री भुवि मक्षिकापि कापि समस्ति खलु सम्प्रति दुग्धलुब्धा ।४५

धिग्विधे ! तव विधानकौशलं पङ्क्तिभेदभवपातकाशुचेः ।
श्रीयुतो विहित एकको नरो निर्धनो बत विलोक्यते परः ॥ ४६ ॥

लोकैर्यष्टिप्रभृतिभिरपि व्याहता न त्यजन्ति
स्वस्थानं ये कदशनलयाः कुर्कुराद्याः परे ते ।
ये तिष्ठन्ति व्यपगतभयं सानुमत्कन्दरासु
न्यक्कारेऽपि क्रुधितमनसस्ते वयं पञ्चवक्त्राः ॥ ४७ ॥

चतुरहृदयहारिणी गतिस्ते वपुषि बलं च महत्त्वमप्रमाणम् ।
गजवर ! दलमण्डनं तथापि क्षिपसि रजः शिरसीति किं चरित्रम् ४८

परिशीलयसीह किं सरो बहुसेवालमलं सितच्छद ! ।
यदि दास्यति शैवलादि तद् भविता प्रत्युत ते त्रपाकरम् ॥ ४९ ॥

म्लानाम्बुजानि कलुषोदकशैवलानि चक्रे सरांस्यथ मरिष्यति हंसवर्गः।
मा चिन्तयेति घन! यत्कनकाब्जवन्ति भूयांसि मानससरःप्रमुखान्यमुष्य

आजन्मावधिनिर्मितातिबहला शाखाप्रशाखादलै-
श्छाया यैः परिशीलितं जलधिगे तीरं पुनस्तावकम् ।
तानुन्मूलयसि प्रवर्धितपयोलक्ष्म्याभिवृद्धस्मया
यद्दानावसरेऽपि तेन बत ते धन्या गुणज्ञातृता ॥ ५१ ॥

मृगतृष्णिकेव च मुधा निजरागं दर्शयन्निह पलाश ! कथं त्वम् ।
विप्रतारयसि पान्थजनानां नासि किञ्चिदपि दातुमलं वै ॥ ५२ ॥

अधःसञ्चितानन्तनीरोऽपि कूप ! प्रदत्सेम्बु रज्ज्वादियन्त्रप्रयासात् ।
स्ववारेऽपि नीचैर्व्रजन् किं यदेतत् प्रभूतं जलं नीरवाहप्रसादात्॥ ५३ ॥

कोकिल ! त्वमपरत्र विहारं साम्प्रतं वितनु येन रसालः ।
फाल्गुनाधमसमीरणसङ्गो मञ्जरीप्रभृति दास्यति नैव ॥ ५४ ॥

कण्ठीरव ! प्रौढपराक्रमोऽपि ख्यातिं दधानो मृगराजनाम्नीम् ।
वार्तास्तु दूरे मृगपोषणस्य कियद् बलं ते हननेऽपि तेषाम् ॥ ५५ ॥

हरिचन्दन ! मा कृथा वृथा ननु चिन्तां मलयाचलोज्झित ! ।
भवितादरणीयता यतो भवतस्तापभिदः पदे पदे ॥ ५६ ॥

अनिशं सहकारमञ्जरीं कलकण्ठ ! स्मरसीह किं वृथा ।
समयं परिहाय नो यतो भवतः संस्मृतितः समेति सा ॥ ५७ ॥

परिशीलयितुं समुत्सुकः सरसं चूततरुं विहाय किम् ।
शुक ! कुष्ठफलं यतस्त्यजे-न्न कठोरत्वमिदं कदाचन ॥ ५८ ॥

चाटूनि किं गदसि चातकपोत ! मिथ्या द्वित्राम्बुबिन्दुकृतयेम्बुधरस्य भाग्यम्
चेदस्त्यवन्ध्यमिह ते तटिनीव तर्हि भूयस्तरं जलमवाप्स्यसि वारिवाहात्

अपरत्र मराल ! साम्प्रतं विचरैतन्न सरोवरं सखे ! ।
बहुलाटिबकोटटिट्टिभै-र्यत्स्वाधीनमिदं विनिर्मितम् ॥ ६० ॥

नानाप्रकारैः परिशीलय त्वं मधुव्रतामुं मुकुलं नलिन्याः ।
परं कदाचित्समये विरूपे प्राप्ते यदस्या भवितैव बन्धः ॥ ६१ ॥

मुह्यसे भ्रमर ! किं हृदि स्मरन् कोमलां कमलिनीमिमां यतः ।
त्वं गमिष्यसि वयस्य ! तत्र सा-वश्यमस्त्यनुसरोऽनुकाननम् ॥ ६२ ॥

बालान् विश्वसितान् यथेष्टसलिलैः सिक्तान् तनुभूरुहान्
संवर्ध्य प्रथमं त्वदेकशरणानात्मीयतीरोद्गतान् ।

उन्मूल्य क्षिपसि क्षणेन बहुलैर्दूरे जलप्लावनै-
र्गर्विष्टेम्बुदवृष्टिवर्धितजला धिक् त्वां ततो निम्नगे ॥ ६३ ॥

अम्भोऽर्पणव्यसनतस्तु पिपासितानां ग्रीष्मेऽप्यसज्जलधिगे खनितापि दत्ते
पानीयबिन्दुमपि पेयमयं भक्त्या दत्ते परं न रमणः कृपणः समुद्रः ६४

अयि कीरकुञ्जर कथं न हि ते भवति त्रपा फलितचूततरुम् ।
शुभगोस्तनीं च कदलीं सरसां परिहाय निम्बफलमत्सि यतः ॥ ६५ ॥

द्विरदाः प्रचुरा इमे ममे-ति धिया विन्ध्यगिरे जहासि किं ।
दलमण्डनतां भजन्त्यमी पुनरेभिर्भविता तवैव हानिः ॥ ६६ ॥

आननमभितो यदसि त्र्यधिकत्रिंशत्सुपर्वकोटीनाम् ।
अद्यास्तच्च ततोऽनल ! युक्तं यत्त्वं सर्वतोभक्षी ॥ ६७ ॥

विन्ध्याचलेन गजराज ! यथा प्रसूत-
स्त्वं कर्षितस्तव तथापि न कापि हानिः ।
यद्यस्ति ते परचमूदलनाय शक्तिः,
कल्याणिनी खलु नृपादरणीयता च ॥ ६८ ॥

स्वकपोलमदैः प्रलोभित-श्चिरमेष प्रथमं मधुव्रतः
तमथो गजराज ! निघ्नतो न हि लज्जापि समभ्युपैति ते ॥ ६९ ॥

दविष्टसन्दर्शितरम्यरूपं तुङ्गं महान्तं बत सानुमन्तम् ।
मावापिथाः पान्थ ! समीक्ष्य मोहं दृषन्मयोऽयं कठिनो यदस्ति॥ ७० ॥

श्रीखण्डरक्षणकृते परितो भुजङ्गैर्वृत्तिं करोषि मलयाचल मत्सरी सन् ।
मिथ्यैव सा हि गुणिनो यदि वा निरुद्धास्तत्किं निरुद्ध इदमीयगुणज्ञलोकः

किं खिद्यसे भ्रमर ! कण्टकिपङ्कजिन्या
मुद्राणकोशकुहरे पतितः प्रसह्य ।
यच्छाद्यहार्दमनया बहु दर्शयित्वा
त्वद्भ्रातरः किल वयस्य ! न पातिताः के ॥ ७२ ॥

नलिनि त्वमर्तिमथ मैव कृथा नवरङ्गभाजि कनकद्रुसुमे ।
मनुते रतिं मधुकरः किल यत्र हि कः कलाविह नवाभिमुखः ७३

नक्रासन्नीकृतोऽपि स्वकरसरसिजद्वन्द्वमास्थापितः सन्
भूयोभूयोऽर्थितोऽपि त्वमथ न हि कदाप्यत्र सौरभ्यलेशम् ।
दत्से हे काकतुण्ड ! प्रकृतिखरतरस्तेन जाज्वल्यमान-
ज्वालाजिह्वे न दग्धः सकलमपि हहा हारयिष्यस्यवश्यम् ॥ ७४ ॥

त्रयस्त्रिंशत्कोटित्रिदशमुखमग्ने पुनरपि
प्रतीतिं बिभ्राणस्त्रिदशपरपर्यायजनिताम् ।
प्रकुर्वन्तं सेवामपि दहसि होतारमधमः
क्षणं स्पृष्टो युक्तं न हि भवति तेजस्विन इदम् ॥ ७५ ॥

ददन् जलं त्वं स्मयतोऽरघट्ट ! किं चाकचिक्यं कुरुषेऽल्पदायिन् ।
यदेनमालोकय वारिवाहं जलस्थलैकीकरणं क्षणेन ॥ ७६ ॥

रेवानदीसलिलविन्ध्यमहीध्रजातसत्सल्लकीविपिनकेलिरनेकपस्य ।
आत्ता त्वया द्रुहिण ! किं त्विदमीयमेव क्षिप्रप्रभञ्जनबलं त्वयका ह्रियेत

फलाशया मालिक ! आलवाल उप्त्वा भवन्तं पयसाभिषिञ्चन् ।
कृत्वा वृतिं प्रागवति स्म यत्नात् फलेन वन्ध्यः किमभूरथाम्र ॥ ७८ ॥

कण्ठीरवाकुण्ठकठोरवीर्य ! भवान् समर्थोऽपि किमर्थकारी ।
त्वत्तोऽल्पशौर्या अपि सैरभेयाः परोपकारं रचयन्ति लोके ॥ ७९ ॥

बालेय शाड्वलयवानधिगम्य पृष्ठे गण्डोलयन् किमधुना वहसेऽभिमानम्
यत्सर्वदैतदशनाः कुलजास्तुरङ्गास्त्वं तूज्झितावकरशुष्कतृणैकभोजी८०

सरसं शुभवर्णमुत्तमं फलमासाद्य मदो विधीयते ।
किम्पाकद्रुम किं त्वया सदा विषमिश्रितमन्तर्दुरात्मना ॥ ८१ ॥

समानलक्ष्मीण्यपि चैकपङ्क्ति-गतानि पद्मानि च कैरवाणि ।
स्मेराणि मुद्राणि सृजन् सहस्र-भानो ! न युक्तं तव पङ्क्तिभेदिन् ! ८२

एकारण्यनिवासिनः सहचरीभूतस्य दुष्टात्मनो
भल्लूकस्य विमुग्धरञ्जनवचोलालित्यमातन्वतः ।
हे सारङ्ग ! न विश्वसे ऋजुमते ! येनैष मित्राण्यपि,
द्रुह्यत्यर्जितकैतवो न हि कृते भद्रेऽपि भद्रङ्करः ॥ ८३ ॥

यदि समयवशादयं द्विरेफो विलसति कासकरीरकिंशुकेषु ।
न हि मुदमदसीयमानसं तु स्पृशति विना मृदुमालतीप्रसूनम् ॥ ८४ ॥

पुरा नर्मदानिम्नगाकेलिभाजो द्विपास्तर्जनामात्रकेऽप्यक्षमा ये ।
क्षमन्तेऽधुना तेऽप्यहो दैवयोगा–ज्जराजर्जराः काकचञ्चुप्रहारम्॥ ८५ ॥

यद्वासरान् गमयति भ्रमरः करीर–पुष्पेषु तत्र मधुपस्य न मल्लिकायाः ।
मन्तुः परं त्वतिकठोरतुषारराशेर्यत्प्लोषितानि सकलानि सुमान्यनेन ८६

वृद्धिभावमुदधे न दधासि यत्पुनर्व्रजसि दूरतरं च ।
दृष्ट्वेर्ष्ययेव जलदं जलदानैः प्रीणयन्तमवनीमिति मन्ये ॥ ८७ ॥

माकन्दमेनमपकारभयादनिघ्नन् पान्थाश्मभिः कथमिह स्थितिमातनोषि
तेषां यदेष फलदो दृषदादिभिर्यैराहन्यते च कपिवत्परिमर्द्यते वा ८८

यदर्कपुष्पेषु मधुव्रतोऽसौ तुच्छेष्वभव्येष्वपि रंरमीति ।
तदस्य किं वाच्यमनेन यन्न जपादिपुष्पं भ्रमतापि लब्धम् ॥ ८९ ॥

मत्तद्विपेन्द्र करिणीरसलोलुपः स–
न्नुद्यौवनत्ववहमानमदप्रवाहः ।
क्षुद्रा अमी इति धिया तुदसि द्विपेन्द्रां–
स्तद् द्रक्ष्यसि स्वसमये यदि मे सृजन्ति ॥ ९० ॥

यदि कण्टककोटिकोटिभि–र्भ्रमर ! त्वां तुदतीह केतकी ।
तदिमां त्यज येन मालती–प्रमुखाः सन्ति लता न किं तव ॥ ९१ ॥

आत्मीयवर्गोन्नतिलेशमात्रं मृगाधिराज ! क्षमसे न येन ।
तद्दर्शनात्प्रत्युत कोपनस्त–त्त्यक्ते ह्यरण्ये भ्रमसि त्वमेकः ॥ ९२ ॥

किं मदं वहसि सागर ! गर्जन् मत्पुरो यदितरे खलु तुच्छाः ।
किं महानपि भवान्न हि पीतो-ऽगस्तिना हि मुनिना कुतुकेन ॥ ९३ ॥

पावक यदस्त्रमन्य-त्तदेकधारं द्विधा त्रिधा धारम् ।
अधमः परो न भवतो निहंसि यत्सर्वतोधारः ॥ ९४ ॥

बप्पीह हे किमनया घनयातिदीन-
वाग्याञ्चया च निभृतोन्मुखवीक्षणेन ।
त्वं खेदयस्यनुदिनं यदयं तडित्वान्
द्वित्रान् प्रदास्यति न वा सलिलस्य बिन्दून् ॥ ९५ ॥

हे चम्पकद्रुम ! सुवर्णसवर्णवर्ण-
पुष्पाणि विभ्रमकराणि जहासि दूरम् ।
सम्प्रेरितः खलवदुल्बणमारुतेन
स्थास्यन्ति भूपतिशिरस्सु परं त्वमूनि ॥ ९६ ॥

अव्यापृतं च कलुषं च सशैवलाम्बु
वर्धिष्णुनीरविभवः किमु कूप ! धत्से ।
यत्कोऽपि काङ्क्षति न मामधुनाम्बुधारै-
र्वर्षन्तमम्बुदममुं मनुजः स्तवीति ॥ ९७ ॥

माकन्दद्रुम ! मञ्जरीशुभफलश्रेणीगृहस्याध्वगान्
श्रान्तान् प्रीणयितुं फलैः शुभवतस्ते वासराः साम्प्रतम् ।
किंवा कर्कशकण्टकोत्कटवपुर्बब्बूलवृत्त्यन्तरा-
स्थायी प्रत्युत दापयस्यतितरां तेषां भयं भूभृतः ॥ ९८ ॥

किं चातकं जलद ! जल्पयसीह दीन-
वाचा विदन् यदयमर्पितनीरजीवी ।
देयं ममेत्यथ च तत् प्रणयोक्तिभिश्च
लज्जा तवैव खलु देहि रसेन नीरम् ॥ ९९ ॥

बहिर्मधुरिमोज्ज्वलैर्घनकषायपीनोदरैः
प्रतारयसि यज्जनं कनककान्तिभिस्त्वं फलैः ।
समागतमनुत्तरोत्तररसोपलम्भाशया
चरित्रमधमं ततस्तव रसालकारस्कर ! ॥ १०० ॥

सति घनेऽप्यशनेऽथ यथाक्षुधं यदपरेषु कुटुम्बिषु कुर्कुर ।
अधृतिमातनुषे भवतस्तदा बुधजनैः करटोऽप्यथ वर्ण्यते ॥ १०१ ॥

स्पर्धयन् महिष ! दन्तिना समं स्वेच्छया विचरणोच्छलद्बलः ।
स्वामिशीतलदृशैव जीवसि दुःसहस्तवं यतः कराहतिः ॥ १०२ ॥

रङ्गत्तरङ्गनिकरैर्विपुलोच्छलद्भिः
किं भापयन् जलनिधे ! ननु गर्जसि त्वम् ।
अद्यापि कोऽपि पथिकः किल यत्पिपासुः
किं तोषितोऽस्ति भवता जलबिन्दुनापि ॥ १०३ ॥

न दत्तं ग्रीष्मर्तावपि च तव शीतर्तुसमये
पयस्तृष्णाभोगाकुलितमनसश्चापि निभृतम् ।
कृतं तद्याञ्चाभिर्बहुभिरथ बप्पीह जलदो-
ऽधुनायं तद्दाताखिलजगति तत्तेऽपि सुलभम् ॥ १०४ ॥

यन्नाम्ना च हितोपदेशवचनं ते तावदिच्छङ्कराः
किं स्युः क्वाप्यथ चेद्भवन्ति च तथा शिक्षासहास्ते कुतः ।
स्वार्थव्यग्रधिया परन्तु सुधिया तत्संज्ञया ज्ञापनम्
तेनाप्रीतिकरं क्षमन्तु सुजनाः सर्वंसहाख्यातिनः ॥ १०५ ॥

# प्रशस्तिः

साहिश्रीमदकब्बर-सभासमक्षं प्रणीतजयवादाः ।
चातुर्विद्यसमुद्राः विजयादिमसेनसूरीन्द्राः ॥ १ ॥

तेषां सुशिष्यमुख्या विबुधाः श्रीसङ्घविजयनामानः ।
अनवद्यहृद्यविद्या विद्याधरनन्दिनीरमणाः ॥ २ ॥

तच्चरणपद्मयामल-मकरन्दास्वादनैकषट्चरणः ।
व्यदधद्दर्शनविजयो-ऽन्योक्तिशतं चतुरचित्रकरम् ॥ ३ ॥

श्रीतपागच्छराज्ये जयिनि श्रीविजयदेवसूरीन्द्रे ।
सप्तदशशतत्रिसंव-दगुम्फितमेतच्चिरं जयतु ॥ ४ ॥

महोपाध्यायश्रीधर्मसागरगणिविरचितम्

# ।। व्याख्यानविधिशतकम् ।।

णमिऊण महावीरं, जिणवयणं अत्थवायगं गहिउं ।
सुत्तरयणाइ रइयं, जह णायं तह पवक्खामि ।। १ ।।

अत्थं भासइ अरहा, सुत्तं गंथंति गणहरा निउणं ।
सासणस्स हिअट्ठाए, तओ सुत्तं पवत्तइ ।। २ ।।

सव्वेसिं सुत्ताणं, सामाइअसुत्तमाइमज्झयणं ।
तस्साइपयं तु णमो-अरिहंताणं समयसिद्धं ।। ३ ।।

गणहररइयं सुत्तं, लक्खणजुत्तं हविज्ज णियमेण ।
तल्लक्खणं तु आगम-भणिअं तह किंचि दंसेमि ।। ४ ।।

अप्पग्गंथ १ महत्थं २ बत्तीसा दोसविरहिअं ३ जं च ।
लक्खणजुत्तं सुत्तं ४, अट्ठहि अ गुणेहि उववेअं ।। ५ ।।

अलिअ १ मुवघायजणयं २, इच्चाइअसंधिदोसपज्जंता ।
बत्तीसा सुत्तदोसा; भणिआ णिज्जुत्तिअणुओगे ।। ६ ।।

एवंविहसुत्तस्स उ, तिहिं पयारेहिं होइ अणुओगो ।
कायव्वो सुगुरूहिं, सोअव्वो णिउणसीसेहिं ।। ७ ।।

सुत्तत्थो खलु पढमो, बीओ णिज्जुत्तिमीसओ भणिओ ।
तइयो अ णिरवसेसो, एस विही होइ अणुओगे ।। ८ ।।

तत्थणुओगो पढमो, पढमपयस्सेव पुव्वभणियस्स ।
सुपसिद्धो इअराणं, दंसेमि दिसं पि तस्सेव ।। ९ ।।

जो णिज्जुत्तीजुत्तो, बीओ भणिओ अ सुत्तअणुओगो ।
सा णिज्जुत्ती तिविहा, सुपसिद्धा होइ जिणसमए ।। १० ।।

तासु उवुग्घायभिहा, णिज्जुत्ती सव्वसुत्तसामण्णा ।
उद्देसाइ छव्वीस दारगाहाहि ताउ इमा ।। ११ ।।

उद्देसे १ णिद्देसे २, अ णिग्गमे ३ खित्त ४ काल ५ पुरिसे ६ अ।
कारण ७ पच्चय ८ लक्खण ९, णए १० समोआरणा ११ णुमए १२
किं १३ कइविहं १४ कस्स १५ कहिं १६,
केसु १७ कहं १८ किच्चिरं हवइ कालं १९।
कइ २० संतर २१ मविरहिअं २२,
भवा २३ गरिस २४ फासण २५ णिरुत्ती २६ ॥ १३ ॥

एआहिं गाहाहिं, वित्थररूवाहिं जा य णिज्जुत्ती।
तीए साणुगमाए, अणुओगो सुत्तमित्तस्स ॥ १४ ॥

तेणं चिअ जस्स णमो अरिहंताणं ति साणुओगपयं।
सम्मं तं खलु तित्थं, मग्गो सेसं अतित्थं ति ॥ १५ ॥

तं वा तित्थं जं चिअ, णिज्जुत्तिपमुहसव्वसुअठाणं।
संपइ वीरजिणाओ, उप्पण्णं जाव दुप्पसहो ॥ १६ ॥

तं तित्थं जिणठवियं, जस्साइगरो ण लब्भई अण्णो।
वीराओ वीरेण, दुप्पसहंतं तयं भणिअं ॥ १७ ॥

अहवा जस्स पमाणं, महाणिसीहं हविज्ज तं तित्थं।
हरिभद्दुत्तं लिहियं, महाणिसीहस्स आयरिसे ॥ १८ ॥

सेसा खलु उम्मग्गा, लोइअलोउत्तरेहिं दुविगप्पा।
लोइअउम्मग्गा पुण, कविलप्पमुहा मुणेअव्वा ॥ १९ ॥

लोउत्तरा य संपइ, दिगंबरप्पमुहपासपज्जंता।
ते पुण तित्थाभासा, तित्थयराभाससंठविआ ॥ २० ॥

तेसु वि णिज्जुत्तीए, णामग्गाहेण दूसिआ खमणो।
सेसा परूवणाए, णिअमेणं दूसिया हुंति ॥ २१ ॥

छव्वीसा इक्कारस, दारं तस्सेव जा य णिज्जुत्ती।
तीए जमालिपमुहा, बोडियपज्जंतया भणिया ॥ २२ ॥

छव्वाससयाइं णवुत्तराइं, तइआ सिद्धिं गयस्स वीरस्स ।
तो बोडिआण दिट्ठि, रहवीरपुरे समुप्पण्णा ॥ २३ ॥

रहवीरपुरं णयरं, दीवगमुज्जाण अज्जकण्हे य ।
सिवभूइस्सुवहिम्मि य, पुच्छा थेराण कहणा य ॥ २४ ॥

सुक्कंबरा य समणा, णिरंबरा मज्झ धाउरत्ताइं ।
हुंतु अ मे वत्थाइं, अरिहोमि कसायकलुसमई ॥ २५ ॥

तेणिह समणा दुविहा, कहिआ ते थेरकप्पजिणकप्पा ।
*जिणकप्पो वुच्छिन्नो, जम्बूनिव्वाणसमयम्मि* ॥ २६ ॥

संपइ अ थेरकप्पो, सज्झो आहारवत्थमाईहिं ।
णहि सामग्गिअभावा, कज्जं संपज्जए किंचि ॥ २७ ॥

इच्चाइ अ णिज्जुत्तिपमुहवयणेहिं दूसिओ खमणो ।
तित्थं व तेण (मओ) तेणं, मूलाओ आगमो चइओ ॥ २८ ॥

धम्मोवगरणमित्तं, परिग्गहो ता सुवण्णजिणपडिमा ।
परिमिअपरिग्गहम्मि, जइ हुज्जा देसविरईणं ॥ २९ ॥

अह जे परूवणाए, उम्मग्गा ते अ मग्गपडिवक्खा ।
चंदप्पहाइहिंतो, संजाया लोअविक्खाया ॥ ३० ॥

महुराए जिणदासो, इच्चाइआ णिगमस्स णिज्जुत्ती ।
तीए चउदसिमग्गो, उम्मग्गो पुण्णिमापक्खो ॥ ३१ ॥

अह बीया वरवरिआ, णिग्गमदारस्स होइ णिज्जुत्ती ।
तीए वि दारगाहा, सभासिआ सा इमा होइ ॥ ३२ ॥

णिव्वाणं चिइगागिइ, जिणस्स इक्खाग सेसगाणं च ।
सकहा थूभ जिणहरे, जायग तेणाहिअग्गि त्ति ॥ ३३ ॥

थूभसय भाउआणं, चउवीसं चेव जिणहरे कासी ।
सव्वजिणाणं पडिमा, वण्णपमाणेहिं णिअएहिं ॥ ३४ ॥

पडिमाराइअपक्खो, मुक्खाणं होइ मच्छिआणं व ।
लूआलालाजालं, तणछिज्जं मणुअबालाणं ॥ ३५ ॥

तणकप्पं पुण एअं, गाहदुगं अप्पबुद्धिसंगहिअं ।
लुंपगमउत्तजालं लीलाए तेण सुहछिज्जं ॥ ३६ ॥

एअं अपमाणं ति अ, भासंते होइ इट्ठफलसिद्धि ।
अरिहंताणं पि पयं, अपमाणं तस्स किं सेसं ? ॥ ३७ ॥

गाहादुगपरिहारे, परिहारो होइ सुत्तमित्तस्स ।
जं णिज्जुत्तिजुत्तो, अणुओगो सुत्तमित्तस्स ॥ ३८ ॥

अणुओगे साणुगमा, णिज्जुत्ति सेव सुत्तअणुओगे ।
अण्णहणुओगदारं, अपमाणं होइ वत्तव्वं ॥ ३९ ॥

एएणं णिज्जुत्ती, अपमाणं भासमाइपक्खेवा ।
इअ वयणं पक्खित्तं, भासाईणं पमाणत्ता ॥ ४० ॥

अण्णह णंदिपमुहातिदेसवयणेहिं भगवई जुत्ता ।
अपमाणं वत्तव्वा, एवं पि समीहिअं अम्हं ॥ ४१ ॥

तेण अणुओगजुत्ते, सुत्ते पडिमाण कारगप्पमुहा ।
सुलहा सद्दहणं पुण, दंसणमोहस्स खओवसमे ॥ ४२ ॥

णाणावरणिज्जस्स उ, दंसणमोहस्स तह खओवसमे ।
जीवमजीवे अट्ठसु, भंगेसु अ होइ सव्वत्थ ॥ ४३ ॥

तयभावा सद्दहणं, ण होइ तेणेव तस्स मिच्छत्तं ।
मिच्छत्ता जिणपडिमा-पडिवक्खो जाव तित्थस्स ॥ ४४ ॥

तेणं तित्थमतित्थं, अतित्थमवि भासइ सुतित्थं ति ।
तमसच्चं जगपावा, अहिअं पावं जिणिंदुत्तं ॥ ४५ ॥

जेणं जिणत्तणेणं, णिअणामविगप्पिअं सबुद्धीए ।
तं सच्चं ति कयट्ठा, तित्थमतित्थं महामोहा ॥ ४६ ॥

मिच्छत्ता विवरीअं, सव्वो लोओ वइज्ज सव्वं पि।
जइ कत्थवि सम्मं तं, घुणअक्खरणायओ णेअं ॥ ४७ ॥

णिज्जुत्ती अणुओगो, जस्स पमाणं खु तस्स सम्मत्तं।
सेसाणं मिच्छत्तं, आगाढं वा अणागाढं ॥ ४८ ॥

आगाढं पुण लोइअ-लोउत्तर भेअओ अ दुविगप्पं।
तेसिमसग्गहदोसा, दोसो णिअमा अ जिणसमए ॥ ४९ ॥

तुल्लाहिं किरियाहिं, ण होइ मग्गाणुसारि किच्चं पि।
उप्पहपहकिरिआणं, तुल्लाण वि अंतरं गुरुअं ॥ ५० ॥

जं ताओ किरिआओ, थिरयाहेऊ असग्गहाणं सिं।
अण्णह अरिहंता इअ, सद्दहणा होइ सम्मत्तं ॥ ५१ ॥

ता ससमग्गासग्गह-परिचायनिमित्तमेव जं किच्चं।
सम्मत्तकारणं वा, तं खलु मग्गाणुसारि त्ति ॥ ५२ ॥

जं किंचि वि परसमए, णाभिमयं अभिमयं च जिणसमए।
सम्मत्ताभिमुहाणं, तं खु असग्गहविणासयरं ॥ ५३ ॥

तत्थवि जं लोउत्तर-मागाढतरं विराहगस्स तयं।
जेणं हविज्ज तेणं, दव्वेण वि अलियवयणु त्ति ॥ ५४ ॥

देसेणं जिणवयणा-णुवाइणो तह वि ते न तहभूआ।
णिअवयविरोहिवयणं, जिणिंदवुत्तं पि णो वुत्तं ॥ ५५ ॥

जह विसलित्ते पत्ते, दुद्धं ववहारओ विसं इहरा।
एवं उस्सुत्तजुए, पत्ते सुत्तं पि विन्नेअं ॥ ५६ ॥

लोइयमिच्छादिट्ठी, सम्मदिट्ठि व्व वयणमित्तस्स।
अणुवाए अविवाई, णिच्छयओ दव्वसच्चवया ॥ ५७ ॥

सव्वे वि अणुवाया, णिअमा दव्वाओ सच्चवयणाइं।
अणुवाए अविवाओ, जमणुण्णं सव्ववाईणं ॥ ५८ ॥

अणुवायाणं विसया, सद्धाऽणुट्ठाणवायगवयाइं ।
पइमग्गं भिन्नाइं, तेहिं विवाओ अ सव्वेसिं ॥ ५९ ॥

अणुवाओ निअवयणं, सम्माइविसेसणेहिं संजुत्तो ।
तं भासगमासज्ज उ, सच्चमसच्चं च भावाओ ॥ ६० ॥

जह परतित्थिअवयणं, अणुवयणं होइ जिणवरिंदस्स ।
मिच्छ त्ति वयणजुत्तं, जिणवयणं सव्वओ सच्चं ॥ ६१ ॥

एवं जिणिंदवयणाणुवायरहिया दिगंबरप्पमुहा ।
णिज्जुत्तिसण्णिएणं, तित्थेणुग्घोसिआ बाढं ॥ ६२ ॥

तेसिं सव्वेसिं चिअ, णिअणिअमग्गा हवंति तित्थाइं ।
सेसं सव्वमतित्थं, इय बुद्धी सासया तेसिं ॥ ६३ ॥

एएणं सव्वेसिं, एगो तित्थगरो त्ति दुव्वयणं ।
सव्वेसिं तित्थाणं, आइगरा हुंति तित्थयरा ॥ ६४ ॥

तेसिं तित्थयरा पुण, सिवभूइप्पमुह णाम आइगरा ।
वीरजिणो अम्हाणं, तित्थयरो तं मह असच्चं ॥ ६५ ॥

णिअपरतित्थगरत्ता, तित्थयरो णेव तेसिं वीरजिणो ।
णिअतित्थं अण्णाओ, अण्णमतित्थं ति सद्दहणा ॥ ६६ ॥

जो अण्णाओ जाओ, अण्णं पिअरं व अण्णतित्थयरं ।
जंपइ लोअविरुद्धं, अलज्जओ अहव गयसण्णो ॥ ६७ ॥

वीरजिणेणं ठविअं, तित्थमतित्थं ति भासगा सव्वे ।
माया मे वंज्झ त्ति अ, वयणविरोहं ण याणंति ॥ ६८ ॥

वीरजिणो जइ देवो, तित्थयरत्तेण तुम्हमम्हं व ।
ता तट्ठविअं तित्थं, सेसमतित्थं सओ सिद्धं ॥ ६९ ॥

लोइयदेवसरूवा, चंदप्पहमाइणो ण गुरुरूवा ।
सीसत्ताभावाओ, गुरूवएसस्सणायत्ता ॥ ७० ॥

जिणवयणाणणुवयणा, चंदप्पहमाइणो अ सव्वे वि ।
णेअमजुत्तं जम्हा, सयं पि ते हुंति तित्थयरा ॥ ७१ ॥

तम्मूला पइमग्गं, भिण्णाभिण्णेव पकिरिया हुज्जा ।
जह अण्णउत्थियाणं, अण्णाणस्सेव माहप्पा ॥ ७२ ॥

तम्मुहधम्मिअसद्दा, सोउमकप्पा तहा सुदिट्ठीणं ।
जह गुट्ठमाहिलमुह-धम्मकहासवणपडिसेहो ॥ ७३ ॥

एएणं लोउत्तर-उम्मग्गा सव्वहा अदट्ठव्वा ।
णिज्जुत्तीए भणिआ, अणुभणिआ पुव्वसूरीहिं ॥ ७४ ॥

एवं च सुत्तमत्थं, सम्मं जाणिसु तित्थपडिवक्खा ।
ता अणुओगद्दारं, चइंसु जह महाणिसीहं पि ॥ ७५ ॥

जं अणुओगे आगम, तिविहो दुविहो अ अणुगमो भणियो ।
सो तस्सेव पमाणं, जस्स य णिज्जुत्तिपमुहं पि ॥ ७६ ॥

णिज्जुत्तिभासचूण्णी, जिणिंदभणिआ य जाउ वुच्छिन्ना ।
ता वित्थरत्थसुत्ता, अण्णह सुत्तत्थवुच्छेओ ॥ ७७ ॥

तत्थ वि केई तित्था, विणिग्गया केई सयं समुप्पण्णा ।
मुच्छिअणाडिसमुच्छिम-कप्पा सव्वे वि अव्वत्ता ॥ ७८ ॥

लोइयमिच्छत्तं पुण, सरूवभेएण हुज्ज चउभेअं ।
अभिगहिअ १ मणभिगहियं २, संसइयं ३ तह अणाभोगं ॥ ७९ ॥

तत्थ वि जमणाभोगं, अव्वत्तं सेसगाणि वत्ताणि ।
चत्तारि वि जं णिअमा, सण्णीणं हुंति भव्वाणं ॥ ८० ॥

भव्वा वि अववहारिअ-ववहारिअभेअओ दुविगप्पा ।
अववहारिअकालो, अणंतपुग्गलपरावट्टा ॥ ८१ ॥

ववहारीणं णिअमा, संसारो जेसि हुज्ज उक्कोसो ।
तेसिं आवलिअअसंख-भागसमपुग्गलपरट्टा ॥ ८२ ॥

तेण परं सिद्धिगई, तेसिं णिअमेण हुज्ज जिणभणिआ ।
जं ते पुणो वि अव्ववहारित्तं नेव पाविंति ॥ ८३ ॥

तेसु वि एगो पुग्गल-परिअट्टो जेसि हुज्ज संसारे ।
तहभव्वत्ता तेसिं, केसिंचि अ होइ किरिअरुई ॥ ८४ ॥

तीए किरियाकरणं, लिंगं पुण होइ धम्मबुद्धीए ।
किरिआरुईणिमित्तं, जं वुत्तं वत्तमिच्छत्तं ॥ ८५ ॥

तेसु वि अवड्ढपुग्गल-परिअट्टो जेसि हुज्ज संसारे ।
सम्मत्तजोग्गयाए, लहंति ते केइ सम्मत्तं ॥ ८६ ॥

लोअववहारविषयं, पत्तेअसरीरमेव जेसि सइं ।
ते ववहारिअभव्वा, सेसा ववहारबाहिरिआ ॥ ८७ ॥

तेणं अभव्वजीवा, ण हुंति ववहारमाइवयविसया ।
ते पुण पडिवडिआणं, अणंतभागो अ सव्वे वि ॥ ८८ ॥

जं चिअ अज्जप्पभिई, संजायं तं अणंतखुत्तो वि ।
तह तं भविस्सइ पुण, ण होइ सिं जेण ते थोवा ॥ ८९ ॥

मिच्छत्तं पुण तेसिं, अणाभोगं मंदमवि अ अणवरयं ।
तिव्वं पि संसयाई, ण होइ जं साइसंतं च ॥ ९० ॥

संसइअमणभिगहिअं, अभिगहिअं अभिणिवेसिअं कमसो ।
अणुण्णविवक्खाए, मन्दाइअ जाव तिव्वतमं ॥ ९१ ॥

तत्थ विअ अभिणिवेसी, णागपुरिअलुंपगो हि दुरहिगमो ।
अप्पसुआणं सिं जे, वयणविरोहं ण याणंति ॥ ९२ ॥

सव्वण्णू वि जिणिंदो, णिअयं णिण्णेइ ण उण इअरं पि ।
एवं तम्मयमूल-परूवणा पावकम्मुदया ॥ ९३ ॥

जइ णिअयमणिअयं वा, एगसहावेण सव्वया हुज्जा ।
ता अरिहा सव्वण्णू, अण्णह णिअमा ण सव्वन्नू ॥ ९४ ॥

णिरुवक्कमसोवक्कम-भेएहिं दुविहमाउअं होइ ।
पढमं णिअयमणिअयं, बियंति विगप्पिअं तेण ॥ ९५ ॥

णणु सोवक्कमआउ-स्सुवक्कमा जिणवरेण विण्णाया ।
जइ ता तंपि अ णिण्णेइ, अण्णहा णेव सव्वन्नू ॥ ९६ ॥

जइ-ता-सद्दब्भंतो, संसयवयणं वइज्ज मूढमणो ।
अमुणंतो ताणत्थं, कप्पिअअत्थेण भंतिकरो ॥ ९७ ॥

जम्हा जइ-तासद्दा, णिआमगा कज्जकारणाणमिहं ।
अण्णय-वइरेगेहिं, लोअपसिद्धं ति विण्णेअं ॥ ९८ ॥

कालाइपंचजणिअं, सव्वं कज्जं हविज्ज जिणसमए ।
तत्थ य एगा णिअई, सेसचउक्कं अणिअइ त्ति ॥ ९९ ॥

तेहिं जणिअं कज्जं, णिअयाणिअयं जिणेण पण्णत्तं ।
तं चिअ णिअया भिण्णं, अणिअयमेवं महामोहो ॥ १०० ॥

जं णिअयं तमणिअयं, ण होइ एगं विरुद्धधम्मेहिं ।
जं सीअं तं उसिणं, किं केण सुअं व दट्ठुं वा ? ॥ १०१ ॥

काल-णय-कारणाणं, भिण्णाभिण्णस्सरूवममुणंतो ।
अविरोहं पि वइज्जा, विरोहमण्णाणमाहप्पा ॥ १०२ ॥

बीअंगे पुण एवं, सुत्ते वित्तीइ जुत्तिपुव्वं पि ।
जं भणियं तं पि इहं, पसंगओ दंसिअं णेअं ॥ १०३ ॥

एवं खलु सुत्तत्थं, सम्मं सुणिउण सम्मदिट्ठीहिं ।
णेअं तित्थगरेहिं, भणिअमिणं ति सुबुद्धीए ॥ १०४ ॥

# ॥ संग्रहशतकम् ॥

वीरं तिलोयनाहं, वंदिअ भणामि साररयणगाहा ।
आय-परहियट्ठाए, उद्धरिआ सुयसमुद्दाओ ॥ १ ॥

नयर-रह-चक्क-पउमे, चंद्रे सूरे समुद्दख्-मेरुम्मि ।
जो उवमिज्जइ सययं, तं संघ गुणायरं वंदे ॥ २ ॥

एगो साहु एगा य, साहुणी सावयो य साविया वा ।
आणाजुत्तो संघो, सेसो पुण अट्ठिसंघाओ ॥ ३ ॥

अम्मापियसारिच्छो, सिवघरथंभो य होइ जिणसंघो ।
जिणवर-आणाबज्झो, सप्पु व भयंकरो संघो ॥ ४ ॥

निव्वुइपहसासणयं, जयइ सया सव्वभावदेसगं च ।
कुसमयमयणासणयं, जिणंद वर वीर सासणायं ॥ ५ ॥

सव्वाइ जिणेसरभासिआइं वयणाइं नन्नहा हुंति ।
इअ बुद्धि जस्स मणे, सम्मत्तं निच्चलं तस्स ॥ ६ ॥

देवो जिणिंदो गयरागदोसो, गुरु वि चारित्तरहस्सकोसो ।
जीवाइ तत्ताण य सद्दहाणं, सम्मत्तमेवं भणियं प्पहाणं ॥ ७ ॥

देवो जिणोऽट्ठारस दोसवज्जिओ, गुरु सुसाहुणो समलोट्ठुकंचणो ।
धम्मो पुणो जीवदयाइ सुंदरो, सेवेह एयं रयणतयं सया ॥ ८ ॥

समद्दिट्ठी जीवो, जइ वि हु पावं समायरइ किंचि ।
अप्पो हि होइ बंधो, जेण न निद्धंद्धसं कुणइ ॥ ९ ॥

विरया सावज्जाओ, कसायहीणा महव्वयधरा वि ।
सम्मदिट्ठी विहूणा, कया वि मोक्खं न पावंति ॥ १० ॥

सम्मत्तम्मि उ लध्धे, विमाणवज्जं न बंधए आऊ ।
जइ न विगयसम्मत्तो, अहव न बद्धाउओ पुव्विं ॥ ११ ॥

नयभंगप्पमाणेहिं, जो अप्पा सायवायभावेण ।
मुणई मोक्खसरुवं, सम्मदिट्ठी य सो नेओ ॥ १२ ॥

दंसणभट्ठो भट्ठो, दंसणभट्ठस्स नत्थि निव्वाणं: ।
सिज्झंति चरणरहिया, दंसणरहिया न सिज्झंति ॥ १३ ॥

जा गंट्ठी ता पढमं, गंट्ठीसमइत्थओ भवे बीअं ।
अनियट्टीकरणं पुण, सम्मत्तपुरक्खडे जीवे ॥ १४ ॥

सदसद्विसेसणाओ, भवहेउजहच्छिओवलंभाओ ।
नाणफलाभावाओ, मिच्छादिट्ठिस्स अन्नाणं ॥ १५ ॥

जो जाणइ अरिहंते, दव्वत्तगुणत्तपज्जयत्तेहिं ।
सो जाणइ अप्पाणं, मोहो खलु जाइ तस्स लयं ॥ १६ ॥

नाणाहिओ वरतरं, हीणो वि हु पवयणं पभावंतो ।
न य दुक्करं करंतो, सुट्ठु वि अप्पागमी पुरिसो ॥ १७ ॥

हयं नाणं कि[रि]या हीणं, हया अन्नाणओ कि[रि]या ।
पासंतो पंगुलो दड्ढो, धावमाणो अ अंधओ ॥ १८ ॥

जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स ।
एवं खु नाणी चरणेण हीणो, नाणस्स भागी न हु सुग्गइए ॥ १९ ॥

नाणं पयासगं सोहओ तवो संजमो य गुत्तीकरो ।
तिण्हि वि समाओगो, मुक्खो जिणसासणे भणिओ ॥ २० ॥

चरणकरणप्पहाणा, ससमय-परसमय-मुक्कवावारा ।
चरणकरणस्स सारं, निच्छयं सुद्धं न याणंति ॥ २१ ॥

